The Council for the Indian School Certificate Examinations (2017) Subject-wise totals. Accessed on 18 July 2019. https://cisce.org/.../20151015120036381446616ICSE%20Subject-wise%20Totals.pdf

The New Indian Express.16 July 2019. Sanskrit unifies Bharat, promote it. Accessed on 19 July 2019. http://www.newindianexpress.com/nation/2019/jul/16/sanskrit-unifies-bharat-promote-it-rss-leaders-to-pm-narendra-modi-2004356.html

✦✦✦

 ISSN : 0975-1769

# श्रुत्यैव वायुसञ्ज्ञा प्रसिद्ध्यति

-डॉ. आर्. बालमुरुगः

विभागाध्यक्षः, न्यायविभागः, केन्द्रीयसंस्कृतविश्वविद्यालयः, श्रीरघुनाथकीर्तिपरिसरः, देवप्रयागः, उत्तराखण्डः

**[अस्मिन् शोधलेखे वायोः लक्षणम्, तस्य स्वरूपम्, तस्य सिद्धिप्रकारश्च वैशेषिकदर्शनानुसारेण निरूपिताः।]**

**उपोद्घातः ( शोधसारः )–** अतीन्द्रयपदार्थानां सिद्धौ (निर्णये) अनुमानप्रमाणं शरणमिति युक्तिनिष्ठाः तान्त्रिकाः विना विवादमभ्युपगच्छन्ति। वाय्वादिद्रव्याणि अनुमानमुखेन संस्थापयन्ति वैशेषिकाः इति सुप्रथितं वर्त्तते शास्त्रजगति। सन्दर्भेऽस्मिन् जिज्ञासैका दुरुद्धरा समुन्मिषति यत् यथाकामं प्रबलयुक्तिभिः वायुरनुमीयतां, सिद्ध्यमानद्रव्यस्य वायुरिति संज्ञासिद्धिः कथमिति। यतः स्पर्शादिलिङ्गैः न वायुत्वेन रूपेण वायुः अनुमातुं शक्यः, किन्तु प्रसिद्धद्रव्येतरत्वेनैव इति। तस्यास्समाधानं परमकारुणिकाः वैशेषिकतन्त्रप्रवर्त्तकाः श्रीमत्कणादमहर्षयः आगमेनैव (वेदेनैव) वायुसंज्ञा सिद्ध्यतीति प्रणूतनसरणिमवलम्ब्य समाविष्कुर्वन्। तत्सूत्रविवरणे श्रीमच्छङ्कर-मिश्राचार्याः नैकदृष्टान्तैः सूत्रकाराशयं स्पष्टीचक्रुः। प्रकृतशोधप्रबन्धे वैशेषिकाणां विचाराधारेण वायुसिद्धिप्रकारं तत्संज्ञासिद्धिञ्च सविस्तरं सयुक्तिकञ्च वर्णयामि।

**वाय्वनुमानावतरणम्–**"स्पर्शवान् वायु"[1] इति सूत्रेण वायुः लक्षितोऽभवत् स्पर्शगुणेन। परन्तु इदं लक्षणमाश्रयासिद्धं स्पर्शवत्वेनाभिमतस्य वायोरेवासिद्धत्वादित्या-शङ्कायां वायुरनुमानप्रमाणगम्यः इति समाधानमभिलषितं शास्त्रकारैः। तदर्थम् आदौ अनुमानप्रमाणेनार्थसिद्धिप्रकारं दृष्टान्तरूपेणोपास्थापयन् सूत्रकाराः। यथा **"विषाणी ककुद्मान् प्रान्तेबालधिः सास्नावान् इति गोत्वे दृष्टं लिङ्गम्"**[2] इति।

तथाहि क्वचिद् व्यवहिते विप्रकृष्टे वा गवि कोऽयं पशुः इति निर्णयाभावदशायां विषाणादिहेतुभिः अयं गौरेवेत्यनुमितिः जायते तथा स्पर्शादिगुणैः सामान्यतः द्रव्याश्रितत्वमनुमाय परिशेषेण वायुसिद्धिः भवतीति सूत्रकाराशयः। सूत्रेऽस्मिन् दृष्टं लिङ्गमित्यस्य विषाणादिहेतुः प्रत्यक्षविषयः इति नार्थः तथा सति वायुसाधकस्पर्शादि-

---

1. वैशेषिकसूत्रम् -2/1/4
2. वै० सू० - 2/1/8

लिङ्गानामपि तथात्वात् **"न च दृष्टानां स्पर्शः इत्यदृष्टलिङ्गो वायुः"**[1] इति सूत्रकाराणां वचनं बाधितमापद्यते। अदृष्टं (अप्रत्यक्षं) लिङ्गं यस्य सः अदृष्टलिङ्गः इति तदर्थः। स्पर्शादिः दृष्टमेव लिङ्गमिति चेदुच्यते प्रकृतसाध्येन सह यस्य हेतोः व्याप्तिः प्रत्यक्षतः अवधार्यते सः हेतुः दृष्टं लिङ्गमिति व्यपदिश्यते सूत्रकारैः। गोत्वेन सह विषाणित्वादिहेतोरविनाभावः प्रत्यक्षगम्यः, वायुत्वेन सह स्पर्शादेः न तथा, वायोरेवाप्रत्यक्षत्वात्। किन्तु स्पर्शः गुणत्वात् द्रव्याश्रितः इति सामान्यव्याप्त्या परिशेषानुमानेन वायुः साधनीयः इत्यतः अदृष्टलिङ्गः वायुत्वेन सह प्रत्यक्षतः अगृहीतव्याप्तिकस्पर्शादिलिङ्गकः वायुः इति प्रोक्तम्।

स्पष्टीकृतञ्चैतदुपस्कारकारैः यथा- **"यद्यपि दृष्टमेव स्पर्शादिचतुष्कं लिङ्गमिति तथापि वायुना सहागृहीतव्याप्तिकत्वाददृष्टलिङ्गत्वमुक्तम्"**[2] इति। यद्यपि केवलः विषाणः अतिप्रसक्तः महिषादौ तथापि सन्ति ऋजुत्वसुकुमारत्वह्रस्वादयः स्वाभाविकाः विशेषाः गोविषाणयोः। यः पुरुषः स्वाभाविकवैलक्षण्यम् ऋजुत्वादिरूपं महिषादिविषाणापेक्षया गोविषाणस्याकलयितुं समर्थः आकलयति च सः यदा दूरतः गोविषाणमात्रं पश्यति यदा वा व्यवहितगोः विषाणमात्रं साक्षात्करोति तदा अयं गौः विषाणित्वात् (विलक्षणविषाणाद्वा) पूर्वानुभूतगोवदिति अनुमिनोति। एवमेव ककुत्प्रान्ते-बालधिसास्नालिङ्गैः गोत्वम् अनुमातुं शक्यते। प्रान्ते बालाः आधीयन्ते इति व्युत्पत्या प्रान्तेबालधिशब्दः अन्ते बालयुक्तपुच्छविशेषं वक्ति। स च गौरेव नाश्वमेषादेः, तेषां समस्तबालमयपुच्छः वर्त्तते। महिषस्य तादृशपुच्छवत्वेऽपि गोवत् प्रलम्बपुच्छः नास्ति इति प्रलम्बप्रान्तेबालधिरपि अन्यव्यभिचारिलिङ्गमिति ज्ञेयम्। एवञ्च यथा प्रत्यक्षगृहीत-व्याप्तिकलिङ्गैः गोत्वमनुमीयते तथा सामान्यतो गृहीतव्याप्तिकलिङ्गैः वायुरनुमातुं शक्यते इति तात्पर्यमवगन्तव्यम्।

**स्पर्शलिङ्गेन वायुसाधनप्रकारः– "स्पर्शश्च वायोः"**[3] इति सूत्रेण स्पर्शलिङ्गेन वायुसाधनमभिप्रेतम्। तथाहि स्पर्शः द्रव्याश्रितः गुणत्वात् स्पर्शत्वाद्वा तेजसोष्णस्पर्शवदिति अनुमानेन सामान्यतः द्रव्याश्रितत्वे सिद्धे प्रसिद्धपृथिव्यादिद्रव्याश्रितः न भवतीति निषेधमुखेनाभीष्टद्रव्याश्रितत्वं संसाध्यते। अयमेव प्रकारः परिशेषानुमानमिति शास्त्रे प्रोच्यते। तं प्रकारं समासेन वर्णयामि। तथाहि अनुभूयमानस्पर्शः न पृथिवीसमवेतः उद्भूतरूपासमानाधिकरणस्पर्शत्वात् तप्तजलीयोष्णस्पर्शवत्। दृष्टान्ते तप्तजले तैजसः उष्णस्पर्शः अनुभूयते न तेजोरूपं (न वा तप्तजलसंयुक्ततेजः साक्षात्क्रियते।) पार्थिवोद्भूतस्पर्शसामान्यस्यायं स्वभावः यदुद्भूतरूपसामानाधिकरण्येनैवोपलभ्यते। अर्थाद्

---

1. वै० सू० –2/1/10
2. वैशेषिकसूत्रोपस्कारः/पुटसंख्या–131
3. वैशेषिकसूत्रम्–2/1/9

यस्याः पृथिव्याः स्पर्शः अनुभूयते नियमेन तस्या रूपमुपलभ्यते। न काऽपि तादृशी पृथिवी वर्तते यस्याः स्पर्शः उद्भूतः रूपञ्चानुद्भूतमिति। यद्ययं स्पर्शः पृथिव्याः स्यात् तदा तदीयरूपमप्युपलभ्येत इति तर्कसहकृतव्याप्तिज्ञानेन पृथिव्यसमवेतत्वसिद्धिः भवति। अत्रोपस्कारकृतः पूर्वोक्तहेतुना पृथिव्यादित्रयासमवेतत्वं सिषाधयिषन्ति। परन्तु पृथिवीस्पर्शः एवोद्भूतरूपाव्यभिचरितः भवति न जलतेजसोरुद्भूतस्पर्शः। जलाग्रहणेऽपि तदीयस्पर्शः उपलभ्यते शीतं शिलातलम् इत्यत्र, एवं तेजोऽग्रहणेऽपि तदीयस्पर्शमात्रं गृह्यते उष्णजले। अतः नायं हेतुः समर्थः पृथिव्यादित्रयासमवेतत्वसाधनायेति विविच्य प्रयोगः कार्यः इति प्रतिभाति। प्रयुक्तञ्च तथैव न्यायकन्दलीकारादिभिः।

सः स्पर्शः न जलतेजसोः समवेतः अनुष्णाशीतत्वात् पार्थिवस्पर्शवत्। नाकाशकालदिगात्ममनस्सु समवेतः स्पर्शत्वात् घटस्पर्शवत्। उपलभ्यमानस्पर्शस्य मूर्तत्वसामानाधिकरण्येनोपलम्भात् मूर्तत्वसामानाधिकरण्यहेतुनापि विभुचतुष्ट्यासमवेतत्वं साधयितुं शक्यते। (मूर्तत्वञ्च क्रिया।) अत्र कन्दलीकाराः तत्स्पर्शाश्रयः न मनः भवतीत्यत्र सजातीयद्रव्यानारमभकत्वं हेतुतया न्यर्दिशन्। यथा– **“मनसाञ्च स्पर्शवत्वे परमाणूनामिव तेषां सजातीयद्रव्यारम्भकत्वं स्यात्”**[1] इति। तर्ह्यत्रैवं प्रयोगोऽभिमतः इति वाच्यं यत्– मनः न स्पर्शाश्रयः सजातीयद्रव्यारम्भकभिन्नत्वात् आकाशादिवदिति। इत्थमष्टद्रव्यानाश्रितत्वसिद्धौ स्पर्शः पृथिव्याद्यष्टद्रव्यातिरिक्तद्रव्यसमवेतः इति परिशेषतः वायुः सिद्ध्यतीति अभिप्रायः।

**वायुसाधकशब्दादिलिङ्गानां समासेन वर्णनम्–** स्पर्शश्च वायोः इति सूत्रस्थचकारेण शब्दधृतिकम्पाः लिङ्गानि समुच्चीयन्ते। **“स्पर्शशब्दधृतिकम्पलिङ्गः”**[2] इति प्रशस्तपादभाष्यवचनम्। अतः स्पर्शेन इव शब्दादिलिङ्गैरपि परिशेषानुमानेनैव वायुः प्रसाधयितुं शक्यः। तथाहि रूपवद्द्रव्याभिघातशून्यकालीनः पर्णादौ शब्दः स्पर्शवद्वेगवद्द्रव्याभिघातजन्यः अविभज्यमानावयवद्रव्यसम्बन्धिशब्दत्वाद् दण्डाभिघातज-भेरीशब्दवत्। अभिघातः शब्दजनकसंयोगविशेषः भवति। वंशादौ अवयवद्वयविभागेन जायमानशब्दे (विभागजशब्दे इति यावत्) व्यभिचारवारणाय हेतौ अविभज्यमानावयव-द्रव्यसंबन्धित्वं विशेषणमुपात्तम्। एवं द्वितीयादिशब्दे पूर्वपूर्वशब्दस्यैवासाधारणनिमित्ततया वायोरप्रयोजकत्वाद् व्यभिचारवारणाय शब्दे आद्यत्वविशेषणं वाच्यमिति केचन। एवं पर्णाद्यवच्छेदेनोपलभ्यमानशब्दे रूपवद्द्रव्यस्याभिघाताभावः योग्यानुपलब्ध्यावगम्यते।

एवञ्च पर्णादिशब्दनिमित्तभूतसंयोगाश्रयद्रव्यं न पृथिव्यादित्रयं रूपशून्यत्वादा-काशवत्, नाकाशादिपञ्चकं स्पर्शवत्वादित्येवं प्रसिद्धद्रव्यप्रतिषेधे शिष्यमाणः वायुस्सिद्ध्यति। अथात्र साध्यकोटिप्रविष्टद्रव्ये वेगवत्वविशेषणं सार्थकं भवति, वेगस्य

---

1. न्यायकन्दली –पुटसंख्या –116
2. प्रशस्तपादभाष्यम् –पुटसंख्या –115

शब्दकम्पादौ प्रयोजकत्वान्न तथा स्पर्शः इति तदुपादानन्निरर्थकमिति चेन्न स्पर्शः अपि शब्दे प्रयोजकः एव भवति वेगवत्। अत एव वायुसाधकलिङ्गेषु स्पर्शः एव प्रथमतया निर्दिष्टः इति स्पर्शवत्वविशेषणमपि सार्थकमिति ज्ञेयम्।

एवमन्तरिक्षे तृणादीनां धृतिः स्पर्शवद्वेगवद्द्रव्यसंयोगजन्या प्रयत्नवेगाप्रयोज्य-धृतित्वात् जलप्रवाहे प्लवमानकाष्ठादिधृतिवदित्यतोऽपि वायुसिद्धिः। पक्षिणः स्वीयप्रयत्नप्रयोज्ये पक्षिधृतौ एवं वेगप्रयोज्यबाणधृतौ च व्यभिचारवारणाय यथाक्रमं प्रयत्नवेगाप्रयोज्यत्वविशेषणमुपात्तं धृतौ। धृतिशब्देन पतनाभावः अवस्थितिः वा विवक्षिता। एवञ्चान्तरिक्षमण्डले तृणादीनां धृतिः वायुप्रयोज्यैवेति परिशेषात्पर्यवस्यति।

एवं रूपवद्द्रव्याभिघातासमानकालीनः तरुशाखादिषु कम्पः स्पर्शवद्वेगवद्द्रव्याभि-घातजन्यः कम्पविशेषत्वात् नदीप्रवाहाभिहतवेतसकम्पवदिति प्रयोगेण पूर्ववद्वायुसिद्धः भवति। गुरुत्वप्रयोज्यपतने द्रवत्वप्रयोज्यस्यन्दनादौ च व्यभिचारपरिहाराय कम्पविशेषः हेतुतया निर्दिष्टः इति विलक्षणकम्पः ग्राह्यः।

**वायुप्रत्यक्षानुमानम् उपाधिदूषितमिति प्रदर्शनम्–** अथ वायुः त्वगिन्द्रियेण गृह्यते। तथा च वायुः प्रत्यक्षः (इन्द्रियजन्यप्रत्यक्षविषयः इत्यर्थः) प्रत्यक्षस्पर्शाश्रयत्वाद् घटवदिति चेन्न। अत्रोद्भूतरूपमुपाधिः। न च प्रत्यक्षत्वं साध्यं तच्च रूपादौ वर्तते न तत्रोद्भूतरूपमिति न साध्यव्यापकः भवत्युपाधिरिति वाच्यम्। अत्र पक्षधर्मावच्छिन्नसाध्यस्य व्यापकं भवति उद्भूतरूपम्। पक्षधर्मः बहिर्द्रव्यत्वं, तद्विशिष्टप्रत्यक्षत्वं घटादावेव तत्र चोद्भूतरूपमस्तीति न दोषः। तस्मात्सोपाधिको हेतुः व्याप्यत्वासिद्धः इति नियमेन प्रत्यक्षस्पर्शवत्वं न प्रत्यक्षत्वव्याप्यं प्रत्युत तद्व्यभिचारीति नानेन वायोः प्रत्यक्षत्वं स्थापयितुं शक्यते।

**अयं भावः–** रूपवत्येव त्वगिन्द्रियं प्रवर्तते इति घटादौ दृष्ट्वेदमवधार्यते यद्द्रव्यस्य स्पार्शनत्वं (स्पार्शनप्रत्यक्षत्वं वा) चाक्षुषत्वव्याप्यमिति। नायं नियमः कुत्रापि व्यभिचारग्रस्तः भवति। ततः एवं निर्धार्यते वायुः न स्पार्शनः चाक्षुषत्वाभावादा-काशवत्। व्यापकाभावात् व्याप्याभावस्सिद्ध्यति। वायौ चाक्षुषत्वनिवृत्या स्पार्शनत्वमपि निवर्तते। न च वायुः वातीति प्रत्यक्षेण विरोधः इति वाच्यम्। न तत् स्पार्शनप्रत्यक्षं भवति किन्तु स्पर्शलिङ्गेन पूर्वोक्तदिशा वायुमनुमाय तदभ्यासपाटवात् (पूर्वानुमानजन्य-संस्कारातिशयादिति यावत्) वायुस्पर्शोपालम्भे सति व्याप्तिस्मरणानपेक्षः लिङ्गज्ञान-सहकृतोद्बुद्धव्याप्तिसंस्कारः एव वायुः वातीति अनुमितिं जनयति। अत्र प्रमाणं न्यायकन्दलीकारवचनम्। यथा– **"यदपि वायुर्वातीति ज्ञानं तदभ्यासपाटवाति-शयाद् व्याप्तिस्मरणाद्यनपेक्षं स्पर्शेनानुमानम्, चक्षुषेव वृक्षादिगतिक्रियोपलम्भात्"**[1] इति। तत्र दृष्टान्तः चक्षुषा वृक्षशाखायाः कम्पमुपलभ्य झटित्येव पुरुषः प्रत्येति

1. न्यायकन्दली–पुटसंख्या –115

वायुना चलति वृक्षशाखेति। न तत्र वायुः चक्षुषा गृहीतः। किन्तु कम्पेन पूर्वानुमितिप्रभव-संस्कारातिशयेन एवमाकारानुमितिः जायते तद्वदिति तात्पर्यम्।

**उपकारस्य वैशिष्ट्यम्–** स्पर्शेन वाय्वनुमानसन्दर्भे वैशेषिकसूत्रोपस्कारकाराः श्रीमच्छङ्करमिश्राचार्याः विलक्षणविचारं प्रास्तुवन्। तथाहि परिशेषानुमानेन वायुसिद्ध्यर्थं प्रयोगः एवं वर्ण्यते– स्पर्शः पृथिव्याद्यष्टद्रव्यातिरिक्तद्रव्याश्रितः पृथिव्याद्यष्टद्रव्यानाश्रितत्वे सति द्रव्याश्रितत्वात् यन्नैवं तन्नैवं यथा पृथिवीरूपादिकमिति। अनेन व्यतिरेक्यनुमानेनैव साध्यसिद्धिः भवतीति सामान्यतः सम्प्रदाये प्रथितं वर्तते। अस्मिन् अनुमाने हेतौ विशेष्यासिद्धिवारणाय गुणत्वेन द्रव्याश्रितत्वं प्रसाध्यते। एवं विशेषणासिद्धिवारणाय पृथिव्याद्यष्टानाश्रितत्वं साध्यते। अधस्तात् तथैव विचारितम्। परन्तु इमे आचार्याः अन्वयव्याप्त्यापि सिषाधयिषितस्य सिद्धिः भवितुमर्हतीति व्यक्तीचक्रुः।

तथाहि यदि स्पर्शेन वाय्वनुमानपूर्वकाले एव कश्चित्पुरुषः उपलभ्यमानस्पर्शः पृथिव्यादिषु न वर्तते इत्येवमितरबाधमनुसन्धाय पृथिव्याद्यष्टद्रव्यानाश्रितः स्पर्शः द्रव्याश्रितः गुणत्वाद्रूपवदिति एवमनुमातुं प्रवर्तते, तदा तस्य पुरुषस्य अन्वयव्याप्त्यैव निरुक्तविशेषणविशिष्टस्पर्शे पृथिव्याद्यष्टद्रव्यातिरिक्तद्रव्याश्रितत्वानुमितिः जायते। न च परामर्शे व्यापकतावच्छेदकतया भासमानधर्मः एवानुमितौ विधेयतावच्छेदकतया भासते इति नियमः। प्रकृते शुद्धद्रव्याश्रितत्वस्यैव व्यापकतावच्छेदकत्वात् स एव धर्मः विधेयतावच्छेदकतया भासते, न पृथिव्याद्यष्टातिरिक्तद्रव्याश्रितत्वत्वमिति वाच्यम्। लाघवज्ञानादिसहकृतपरामर्शेन अतादृशधर्मोऽपि भासते इत्यतः विशेषधर्मभानप्रयोजके असति सतीति पूर्वनियमः सङ्कोच्यः इति न तादृशानुमितेः अनुपपत्तिः। तदुक्तम्– **"इतरबाधानन्तरं यत्र सामान्यतो दृष्टं प्रवर्तते तत्राष्टद्रव्यानाश्रितत्वं पक्षविशेषणं सिद्धमादाय..... अष्टद्रव्यातिरिक्तद्रव्याश्रितत्वमनादाय न पर्यवस्यतीति.... अन्वयिनः एव तत्सिद्धेः"**[1] इति।

**श्रुत्यैव वायुसंज्ञासिद्धिरिति व्यवस्थापनम्–** अथ परिशेषानुमानेन स्पर्शः पृथिव्याद्यष्टद्रव्यातिरिक्तद्रव्याश्रितः इत्येवानुमितिः जायते न वाय्वाश्रितः इति। अतः सिद्ध्यमानमष्टातिरिक्तद्रव्यं वायुरेवेति निर्णयः कथं भवतीत्याशङ्कायां वैशेषिकसूत्रकाराः श्रुत्यैव तत्सिद्धिरिति व्यवस्थामाविष्चक्रुः। यथा **"तस्मादागमिकम्"**[2] इति। इदमत्र तात्पर्यमवसेयम्– यत् सामान्यतः अष्टातिरिक्तद्रव्यसिद्धौ सत्यां तदेव द्रव्यं वायुशब्द-वाच्यमिति समन्वयकरणाय वायु इति संज्ञा प्रमाणसिद्धापेक्ष्यते। वायुसंज्ञायां प्रमाणान्वेषणे परमाप्तपुरुषपरमेश्वरप्रणीतत्वेन सिद्धप्रमाणभाववता वेदेन वायुसंज्ञा प्रसिद्ध्यतीति प्रकाशितं सूत्रकारैः। ततः वायुरिति शब्देन प्रोच्यते यद्द्रव्यं तदेव स्पर्शानुमिताष्टातिरिक्तद्रव्यं

1. वैशेषिकसूत्रोपस्कारः/पृष्ठसंख्या–138
2. वैशेषिकसूत्रम्–2/11/17

भवतीत्याकलय्य स्पर्शवान् वायुरिति वायुत्वेन रूपेण वायौ स्पर्शादयः अध्यवसेयाः। पूर्वसूत्रार्थः इत्थं वर्णनीयः यस्माद्विशेषाकारेण स्पर्शः वाय्वाश्रितः इत्येवमनुमितिः न जायते तस्माद् वायुरिति नाम आगमिकं–आगमसिद्धं भवति। आगमप्रसिद्धसंज्ञामादाय पूर्वोक्तदिशा निर्णयः प्राप्यः इति भावः।

**इदमत्राकूतम्–** **"वायव्यं श्वेतं छागमालभेत"**[1] इति विधौ आलभिधातोः लक्षणया यागः अर्थः। तेन विधिना वायुदेवताकश्वेतपशुद्रव्यकयागः बोध्यते। यथा– वायुदेवता क्षिप्रगामिनी तथैवानेन यागेन विहितं फलं शीघ्रमवाप्यते इत्येवं विधीयमानयागप्राशस्त्यबोधनाय **"वायुर्वै क्षेपिष्ठा देवता"**[2] इत्यर्थवादः तत्प्रकरणे पठितः वर्तते। विधीयमानकर्मप्राशस्त्यसमर्पकाः केचनार्थवादाः भवन्ति। शास्त्रे यत्र यत्र पदानां सन्देहादिवशात् शक्तिनिर्धारणे क्लेशः अनुभूयते तत्र तत्र श्रुतौ विधिशेषभूतार्थवादाः आम्नायन्ते तैः पदानां शक्तिनिर्णयः भवति। यथा– **"स्वर्गकामो यजेत"**[3] इति विधिना स्वर्गकामोद्देशेन यागः विहितः। परन्तु यावत्स्वर्गपदार्थः न ज्ञायते तावन्न कश्चिद् यागे प्रवर्तते। स्वर्गप्रसिद्ध्यर्थम् इत्थमर्थवादः पठितः–

**यन्न दुःखेन सम्भिन्नं न च ग्रस्तमनन्तरम्।**
**अभिलाषोपनीतञ्च तत्सुखं स्वःपदास्पदम्।।**[4] इति।

अनेनार्थवादेन न केवलं स्वर्गपदार्थः सुखविशेषः प्रसिद्ध्यति स्वर्गसंज्ञापि प्रसिद्धा भवति। तत्तुल्यरीत्या **"वायुर्वै क्षेपिष्ठा देवता"**, **"वायुश्च सर्ववर्णोऽयं सर्वगन्धवहः शुचिः"**[5] इत्यादि श्रुतिपठितार्थवादैः वायुसंज्ञा सिद्धा भवति।

अथ श्रुत्या यद्यपि वायुसंज्ञा सिद्धा भवति तथापि तत्पदवाच्यं स्पर्शानुमिताष्टातिरिक्तद्रव्यमेवेति कथं ज्ञातुं शक्यते इति चेदुच्यते– पूर्वोक्तश्रुतिभिः वायुः सदागतिस्वभाववानिति ज्ञायते। ततः इतरबाधसहकृतानुमानेन स्पर्शाश्रयः रूपशून्यः गतिमान् द्रव्यविशेषः इति अनुमीयते। ततः तद्द्रव्यं वायुपदवाच्यमिति सुतरां निर्णेतुं शक्यते। इदमुपलक्षणं पृथिव्यादिसकलसंज्ञामूलं वेदः एवेति बोध्यम्।

**निगमनम्–** श्रुतितः वायुसंज्ञामात्रं सिद्ध्यति। वायुः प्रसिद्धपृथिव्याद्यपेक्षया विलक्षणः विलक्षणगुणक्रियासम्पन्नत्वादिति तद्द्रव्यस्य विशेषस्वरूपप्रमितिः वैशेषिकानां सुविचारप्रभवयुक्तिभिः एव प्राप्यते। तस्मात् सत्तर्कैः पदार्थतत्वविवेचकवैशेषिकशास्त्रस्य

1. तैत्तिरीयसंहिता–2/1/1
2. तैत्तिरीयसंहिता–2/1/1
3. तैत्तिरीयसंहिता–2/1/5
4 बहुषु शास्त्रेषु अस्योद्धरणमुपलभ्यते। परन्तु कस्मादुद्धृतमिति मूलं न प्राप्यते।
5. अस्यापि वाक्यस्य मूलं न प्राप्यते।

महानुपकारः शास्त्रसम्प्रदाये वर्तते इति न्यायादिविद्यया पदार्थतत्वाधिगन्तारः युक्तिप्रियाः विद्वांसः अवगच्छन्तु इति शम्।

**शोधप्रबन्धलेखनाय परामृष्टग्रन्थानां सूची-**


1. वैशेषिकसूत्रम्–श्रीमत् कणादमहर्षिप्रणीतम्।
2. वैशेषिकसूत्रोपस्कारः, श्रीमच्छङ्करमिश्राचार्यकृतः। सम्पादकः– श्रीढुण्ढिराजशास्त्री। प्रकाशकः– चौखम्भासंस्कृतसंस्थानम्/2007
3. प्रशस्तपादभाष्यम्– श्रीमत्प्रशस्तपादाचार्यप्रणीतम्।
4. न्यायकन्दली- कर्त्ता–श्रीधराचार्यः / सम्पादकः –श्रीदुर्गाधरझा/ प्रकाशकः– सम्पूर्णानन्दसंस्कृतविश्वविद्यालयः, वाराणसी। 1997
5. न्यायसिद्धान्तमुक्तावली– प्रभामञ्जूषासहिता/सम्पादकः–श्रीशङ्कररामशास्त्री/ प्रकाशकः–चौखम्भासंस्कृतप्रतिष्ठानम्, नई दिल्ली। 1988
6. न्यायसिद्धान्तमुक्तावली– दिनकरीरामरूद्रीसहिता / सम्पादकः– श्रीआत्मरामशर्मा/ प्रकाशकः–राष्ट्रियसंस्कृतसंस्थानम्, नई दिल्ली। 2012
7. न्यायप्रकाशः/कर्त्ता– श्रीमदापदेवः/सम्पादकः तथा सारविवेचनीनामक-व्याख्याकारः– पण्डितश्री चिन्नस्वामीशास्त्री/प्रकाशकः–चौखम्भासंस्कृत-संस्थानम्, वाराणसी/2008
8. मीमांसोद्धरणकोशः/कर्त्ता–श्री धन्नालाल अग्रवालः/प्रकाशकः–वैदिकसंशोधन-मण्डल, पुणे/1986


✦✦✦

 ISSN : 0975-1769

# विदुषां श्रीभाष्यं विजयसारथिवर्याणाम् आधुनिकसंस्कृतसाहित्यं प्रति योगदानम्

**-डॉ. के. वरलक्ष्मीः**
उपनिदेशिका, संस्कृत अकाडमी
उस्मानिया विश्वविद्यालयः, हैदराबाद्

**[ अस्मिन् लेखे विजयसारथिवर्याणां साहित्यरचना, तेषां वैशिष्ट्यम्, कृतिषु छन्दोलङ्कारव्याकरणप्रयोगाणां विशेषता च उपवर्णिताः ]**

**कूटपदानिः** मन्दाकिनी रोचिष्मती ज्योतिष्मती शारदापदकिङ्किणी भारतभारती मनोरमा सीसम्' 'आटवेलदि' 'तेटगीति' 'उत्पलमाला–चम्पकमाला–मत्तेभविक्रीडिता

**शोधप्रबन्धसारः**- सकलशास्त्रपारङ्गतः विदुषां श्रीभाष्यं विजयसारथिवर्यः नैकानि वैदुष्यपूर्णानि संस्कृतकाव्यानि व्यरचयत्। युगकर्त्ता युगोद्धर्ता चक्रवर्ती युगस्य च। सरस्वतीसुतोत्तंसः जीयाद् विजयसारथीः॥ इति तर्कवागीशभट्टाचार्याणां प्रशंसापात्रतां गतोयं कविपण्डितः तेलुगुभाषासाहित्यरचनाप्रक्रियासु तेलुगुसाहित्यच्छन्दःप्रक्रियासु च संस्कृतकाव्यानि रचयित्वा आधुनिकसंस्कृतसाहित्यं प्रति भूरिशः योगदानम् अकरोत्। विशिष्टव्याकरणप्रक्रियाभिः सहृदयहृदयावर्जकानि काव्यानि रचयित्वा

**परिचयः**- **'अपारे काव्यसंसारे कविरेव प्रजापतिः। यथा वै रोचते विश्वं तथेदं परिवर्त्तते'।**[1] इति पुराणवाङ्मयं कवेः प्राशस्त्यं स्तौति। आदिकविः वाल्मीकिः रामायणेतिहासमहाकाव्यं रचयित्वा काव्यरचनापरम्परायाः प्रवर्त्तकोऽभूत्। सा च परम्परा व्यासमहर्षिणा लिखितेन महाभारतेतिहासकाव्येन विस्तारिता किल। कालिदासादयः महाकवयः पञ्चमहाकाव्यानि विलिख्य काव्यजगत् रसमयं ह्लादैकमयञ्च अकुर्वन्। सा च कविपरम्परा अविच्छिन्नतया सम्प्रत्यपि प्रवर्त्तते। आधुनिकभारते क्षीणदशाम् आपन्नां संस्कृतकाव्यसृष्टिपरम्पराम् अङ्गुलिगणनीयाः कवितल्लजाः उज्जीवयन्ति। तादृशेषु विरलेषु तेलङ्गाणराष्ट्रियेषु कविपण्डितेषु अग्रणीः वर्त्तते कविवरेण्यः पण्डितल्लजश्च श्रीभाष्यं विजयसारथिवर्यः। प्रादेशिकभाषारीतिं छन्दोप्रकारान् रचनाशैलीञ्च आदृत्य विनूत्नसंस्कृतकाव्यरचनासम्प्रदायप्रवर्त्तकेषु

1. अग्निपुराणम्–339.10

अन्यतमोऽभवत्।

**'करीण्णगर'**जनपदस्य **'चेगुर्ति'**ग्रामे लब्धजन्मा **'शारदापदकिङ्किणीं' 'शबरीपरिदेवनं' 'मनोरमा'** इत्याख्यां नवलां व्यरचयत्। **'मन्दाकिनी'** इति गीतिकाव्यं **'भारतभारती'**ति गीतात्मिकां कृतिं **'रासकेली'** इति नृत्यरूपकं **'रोचिष्मती' 'ज्योतिष्मती'** चेति खण्डकाव्यसङ्कलनद्वयं **'सङ्गीतमाधवञ्चे'**ति मुद्रणे अनीताः कृतीः अमुद्रिताः नैकाः अपराः कृतीश्च विलिख्य कविरयं मूर्धस्थानम् अलञ्चकार। प्रतिभाविशेषसम्पन्नोऽयं कविः आधुनिकसंस्कृतसाहित्यं प्रति महत्त्वपूर्णं योगदानम् अकरोत्।

**न स शब्दो न तद्वाच्यं न स न्यायो न सा कला।**
**जायते यन्न काव्याङ्गमहो भारो महान् कवेः॥**[1]

इति उक्तिः श्रीभाष्यं विजयसारथिवर्याणां कृतिषु दरीदृश्यते। व्याकरणवेदान्तागमतन्त्रशास्त्रालङ्कारसाहित्यशास्त्रवित् कविरयं सर्वासु कृतिषु सकलशास्त्रपरिज्ञानं प्रदर्शयति येन सहृदयपाठकः नैकशास्त्रपरिज्ञानम् अवाप्नोति। छन्दोवैशिष्ट्यं अलङ्कारचारुता गुणवैशिष्ट्यं व्याकरणशास्त्रपाण्डितीत्यादयः कविप्रतिभानिकषोपलायिताः विशेषाः सोदाहरणं प्रस्तूयन्ते।

**1. छन्दोवैशिष्ट्यम्**- **'ज्योतिष्मती'** नामिकायां संस्कृतखण्डिकाः **'उदाहरणं'** नामके छन्दसि उपनिबद्धाः यच्च तेलुगुभाषासाहित्यकाराः प्रयुञ्जते। तेलुगुभाषासाहित्यसम्बद्धानि **'सीसम्' 'आटवेलदि' 'तेटगीति' 'उत्पलमाला-चम्पकमाला-मत्तेभविक्रीडिता'**दीनि छन्दांसि सकुशलं प्रयुज्य संस्कृतक्षेत्रे नूत्नसम्प्रदायप्रवर्त्तकोऽभूत् कवितल्लजः।

तेलुगुभाषासाहित्यसम्बद्धैः **'सीसपद्या'**दिच्छन्दोप्रकारैः **'भारतभारती'** नामकं काव्यं व्यरचयत्। **'सीस'**मिति छन्दः मात्राच्छन्दः भवति यत्र पादद्वयं भवति। प्रथमे दीर्घे पादे सीसनामकं छन्दः प्रयुज्यते। द्वितीये **'आटवेलदि'** अथवा **'तेटगीति'** नामकं छन्दश्च प्रयुज्येते। अपिच वैदिकसूक्तशैलीमादृत्य गीतिकाव्यानि व्यरचयदयं कविः। सुप्रभातादीनां स्तोत्राणां रचनानुकूलं 'शार्दूलविक्रीडितं' 'भुजङ्गप्रयातं' 'वसन्ततिलकाम्' अन्यानि च छन्दांसि रचनासु प्रयुक्तानि। 'मुक्तासराभिधं' 'मालिकाभिधम्' अन्यानि च छन्दांसि तेषु तेषु खण्डकाव्येषु प्रयुक्तानि। कानिचन उदाहरणानि प्रस्तूयन्ते।

**1.1 शार्दूलविक्रीडितम्** - **'सूर्याश्वैर्मसजस्तताः सगुरवः शार्दूल-**

---

1. काव्यालङ्कारः - 5.4

**विक्रीडितम्'।**[1] इति लक्षणोपेते शार्दूलविक्रीडितच्छन्दसि गुम्फितोयं श्लोकः करीण्णगरजनपदप्रशस्तिं प्रस्तौति।

> **'श्रीगोदातटिनीतटीजनपदेष्वद्यापि बोङ्कूरुवद्**
> **ग्रामोपान्ततलेषु धूलिकटकोत्खातेषु लब्धा इमे।**
> **चारित्रांशुपुरावशेषविषयास्साक्षीभवन्ति स्वयं**
> **लोकश्लोकितशातवाहनमहाराजन्य कीर्तिच्छवेः॥**[2]

**1.2 भुजङ्गप्रयातम्- 'भुजङ्गप्रयातं भवेद्यैश्चतुर्भिः'।**[3] इति लक्षणयुक्ते भुजङ्गप्रयाते च्छन्दसि ग्रथितोऽपरः श्लोकः प्रस्तूयते।

> **दुराचारनिघ्नान् पराक्षेपभुग्नान् दुराक्रान्तिमग्नान् मतोन्मादरुग्णान्।**
> **परद्वेषशुक्तान् प्रलोभानुरक्तान् बहिष्कुर्महे हिन्दुविद्रोहसक्तान्॥**[4]

**1.3 वसन्ततिलका- 'उक्ता वसन्ततिलका तभजाजगौगः।**[5] इति लक्षणसमन्वितं वसन्तलिकाच्छन्दसि रचितमिदं पद्यं सहृदयचेतांसि नूनं हरति। सुमनोहरशैल्या कविः श्रीमल्लिकार्जुनसुप्रभाते प्रकृतिरमणीयतां गायति।

> **'घोरान्धकाररजनीचरवारणाय कालेश्वरप्रहितमुष्णमरीचिबिम्बम्।**
> **आग्नेयमस्त्रमिव पूर्वगिरौ विभाति श्रीमल्लिकार्जुन विभो तव सुप्रभातम्'॥**[6]

**1.4** कविः केषुचेत् खण्डकाव्येषु विनूत्नप्रयोगमकरोत्। प्रतिपादमादौ पञ्चदश लघूनि भवन्ति ततो गुरुद्वयञ्च भवति अस्मिन् गीते।

> **'कलिशमन यमदमनहृदयपुटशायिन्**
> **अहिमकरकुलतिलक विबुधविनताङ्घ्रे**
> **मणिमकुटरुचिनिचितनिटलतटभासिन्**
> **रघुतनय वस हृदयकमल पुटभागे'॥**[7]

**1.5 मुक्तासरश्छन्दः-** आधुनिकान्ध्रकविताप्रक्रियायां **'मुक्तासराभिधं'** मात्राछन्दो मात्रायां प्रचुरं प्रचारं प्राप्तमस्ति यत्र क्रमशः तिस्रश्चतस्रश्च मात्रा भवन्ति। प्रतिपादं नियतं चतुर्दश मात्रा भवन्ति। अस्मिन् च्छन्दसि विद्वत्तल्लजोयं परमेश्वरं स्तौति।

---

1. वृ.र. 3.101
2. रोचिष्मती-करिण्णगरप्रशस्तिः
3. वत्तरत्नाकर 3.55
4. रोचिष्मती-सार्वभौमहिन्दूप्रतिज्ञा. 7
5. वत्तरत्नाकरः 3.79
6. रोचिष्मती-श्रीशैलमल्लिकार्जुनसुप्रभातम्. 6
7. रोचिष्मती-जानपदगीतानि. 2

**'त्रिपुरघस्मर लसदहस्करकोटिभास्वर गिरि विकस्वर।**
**शमनजित्वर स्वयमुदित्वर धूर्जटे शिपिविष्ट जयजय'॥**[1]

**1.6 जानपदगीतम्**- तेलुगुभाषायां जानपदगीतानां सुप्रसिद्धशैली वर्त्तते। तां शैलीम् अनुसृत्य द्रुतगतीनि जानपदगीतानि चारुतया कविकेसरिणा रचितानि।

**'अमलकमलदलविशालदृगभिराम हृदभिराम**
**चटुलकुटिलशठनिशाटकुलविराम सुरललाम**
**परशुराममदविराम मिहिरवंशजलधिसोम**
**परमपुरुष रामचन्द्र पाहि पाहि राण्महेन्द्र'।**[2]

1.7 पदकेलीविलासपरकोपरश्लोकः कविवर्णनाचातुरीं शास्त्रनिपुणतां प्रयोगकुशलताञ्च द्योतयति। अस्मिन् श्लोके प्रतिपादमादौ पञ्चदश लघूनि भवन्ति ततो गुरुद्वयञ्च भवति।

**'मधुमधुररसभरितचरितमुरुमूर्तिं**
**खरनखरशिखरपरिदलितदितिसूनुम्**
**धृतकनकमयवसन मदितिसुतपालं**
**जप परमपुरुषमतिसुरमनुजलीलम्'॥**[3]

श्लोकेऽस्मिन् शब्दालङ्कारार्थालङ्कारयोः सौन्दर्यं दरीदृश्यते। दीर्घसमासप्रयोगोपि संलक्ष्यते।

**1.8 मालिका प्रक्रिया**- 'मालिका'भिधाना आन्ध्रकविताप्रक्रिया आन्ध्रेतरेषां विदुषां संस्तवाय तदीययैव मर्यादया संस्कृतभारतीमुपासीनानां सुमनसाम् उपहाराय शिवताण्डवं रामायणमालिकां श्रीगुरुमालिकां श्रीशारदासाक्षात्कारञ्च कविः विजयसारथिः आविष्करोति।

**'ललितस्पन्दाङ्गहारस्फुरत्सुभ्रूचाप**
**कनीनिकाप्रतिफलद्‌गौरीपरीहास सं**
**पूर्णानङ्गकलाविलाससुषमासीमायितालोक**
**निर्ह्लादस्वादुतराट्टहास-धरिमाधाराधरोष्ठ...'**[4]

**2. अलङ्कारचारुता** - अस्य कविवरेण्यस्य कवित्वं अनुप्रासादिसर्वालङ्कारभूषितं श्रवणपेयं भवति। छेकानुप्रासलाटानुप्रासादिभिः शब्दालङ्कारैः उपमोत्प्रेक्षरूपकादिभिः

---

1. रोचिष्मती-आवेदनम्. 53
2. रोचिष्मती-संस्कृतजानपदगीतम्. 9
3. रोचिष्मती- जानपदगीतम्. 6
4. रोचिष्मती- मालिका पृ.सं. 88

अर्थालङ्कारैश्च कविः काव्यानि अलङ्करोति।

**2.1 शब्दालङ्काररमणीयता–** छेकानुप्राससमन्वितश्श्लोकः उदाह्रियते। नि इति अक्षरं सर्वेषु पादेषु लक्ष्यते।

**'कारुण्यपूर्णानि कान्तिसङ्कीर्णानि**
**धनधान्यकेन्द्राणि दातृतासान्द्राणि**
**सुखशान्तिकलितानि सौन्दर्यललितानि**
**मनुमतोपेतानि घनतानपेतानि...'**[1]

**2.2 उपमालङ्कारः-** कविः उपामालङ्कारं प्रयुज्य रतीदेवीं वर्णयति। **'उपामानोपमेययोः साधर्म्ये भेदाभेदतुल्यत्वे उपमा'।।**[2] इति उपामालक्षणमनुसृत्य श्लोकोयं ग्रथितः।

**'वनसुन्दरीव मधुदेवपुनरागमे नूत्नशोभावती**
**कुसुमस्मिता बभौ स्वपतिपुनरागमे रतिसुन्दरी सापि....'**[3]

इत्यस्मिन् श्लोके रतिसुन्दरी उपमेयं वनसुन्दरी उपमानम् इव उपमावाचकं नूत्नशोभा नामकः साधारणधर्मश्च लक्ष्यन्ते।

**2.3 उत्प्रेक्षालङ्कार - 'अध्यवसाये व्यापारप्राधान्ये उत्प्रेक्षा'।।**[4] इति लक्षणोपेतः उत्प्रेक्षालङ्कारमण्डितोऽपरः श्लोकः उदाह्रियते।

**'सन्ध्यारुणार्चिरुदयाचलहोमकुण्डे**
**पूषा जुहोति तुहिनांशुकरान् हवींषि**
**द्यौरर्कतेजसि करोत्युडुलाजहोमम्**
**इल्लन्दकुण्ट रघुनन्दन सुप्रभातम्'।।**[5]

उदयाचले होमकुण्डस्य आरोपः कृतः। नक्षत्रेषु लाजात्वम् आरोपितम्। **'अभेदप्राधान्ये आरोपे आरोपविषयानपह्नवे रूपकम्'।**[6] इति रूपकालङ्कारलक्षणमत्र अन्वेति। अतः एषु वर्णनेषु रूपकालङ्कारः दृश्यते। द्यौः होमम् जुहोतीति उत्प्रेक्षालङ्कारोपि लक्ष्यते।

---

1. मन्दाकिनी– पृ.सं. 44
2. अलङ्कारसर्वस्वम्. 12
3. भारतभारती-कल्याणकामः- पृ.सं.120
4. अलङ्कारसर्वस्वम्. 22
5. इल्लन्दुकुण्टश्रीरामचन्द्रसुप्रभातम्.13
6. अलङ्कारसर्वस्वम्. 16

**3. गुणगरिमा**- प्रसादमाधुर्यौजोगुणभरिता विजयसारथिकविशिखामणिकविता सहृदयजनमनांसि नूनमावर्जयतीति निश्चप्रचम्। रसोत्कर्षहेतुभूतः ओजोगुण एव नैकेषु काव्येषु दरीदृश्यते। दीर्घसमस्तपदगुम्फितपद्यरचना रसोत्कर्षानुकूला चेति अवगम्यते। तथापि नातिदीर्घसमस्तपदानि प्रयुज्य प्रसादमाधुर्यगुणोपेतकाव्यान्यपि कविः व्यरचयत्। ओजोगुणसमन्वितं राष्ट्रसूक्तं कवितल्लजस्य विजयसारथिवर्यस्य काव्य-कौशलम् प्रमाणयति।

**'फालतलसिन्दूरतिलका वेष्टनाञ्चितकर्णनासाः।**
**अंशुकेनाबद्धमध्याः काचकङ्कणकालितहस्ताः'**॥[1]

ललितकोमलपदयुक्तैः प्रसादमाधुर्यगुणोपेतैः श्लोकैः कानिचन काव्यानि रचयित्वा पाठकहृदयानि आवर्जयति कविः।

**4. व्याकरणप्रयोगवैशिष्ट्यम्**– सकलशास्त्रपारङ्गतोयं कविः तद्धितान्त-पदप्रयोगैः यङ्लुगन्तप्रयोगैः नामधातुप्रयोगैश्च स्वव्याकरणशास्त्रवैदुष्यं प्रकटयामास श्रीभाष्यं विजयसारथिवर्यः।

**4.1 विभक्तिप्रयोगाः**– सप्तसु विभक्तिषु विद्यमानैः पदैः श्लोकान् गुम्फति संस्कृतभाषावैशिष्ट्यञ्च प्रदर्शयति कविः।

प्रथमाविभक्तिः– **'नृपभगीरथकथितसागरोदिता च नृपभगीरथविदितनर-लोकबाधा च नृपभगीरथविनुतनवनीतहृदया च नृपभगीरथमित्रसागरोत्सुकिता च'**।[2]

द्वितीयाविभक्तिः– द्वितीयाविभक्तिरूपाणि प्रयुज्य लोके विद्यमानान् श्रमजीविनः वर्णयित्वा श्रामिकवर्गं प्रति विद्यमानं गौरवं प्रकटयति कविः।

**'मालिकान् लेपकान् वर्धकीन् सौचिकान् शौल्बिकान् नापितान् तन्तुवायानपि। कुम्भकारान् चित्रकारान् कलादांश्च .....अमृतं प्रदाय कल्लोपाणिभीरञ्जयन्ती याति मन्दाकिनी'**॥[3]

तृतीयाविभक्तिः– **'सलिलेन विमलेन मानोज्ञकं वहति अमृतेन मधुरेण .....स्त्रोतसा भूयसा प्रैयरूपकमेति'**।[4]

सप्तमीविभक्तिः– **'धाटीषु पुण्यपरिपाटीषु वात्सल्यवाटीषु सौहार्दपेटीषु**

---

1. भारतभारती-राष्ट्रसूक्तम्-पुं. 94
2. मन्दाकिनी– पृ.सं. 16
3. मन्दाकिनी– पृ.सं. 47
4. मन्दाकिनी पृ.सं. 48

**धुतपापकोटीषु वीररसमूर्तिरिव मन्दाकिनी सम्पनीपद्यते सर्वात्मना'।।**[1]

**4.2 तद्धितप्रयोगविशेषाः- इमनिच् प्रत्ययः- 'पृथ्वादिभ्य इमनिज्वा'। 'र ऋतो हलादेर्लघोः'। वर्णदृढादिभ्यः ष्यञ् च।**[2] इत्यादिसूत्रैः इमनिच्प्रत्ययविधिः पाणिनिना विवृतः। विद्वत्तल्लजः विजयसारथिवर्यः व्याकरणवैदुष्यपटिम्ना इमनिच् प्रत्ययान्तरूपाणि प्रयुज्य पाठकमनांसि रञ्जयति।

**'द्रढिमानमुपयाति युवजनोत्कलिकेव निम्नजनवाञ्छेव लघिमानमनुयाति प्रथिमानमन्वेति मौनिजनसंविदिव सत्कविप्रतिभेव महिमानमाप्नोति पटिमानमाप्नोति पण्डितप्रज्ञेव करूणालुसंविदिव म्रदिमानमुपयाति अभिसरति सागरं मन्दाकिनी...'**[3]

**4.3 यङ्न्तक्रियापदप्रयोगः–** पनीपद्यते पनीपत्यते दोद्रूयते पोप्लूयते नरीनृत्यते वरीवृत्यते मोमुद्यते लालस्यते जंहम्यते दन्द्रम्यते विलालस्यते दोद्रूयते सोस्त्रूयते बम्भ्रम्यते रंरम्यते पोप्लूयते इत्येषः यङ्न्तधातुप्रयोगः बहुधा कविना प्रयुक्तः।

धर्माधिदेवता **रंरम्यते** कर्माधिदेवता **बंभ्रम्यते**। औदार्यदेवता **सम्पद्यते** सौन्दर्यदेवता **लालस्यते**। .....वीररसमूर्तिरिव मन्दाकिनी **सम्पनीपद्यते** सर्वात्मन।।[4]

**'सनाद्यन्ताः धातवः'। 'अनुदात्तङित आत्मनेपदम्। चरफलोश्च'। 'उत्परस्यातः'। 'हलि च'। 'कर्त्तरि शप्'।**[5] इत्येतैः सूत्रैः चञ्चूर्यते इति यङ्न्तरूपं सिद्ध्यति। **'रीगृदुपधस्य'।**[6] इति सूत्रेण नृत् धातोः यङ्न्तरूपं सिद्ध्यति।

**4.4 नामधातुप्रयोगाः–** नामधातुप्रयोगेन कविताचारुतां सम्पादयति कविः।

**'स्रोतांसि गगनन्ति सुरलोकसरितोऽपि चलदूर्मिगुल्मानि शरदम्बुवाहन्ति सोमन्ति मुग्धानि हेमारविन्दानि अर्बुदा न्यम्भसा बुद्‌बुदा स्तारन्ति वेल्लदरविन्दनीवल्लिकाश्शम्पन्ति अंहसां विलयन्ति रंहसां निलयन्ति स्वादुतरपाथांसि स्वर्णदीस्रोतांसि।।**[7] **'सनाद्यन्ताः धातवः'– 'सर्वप्रातिपदिकेभ्यो क्विब्वा वक्तव्यः। 'शेषात् कर्तरि परस्मैपदम्'।**[8] इत्यादिसूत्रैः नामधातुसिद्धिः जायते।– गगन– क्विप्– तिङ्ग्– गगनति। तद्वत् शेषधातवः सिद्ध्यन्तीति ऊह्यम्।

---

1. मन्दाकीनी– पृ.सं. 59
2. पा.सू. 5.1.122, 6.4.161, 5.1.123
3. मन्दाकिनी– पृ.सं. 68
4. मन्दाकिनी– पृ.सं. 59
5. अष्टाध्यायी सू.पा. 3.1.32, 1.3.12, 7.4.87, 7.4.88, 8.2.77, 3.1.68
6. अष्टाध्यायी सू. 7.4.90
7. मन्दाकिनी– पृं.सं. 16
8. अष्टाध्यायी सू.पा. 3.1.32, 3.1.32, 1.3.78

**उपसंहारः- 'काव्यन्तु जायते जातु कस्यचित् प्रतिभावतः'।**[1] इति काव्यालङ्कारकर्तुः भामहोक्तिः श्रीभाष्यं विजयसारथिकविकृतीः पठितवतां सहृदयानां मनसि नूनं स्फुरत्येव। **'युगकर्त्ता युगोद्धर्ता चक्रवर्ती युगस्य च। सरस्वतीसुतोत्तंसः जीयाद् विजयसारथीः'**॥ इति तर्कवागीशभट्टाचार्यैः भूरिशः प्रशंसिताः कवितल्ल्जाः विजयसारथिवर्याः **'काव्यं यशसे'** इति प्रयोजनसिद्धिम् अवाप्नुवन्। षट्काव्यप्रयोजन-साधकः कविवरेण्यः श्रीभाष्यं विजयसारथिवर्यः संस्कृतजगतः मूर्धस्थानम् अलङ्कृत्य संस्कृतसाहितीसौरभं वितनोति। महाविद्यालयसंस्कृतपठ्यपुस्तकेषु श्रीभाष्यं विजयसारथिवर्याणां संस्कृतरचनाः अद्यापि स्थानं प्राप्य संस्कृतच्छात्रेभ्यः कान्तासम्मिततयोपदेशयुजे इति प्रयोजनं कल्पयन्ति।

**सन्दर्भग्रन्थाः**


1. श्रीभाष्यंविजयसारथिः मन्दाकिनी प्रकाशकः सर्ववैदिकसंस्थानम्, करिण्णगरम्, तेलङ्गानाराज्यम्
2. भारतभारती– तेनैव कविना रचितम्
3. रासकेली- तेनैव कविना रचितम्
4. रोचिष्मती- तेनैव कविना रचितम्
5. केदारभट्टः वृत्तरत्नाकरः, भारतीयप्रकाशन, वाराणसी
6. मम्मटः, काव्यप्रकाशः–भारतीयविद्याप्रकाशन, दिल्ली
7. रुय्यकः, अलङ्कारसर्वस्वम्– तेलुगु अनुवादः- मुद्रणम् श्रीमती मरिङ्गण्टि सुशीला
8. श्रीरव्वाश्रीहरिः, पाणिनीयाष्टाध्यायी– तेलुगु अनुवादः, तेलुगु अकाडमी, हैदराबाद्
9. चक्रधरनौटियाल्– बृहदनुवादचन्द्रिका–मोतीलाल बनारसीदास, वाराणसी
10. पुष्पादीक्षत्, अष्टाध्यायी सहजबोध द्वितीय भागः–प्रतिभाप्रकाशन दिल्ली


✦✦✦

1. काव्यालङ्कारः 1.5

संस्कृत-विमर्शः 2020 ( अङ्कः 18 ) ISSN : 0975-1769

# श्रीमद्भगवद्गीता में मनोविज्ञान के तत्त्व

-सुधाकर कुमार पाण्डेय
शोधच्छात्र, वेद विभाग
केन्द्रीय संस्कृत विश्वविद्यालय, नई दिल्ली

**[ भगवद्गीतायां समाजसंबद्धाः नैके विषयाः उपवर्णिताः सन्ति। अस्मिन् लेखे भगवद्गीतायां मनसः कीदृशं स्वरूपं विद्यते, तस्य निग्रहः इत्यादिविषयाः सम्यक् निरूपिताः ]**

मनुष्य के संघटन में उपयोग में लाये हुए सभी, तमाम तत्वों में मन तत्व का बहुत महत्व है। मन को एक तत्व, मानें या सृष्टि के पदार्थों को ग्रहण करने का शरीर का साधन इन्द्रिय माने, उससे मूल रूप में बहुत फर्क नहीं पड़ता। ऊपर की दृष्टि में से जिस भी दृष्टि से देखने से मन का महत्व किसी प्रकार से कम नहीं होता है।

इन्द्रियों से ग्रहण किये हुए ज्ञान पर विचार करना मन का मुख्य काम है। मुख से खाया हुआ अन्न जब तक होजरी में जाकर पच नहीं जाता तब तक अनाज खाने से मनुष्य में जो शक्ति आनी चाहिए वह नहीं आती। मन का भी उस तरह है। इन्द्रिय से ग्रहण किये हुए विषयों पर जब तक मन, संकल्प-विकल्प विचार करता नहीं है तब तक उस पदार्थ का सही ज्ञान नहीं होता है।

इस दुनियाँ में कोई भी वस्तु-पदार्थ स्वभाव से (By it Nature) सुखदायक या दु:खदायक नहीं है परन्तु उस वस्तु के संबंध में जन जैसा और जितना विचार करता है उतने हद तक ही, उस विचार करने वाले व्यक्ति को सुख या दु:ख होता है। अफीम जहरीली चीज हैं। वह खाने से सामान्य मनुष्य के प्राण जाते हैं फिर भी व्यसनी मनुष्य को वह सुखदायक लगता हैं। व्यसनी व्यक्ति उसे अपने सुख का साधन मानता हैं।

मन की कितनी अद्‌भुत शक्ति है उसके लिये श्रीमद्‌भगवद्‌गीता से अधिक (Effective) सचोट उदाहरण शायद ही कहीं मिले। श्रीमद्‌भगवद्‌गीता के पहले अध्याय में भगवान् वेदव्यास ने युद्धभुमि का वर्णन किया है। लड़ने को तैयार दोनों पक्ष युद्धभूमि में आमने-सामने खड़े हैं। ऐसे समय में सेनानायक का

गुस्सा और जोश किस प्रकार का होता है उसका प्रत्येक व्यक्ति ख्याल कर सकता हैं पहले अध्याय की शुरुआत में और विशेष रूप में 21-23 के श्लोक में वर्णित अर्जुन की स्थिति से समझ में आता है कि अर्जुन में भी वैसा उत्साह प्रकटित हो रहा था। अर्जुन का मन लड़ने के लिये-विजयी होने को, कौरवों का संहार करने को तत्पर हो रहा था।

अर्जुन का रथ भगवान श्रीकृष्ण आगे करते है, और अर्जुन अपने आचार्यो का सगे सम्बन्धियों को, कौरवों को देखते है, देखते ही उसकी मानसिक स्थिति में बदलाव होता है। यह बदलाव, मानसिक बदलाव होने से अर्जुन की स्थिति कितनी बदल जाती है उसका वर्णन पहले अध्ययन के आखिरी श्लोकों में दिया है। अर्जुन बिल्कुल विषादग्रस्त, शोकातुर हो जाता है।

युद्ध के प्रति अर्जुन का रूक्ष पहले कैसा था? युद्ध अर्जुन के लिये सुख का साधन था। इस युद्ध से दुष्ट कौरवों का संहार करके अपना राज्य वापस पाने की अर्जुन आशा रखते थे। इस युद्ध से सती द्रौपदी पर हुए घोर अपमान और अन्याय का बदला लेना था। युद्ध के प्रति जब तक अर्जुन का ऐसा रुख था तब तक युद्ध उसके लिए आनन्ददायक, सुख का साधन था। पहले अध्याय में वर्णित शंखनाद और सिंहनाद अर्जुन के योद्धाओं के आंतरिक आनन्द की बाह्य प्रतिध्वनि थी। वह भी एक प्रकार की मन की स्थिति, एक दृष्टिबिन्दु था।

इस स्थिति को बदलने के लिए बाह्य स्थिति में बदलाव लाने की आवश्यकता नहीं थी। अर्जुन की यह स्थिति बदली, तब अर्जुन की विजय की अभिलाषा को, पराजय की निराशा में बदल दे वैसा एक भी प्रसंग युद्धभूमि पर नहीं हुआ था। श्रीकृष्ण उसके सारथी ने, उसके योद्धाओं ने, सरदारों ने या तो सिपाहियों ने उसे दगा या धोखा नहीं दिया था। जो कुछ बदलाव था वह अर्जुन के मनोराज्य में ही था। हजारों योद्धाओं तथा उनके हथियारों से अर्जुन जैसे महावीर के लड़ने के निश्चय में बदलाव करवाना तो अशक्य था। युद्धभूमि पर प्राण गँवाकर भी पीठ दिखाये वैसे अर्जुन नहीं थे। एक महान योद्धा के मनोभावना में बदलाव आने से जैसे छननी में से पानी निकल जाता है वैसे ही अर्जुन के शरीर में से युद्ध का उत्साह, क्षत्रिय का तेज, महान यौद्धा का अडिग धैर्य वह तमाम चले गये। एक डरपोक और हताश हुए मनुष्य की माफिक थोड़े समय पहले का सिंह जैसा अर्जुन वह मेंढे से भी गरीब और निर्बल हो गया। राज्य पाने की महत्वाकांक्षा को उसने तिलांजलि दे दी। पेट भरने के लिए एक भिक्षुक के भिक्षापात्र ही उसके योग्य है वैसा वह मानने लगा। अर्जुन की मानसिक स्थिति में आये बदलाव युद्ध की तरफ उसकी सुख बुद्धि को बदल कर उसके प्रति

दुःख बुद्धि की उत्पत्ति वही इस बदलाव का कारण था।

एक ही वस्तु के प्रति, युद्ध के प्रति बाह्य संयोगों में सहज भी बदलाव के बिना, सुख की भावना दारुण दुःख में, केवल मानसिक रुख मनोवृत्ति से बदल जाती है उसके ऊपर दर्शित उदाहरण हैं। श्रीमद्भगवद्गीता में इसके विपरीत उदाहरण का दुःख में से केवल मनोभाव बदलने से सुखी होने का भी एक अनुपम उदाहरण/दृष्टान्त है। श्रीकृष्ण भगवान ने विषादग्रस्त अर्जुन को बोध दिया-गीता की शिक्षा दी और वैसा करने से केवल उसकी मनोभावना में और एक बदलाव को लाये। इस बदलाव से अर्जुन का विषाद दूर हुआ। 18व अध्याय के अन्त में उसने स्वयं अपनी स्थिति का वर्णन किया है। उसके अनुसार वे युद्ध के लिए तैयार हुए-युद्ध के प्रति उनकी दारुण दुःख की भावना से निवृत्ति भी मिली और सुख की भावना उत्पन्न हुई।

इससे स्पष्ट है कि सुख या दुःख वह कोई एक चीज या वस्तुस्थिति में नहीं है परन्तु मनुष्य के मन में मनोभावों में ही हैं। प्रत्येक मनुष्य को कुरुक्षेत्र में खड़े रहने की जरूरत नहीं पड़ती, परन्तु प्रत्येक मनुष्य के जीवन में अर्जुन के जैसे बहुत प्रसंग आते हैं। किसी एक वस्तु से कभी उसे सुख होता है और उसी से कभी बहुत दुःख होता है। अजुम्के जैसा सामान्य मनुष्य के सुख-दुःख का आधार किसी चीज या वस्तु पर नहीं है, परन्तु उसके मन पर उसके मनोभावों पर है। इस कारण से मनुष्य का मन कैसा है, किस तरह से वह कार्य करता है, एक-एक से बिल्कुल विरूद्ध भावों को वह क्यों धारण करता है, इस विषय पर विचार करने की जरूरत हैं। इस प्रकारके परस्पर विरुद्ध भावों का आना वह एक प्रकार से आघात लगने जैसा हैं। ऐसे यकायक आते आघात से मनुष्य शरीर को बचाया जा सकता है या नहीं और यदि बचाय जा सकता है तो वह किस प्रकार इन प्रश्न पर विचार करने की प्रत्येक मनुष्य को जरूरत है।

मनुष्य के सुख दुःख की भावनाओं में अनुभव में, उसकी शारीरिक शान्ति में और आरोग्य में तथा उसकी आध्यात्मिक उन्नति में मन कितने महत्व की भूमिका अदा करता है उसका थोड़ा ख्याल ऊपर के उदाहरण से हुआ होगा। मन की इतनी महत्ता होने के कारण अपने धर्मशास्त्रों में, उपनिषदों आदि ग्रन्था में मन पर काबू पाने की, मनोनिग्रह करने की बहुत की अहम् परन्तु बहुत सादी और उत्तम पद्धतियाँ बताई गई हैं। योग दर्शन में चित्त-चित्तवृत्ति, मन, मन की भावनाओं के विषय में पद्धति अनुसार और बहुत बारीकी से विचार करने में आया हैं। श्रीमद्भगवद्गीता भी हिन्दू धर्म का बहुत महत्व का ग्रन्थ होने से उसमें भी मन, मनोविकास, मनोनिग्रह पर विचार करने में आया हैं। उसके मनन से

अभ्यासी की उन्नति का वेग बहुत बढ़ जाता हैं। इसके श्लोक के पढ़ने मात्र से नहीं परन्तु उसके विचार से उसके मनन से, उसके आचरण से मनुष्य बहुत उच्च कक्षा तक पहुँच सकता हैं।

मनोनिग्रह के सम्बन्ध में श्रीमद्भगवद्गीता में दी हुई सूचनाओं में आडम्बर से उपयोग अधिक है। अपने धर्मग्रन्थों का ऐसी दृष्टि से शायद ही निरीक्षण किया गया है। परन्तु जब तक इस दृष्टि श्रीमद्भगवद्गीता का अध्ययन नहीं होगा तब तक केवल उसके रटे हुए पाठ से अभ्यासी की अधिक उन्नति होने की सम्भावना बहुत कम हैं। भगवद्गीता में मन तथा मनोनिग्रह के श्लोक बहुत अलग-अलग जगह पर है, अलग-अलग प्रसंगों पर अर्जुन की अलग-अलग शंकाओं के समाधान हेतु कहे गये हैं। इस कारण से सामान्य अभ्यासी को उसको समन्वित करना मुश्किल पड़ता है। इस कारण से इन श्लोकों की अभ्यास में उपयोगिता के अनुसार क्रमवार लेकर उसके पीछे छिपे रहस्य को स्पष्ट करने का प्रयत्न इस प्रकरण में किया है। यह विषय इतना तो गहन है कि इस प्रकरण में दी हुई सुचना तो अभ्यासी के लिए इस सम्बन्ध की बालपोथी के समान ही है परन्तु उतनी सूचना भी बराबर समझकर उसको अमल में लाने से उन्नति मार्ग में अभ्यासी की बहुत प्रगति होगी। मन बहुत महत्व का तत्व है यह हिन्दूधर्म के शास्त्रकारों ने प्रारम्भ से ही अच्छी तरह से समझा था। इस कारण से श्रीमद्भगवद्गीता जैसे छोटे से ग्रन्थ में भी इस विषय में बहुत महत्व की और व्यावहरिक सूचना दी है।

हिन्दू धर्म शास्त्रकार जो प्रारम्भ से ही समझे थे वह अब पश्चिम के तत्वेत्ता भी समझने लगे हैं। मन (Psyche) क्या है यह अब भी पश्चिम ने सही प्रकार से समझा नहीं है परन्तु मन महत्व का तत्व है और इस कारण से उसका पद्धति अनुसार अवलोकर होना चाहिए इस बात पर तो वे लोग भी सहमत हैं। ऐसे मन के अवलोकर पर से मानस शास्त्र नाम की विद्या-विज्ञान-ज्ञान की एक शाखा निश्चित करने में आयी है। मानस शास्त्र के अभ्यास को उच्च शिक्षण में बहुत ऊँचा स्थान दिया गया है। जैसे मानस शास्त्र का अभ्यास बढ़ता जाता है वैसे-वैसे उसकी महान महत्ता स्वीकारी जाती हैं। शरीर का आधार मन पर है (Physiological Psychology) इसलिए मनोनिग्रह से कितनी बीमारियाँ भी ठीक हो सकती है ऐसा अब मानने में आता हैं। शिशु का शिक्षण भी अब बाल मानसशास्त्रों के सिद्धान्तों पर अवलम्बित कर निश्चित किया जाता हैं। उद्योग व्यापार में भी (Industrial Psychology) मानस शास्त्र का महत्त्व स्वीकार किया गया है। समाज के व्यवहार में भी मानस शास्त्र के महत्व को स्वीकारा गया हैं। संक्षिप्त में अगर कहें तो मन और जीव का बहुत गहरा संबंध होने से जीवित

प्राणियों के साथ काम लेने से पहले मनुष्य तो क्या प्राणियों के भी मानसशास्त्र का पता लगाने के प्रयत्न जारी हैं।

पश्चिम के दशों में कुछ सदी से ही मन की महत्ता पर ध्यान गया है परन्तु थोड़े समय में ही मानसशास्त्र के बहुत विद्वत्तापूर्ण ग्रन्थ उन देशों में तैयार हुए हैं। हिन्द में इस विषय पर प्रारम्भ में ही बहुत ध्यान दिया गया था परन्तु बाद में इस विषय को समझने जितनी भी अपनी शक्ति नहीं रहने से हिन्दूधर्मशास्त्र में यह ज्ञान कहीं-कहीं अलग-अलग जगह पर मिलता हैं। पश्चिम के दशों में उपरोक्तानुसार, मानसशास्त्र के सम्बन्ध में विशिष्टता है परन्तु मानसशास्त्र (Psychology) की हिन्दू धर्मग्रन्थों में दी हुई सूचना सादी सरल और अनुभवसिद्ध हैं।

हिन्दू धर्मग्रन्थों में मानसशास्त्र की जो सूचनाएं है वह एक और दृष्टि से भी बहुत महत्व की हैं। पश्चिम का मानवशास्त्र मुख्य रूप से सामान्य मनुष्य का मन कैसे कार्य करता है उसके सिद्धान्तों को निश्चित करता है—किस प्रकार से किस पद्धति से-कैसे आचार और व्यवहार से मनुष्य का मन उच्चस्थिति पर पहुँचाया जा सके इस विषय पर पश्चिम के मानवशास्त्र में बहुत विचार नहीं हैं। हिन्दुस्तान के मानसशास्त्र में पश्चिम् के जितनी बारीकी और विद्वता तथा उतना सूक्ष्म विश्लेषण तो नहीं है परन्तु किस प्रकार के आचार से सामान्य मनुष्य का मन उच्च प्रकार का बनाया जा सकता है वैसी क्रियाएँ बहुत सादी, सरल और असरकारक रीति से मनुष्य के दैनिक जीवन व्यवहार में समाविष्ट कर दी हैं। हिन्दूधर्म की यह विशेषता बहुत कम धर्मों में हैं। इसके उपरांत जिन ऋषि-मुनियों ने अपना दैनिक आचार निश्चित किया वे लोग मानसशास्त्र के गहन अभ्यासी थे, यह हकीकत उनके दिये हुए नियमों के अवलोकन पर से ही पता चलती हैं। पश्चिम के मानसशास्त्र के महान और अग्रगण्य लेखकों के ग्रन्थ पढ़ने के बाद, हिन्दूधर्मशास्त्र में दी हुई और सभी अलग-अलग जगहों से प्राप्त मानसशास्त्र सम्बन्ध की सूचनाों पर विचार करें तो पता चलता है कि किसी समय में यह शास्त्र हिन्दुस्तान में बहुत अच्छी तरह से समझा गया होगा। पश्चिम का मानस शास्त्र आजकल जितना आगे बढ़ा हुआ है उससे हिन्दू धर्मशास्त्र का मानसशास्त्र कहीं अधिक आगे बढ़ा हुआ होना ही चाहिए।

मनुष्य के विकास में मन बहुत महत्व को भूमिका निभाता है इतना ही नहीं परन्तु मनोनिग्रह बहुत मुश्किल कार्य हैं। इस विषय में गीता में भी अर्जुन ने कहा हैं। अर्जुन बहुत प्रशिक्षित और सुशिक्षित पुरुष थें। साक्षात श्रीकृष्ण जैसे महापुरुष के प्रत्यक्ष शिक्षण का उसे अमुल्य लाभ मिला था। यह होने पर भी

मनोनिग्रह की अपनी मुश्लिक अर्जुन बताते हैं:–

**चञ्चलं हि मनः कृष्ण प्रमाथि बलवद् दृढम्।**
**तस्याहं निग्रहं मन्ये वायोरिव सुदुष्करम्।।**[1]

हे कृष्ण! मन बहूत चंचल हैं। मन चंचल-जल्दी से पकड़ में नहीं आये वैसा होने के उपरांत वह अविवेकी, उतावला, उपद्रवी और उत्पाती है। बलवान या निर्बल मनुष्य के वश में न हो सके वैसा, और दृढ़-इच्छित दिशा में मोड़ने में मुश्किल पड़े वैसा कठिन है। ऐसे उत्पाती बलिष्ठ और मजबूत मन का निग्रह करना पवन के निगह करना जितना मुश्किल हैं। इस श्लोक में मनोनिग्रह की मुश्किल दर्शाने के उपरान्त नम के स्वरूप का वर्णन भी किया हैं।

मनोनिग्रह यानी मन को काबू में रखना- मनोनिग्रह यानी मनोभावनाओं का यकायक रूपान्तर न हो जाये। मनोभवनाओं में यकायक बदलाव होने से मनुष्य को क्या नुकसान होता है वह समझाने के लिए अर्जुन का दृटात ऊपर दिया गया हैं। मनुष्य के लिए मनोनिग्रह एक प्रकार का प्रतिरोधक है, जैसे एक रेल का डिब्बा दूसरे के साथ जोर से टकराव में आये तो उसके टूट जाने का डर रहता है उसी प्रकार से मनुष्य के साथ मन के साथ बाहर के विषयों का सग हो-जोर से टकराव हो तो मन को आघात पहुँचता है। मनोनिग्रह यानी इस प्रकार का आघात न पहुँचे वैसा मन का प्रशिक्षण। दुनिया की अच्छी या बुरी घटनाओं से मनुष्य के मन को यकायक आघात लगाकर वह अर्जुन के जैसा शक्तिहीन या सुन्न न हो जाए उसके लिए मन की साम्यता को बढ़ाने के जरूरत है। मन की सन्तुलन को बढ़ाने की जरूरत है। ऐसा धक्का लगने पर मन को आघात नहीं लगने देकर उसे वापस खींच लेना-वहीं मन पर काबू-वहीं मनोनिग्रह है।

मन को काबु में रखने के लिए-मनोनिग्रह करने के लिए मनुष्य को क्या करना चाहिए? मनोनिग्रह कैसे होता है, मनोनिग्रह करने की कौन सी रीति है, यह जानने की अर्जुन को-प्रत्येक मनुष्य को जरूरत है। इस कारण से मनोनिग्रह की सबसे अच्छी रीति कौन-सी है इस विषय में अर्जुन श्रीकृष्ण से पूछते है जिसके जवाब में भगवान श्रीकृष्ण कहते है कि:–

**असंशयं महाबाहो मनो दुर्निग्रहं चलम्।**
**अभ्यासेन तु कौन्तेय वैराग्येण च गृह्यते।।**[2]

वास्तव में अर्जुन, मन बहुत ही चंचल है उसके निग्रह करने का कार्य

---

1. गीता-3/34.
2. गीता-6/35.

बहुत कठिन है सही, परन्तु अभ्यास और वैराग्य से उसक निग्रह किया जा सकता हैं। अभ्यास और वैराग्य ये दो मन को वश में करने के साधन हैं। इन दोनों का अर्थ प्रारम्भ में ही ठीक तरह से समझने की जरूरत है।

'अभ्यास' यानी पुस्तकों का पढ़ना नहीं। यद्यपि अभ्यास शुरू करने से पहले कुछ पुस्तकों का पढ़ना जरूरी है परन्तु पढ़ना ही अभ्यास नहीं है। अभ्यास यानी एक ही कर्म को बार-बार करना जिससे वह कार्य करने में किसी विशेष प्रयत्न की जरूरत न पड़े परंतु वह कार्य करने का अपना स्वभाव बन जाए:-

**यतो यतो निश्चरति मनश्चञ्चलमस्थिरम्।**
**ततस्ततो नियम्यैतदात्मन्येव वशं नयेत्॥**[1]

जब-जब जिस-जिस कारण से जिस-जिस जगह से अस्थिर और चंचल मन बाहर जाता है-मनुष्य विषय पर से दूसरे विषयों का विचार करने लगता है- निश्चित किए हुए रास्ते पर से दूसरे टेढ़े रास्ते पर जाता है तब-तब उसे आत्मा से, सार-असार का विचार करने की शक्ति से नियम में लाना।

प्रत्येक मनुष्य यदि थोड़ा भी आत्मनिरीक्षण करेंगे तो देखेंगे कि वे स्वयं जब कोई एक विषय पर विचार करने लगते है कि तुरंत ही उस विषय के विरूद्ध के अथवा दूसरे अन्य विचार उसके मन में उत्पन्न होते हैं। दूसरे शब्दों में कहें तो मनरूपी घोड़ा जब तक स्वच्छन्दी होकर अपनी इच्छानुसार चलता है तब तक उसके चलाने वाले मालिक को, अभ्यासी को वह कितना उत्पाती है उसकी सही खबर भी नहीं पड़ती। मन को जब एक दिशा में एक विषय के विचार करने से रोका जाए तभी उसके बल का उत्पाती स्वभाव का उसकी चंचलता का और अस्थिर स्वभाव का ख्याल आता हैं। अभ्यासी के निश्चित किए हुए विषय को एक तरफ रहने देकर दूसरे विषय का विचार करना शुरू करता हैं। जैसे होशियार गाड़ी चालक अपने निश्चित किए हुए मार्ग से दूसरे रास्ते जाते हुए घोड़े को लगाम से रोककर निश्चित मार्ग पर ही ले जाते हैं उसी प्रार अभ्यासी को भी मन जरा भी निश्चित किए हुए विषय पर से अलग विषय पर जाए तो तुरंत ही उसे वैसा करने से रोकना होगा। इस प्रकार बार-बार टेढ़े रास्ते जाने वाले मन को वहाँ जाने से रोककर, निश्चित किए हुए रास्ते पर ले जाना उसका नाम अभ्यास है। जैसे होशियार गाड़ी चालक बार-बार टेढ़े रास्ते जाने वाले स्वच्छन्दी घोड़े की इस बुरी आदत को टेढ़े रास्ते जाते समय हर बार रोकर भुला देता है उसी प्रकार होशियार अभयासी चंचल तथा अस्थिर मन को टेढ़े रास्ते पर जाने पर बार-बार रोककर, अभ्यास से मन को वश में करते हैं। मनोनिग्रह जैसा

---

1. गीता-6/26.

मुश्किल कार्य भी आसानी से कर सकते हैं।

मन जब-जब निश्चित किए हुए रास्ते से, विषय पर से टेढ़े रास्ते जाता है तब वह किस रास्ते किस विषय पर जाता है उसके सूक्ष्म निरीक्षण की, आत्मनिरीक्षण की जरूरत हैं। जिस विषय पर मन टेढ़े रास्ते जाता है उस विषय के लिए अभ्यासी में एक प्रकार का राग होना चाहिए। मन का स्वभाव ही ऐसा है कि जिस विषय के लिए उसे राग होता है- जिस विषय के लिए उसकी इच्छा होती है- जिस विषय का पहले उसने अनुभव किया होता है- जिस विषय से पहले उसे सुख या सुखाभास हुआ हो तो वह उस विषय की तरफ ही जाता हैं। बिल्कुल अज्ञात और बिल्कुल अनुभव न किए हुए विषय की तरफ स्वाभाविक रूप में मन यकायक आकर्षित नहीं होता है। मन की यह विशिष्टता भगवान श्रीवेदव्यास के ख्याल से बाहर नहीं थी इस कारण से ऐसे प्रसंगों पर अभ्यासी को क्या करना चाहिए उस विषय के अनुसार सूचना दी गयी है:-

**संकल्पप्रभवान्कामांस्त्यक्तवा सर्वानशेषतः।**
**मनसैवेन्द्रियग्रामं विनियम्य समन्ततः॥**[1]

संकल्प से उत्पन्न होने वाली सभी कामनाओं- इच्छाओं-तृष्णओं का सम्पूर्ण रीति से बिल्कूल जरा भी बाकी न रहे इस तरीके से त्याग करना। इस प्रकार तमाम तृष्णा के त्याग करने के बाद मन से, इन्द्रियग्राम-इन्द्रिय के समूह को सब तरह से नियम में- काबू में लाना। ऊपर के श्लोक से स्पष्ट है कि कामनाओं का त्याग करने से मन का उस तरफ आकर्षित होना अपने आप बन्द हो जाता हैं। मन को विषयों की तरफ से आकर्षित होने से रोकना ही विराग-वैराग्य हैं। इस प्रकार के वराग्य से और अभ्यास से मन को वश में किया जा सकता है।

मन को टेढ़े रास्ते ले जाने में संकल्प बहुत महत्व की भूमिका अदा करता हैं। वह ऊपर के श्लोक से स्पष्ट हैं। यह सिद्धान्त इतना महत्व का है कि श्रीमद्भगवद्गीता में दूसरी जगह पर भी कहा है:-

**यं संन्यासमिति प्राहुर्योगं तं विद्धि पाण्डव।**
**न ह्यसंन्यस्तसंकल्पो योगी भवति कश्चन॥**[2]

हे पाण्डव, जिसको सन्यास कहते हैं वही योग हैं। कर्म के फलों का-फल की इच्छा का-संकल्प से उत्पन्न होने वाले काम का सन्यास-त्याग वही

---

1. गीता-6/28.
2. गीता-6/2.

कर्मयोग है; संकल्प का सन्यास, इच्छा का त्याग किए बिना कोई भी अभ्यासी कभी भी योगी-कर्मयोगी हो नहीं सकता। योगी-कर्मयोगी होने की इच्छा रखने वाले को संकल्पों-संकल्प से उत्पन्न होने वाली कामना का त्याग करना पहला सोपान हैं।

जैसे लौह चुम्बक लोहे के टुकड़े को अपनी तरफ खींचता है उसी प्रकार इच्छा-तृष्णा-वासना-संकल्पजन्य काम, मन को सीधे रास्ते न जाने देकर अपनी तरफ खीचते हैं। इस प्रकार होने से मन की साम्यावस्था का शान्ति का भंग होता हैं। मन की साम्यावस्था की इच्छा करने वाले को संकल्पजन्य काम का शुरू से ही त्याग करने की आदत डालनी चाहिए।

शरीर का मन पर असर होता है और मन की मानसिक स्थिति का शरीर पर असर होता है। शरीर और मन का एक दूसरे पर असर होता है यह मानसशास्त्र का महत्व का सिद्धान्त हैं। इस महत्व के सिद्धान्त पर भगवद्गीता में बहुत जोर दिया हैं शुरुआत के अभ्यासी के लिए यह सूचनाएँ बहुत महत्व की है:-

**शुचौ देशे प्रतिष्ठाप्य स्थिरमासनमात्मनः।**
**नात्युच्छ्रितं नातिनीचं चेलाजिनकुशोत्तरम्।।**[1]

**तत्रैकाग्रं मनः कृत्वा यतचित्तेन्द्रियक्रियः।**
**उपनिवश्यासने युञ्ज्याद्योगमात्मविशुद्धये।।**[2]

पवित्र देश में स्थान में जगह पर बहुत ऊँचा या बहत नीच नहीं वैसा, दर्भ का मृगचर्म या कपड़े का स्थिर आसन बनवाना। शुरुआत के अभ्यासी का मन आसपास के वातावरण पर काबू रख नहीं सकता इस कारण से आसपास का वातावरण भी ऐसा होना चाहिए कि शुरूआत के ओयासी को वह मददरूप बने इसी कारण से ही पवित्र स्थान और सुखदायक आसन की जरूरत है।

इस प्रकार देश तथा आसन की व्यवस्था करने के बाद क्या करना उसकी सूचना बाद के श्लोक में दी है। ऐसे आसन पर बैठकर मन को एकाग्र करना-मन से एक ही विषय का विचार करना-मन को अपनी मर्जी से भटकने न देकर-मन को एक ही विषय पर लगाना। मन को एकाग्र करने से पहले चित्त का संकल्प-विकल्प का व्यापार-क्रिया तथा इन्द्रिय की क्रियाओं का निग्रह करना। इन्द्रिय तथा चित्त के निग्रह के बिना मन एकाग्र नहीं हो सकता।

1. गीता-6/11
2. गीता-6/12.

मन को एकाग्र करना यानि मन को इधर-उधर भटकने न देना-मन को एकाग्र करना यानी मन से एक विषय का चिन्तन करना। कौन से एक विषय का चिन्तन करना यह विचारणीय हैं। सामान्य बुद्धि से सोचने पर भी पता चलता है कि चिन्तन करने का विषय जितना बने उतना उच्च होना चाहिए। मनुष्य जैसा विचार करता है वैसा वह हो जाता है। इस सिद्धान्त को लक्ष्य में रखकर प्रत्येक ध्यान का ध्येय रूप निश्चित होता है। भगवद्‌गीता में भी इस सिद्धान्त को ध्यान में रखकर हो सके उतना उच्च ध्येय अभ्यासी के समक्ष प्रस्तुत किया है।

सभी मनुष्य एक ही प्रकृति के नहीं होते हैं। सभी मनुष्य का ध्यये (Ideal) एक समान नहीं होता हैं। भिन्न-भिन्न प्रकृति के मनुष्यों को अनुकूल हो इसलिए गीता में अलग-अलग ध्येय बताये हैं। महत्व के ध्येय निम्नलिखित हैं:-

**प्रशान्तात्मा विगतभीर्ब्रह्मचारिव्रते स्थितः।**
**मनः संयम्य मच्चित्तो युक्त आसीत मत्परः॥**[1]

आत्मा को बिल्कुल शान्त कर भय को त्याग कर निर्भय होकर ब्रह्मचारी वृत्ति में दृढ़ रहकर, मन को संयक करके, मेरे में- परमेश्वर में चित्त को लगा, मैं परमेश्वर ही गन्तव्य हूँ- इष्ट वस्तु हूँ ऐसा विचार करके मन को एकाग्र करना। इस श्लोक में मन को एकाग्र करने की पद्धति भी है ओर मन को परमेश्वर में एकाग्र करने का सिद्धान्त भी दिया हैं। ब्रह्मचारी व्रत, वीर्य रक्षा की भी इस श्लोक में आवश्यकता दर्शित की हैं। एकाग्रचित्त होने की इच्छा करने वाले को सुदृढ़ शरीर दृढ़ मनोबल की जरूरत है। ब्रह्मचर्य-वीर्य, वायु-प्राण तथा मन को एक-दूसरे के साथ बहूत निकट का सम्बन्ध हैं। वीर्य तथा वायु के निग्रह करने से मनोनिग्रह अपने आप होता हैं। इस कारण से ब्रह्मचर्य की जरूरत प्रत्येक धर्म में देखने में आयी है।

प्रभु की भावना प्रत्येक मनुष्य की उच्च से उच्च भावना है। इसी कारण से मन को, चित्त को, प्रभु में एकाग्र करने की भगवद्‌गीता में जगह जगह सूचना दी है:-

**सर्वद्वारणि संयम्य मनोहृदि निरूध्य च।**
**मूर्ध्न्याधायात्मनः प्राणमास्थितौ योगधारणाम्॥**[2]

**ओमित्येकाक्षरं ब्रह्म व्याहरन्मामनुस्मरन्।**
**यः प्रयाति त्यजन्देहं स याति परमां गतिम्॥**[3]

1. गीता-6/14
2. गीता-8/12
3. गीता-8/13

सभी द्वार का-इन्द्रिय का संयम कर-मन को हृदय में निरोध कर मन को भटकने से रोककर प्राण को योगधारणा से मस्तक में स्थापित कर समाधि लगाकर ब्रह्मरूप एकाक्षर ओम शब्द का जप करते-करते मेरा-परमात्मा का स्मरण करते-करते जो मनुष्य मरता है, देह छोड़ता है वह परमगति को-उच्च स्थान को पाता हैं। इस श्लोक में भी मन को ईश्वर परायण-ईश्वर में एकाग्र करने को कहा हैं। इन्द्रिय निग्रह रूप दूसरी क्रियाएँ मन को एकाग्र करने में सहायक होती हैं। ईश्वर का ध्यान करने वाला ईश्वर जैसा होता है वह सिद्धान्त भी दोहराया हैं। इसी मतलब का दूसरा श्लोक नीचे के अनुसार है:-

**प्रयाणकाले मनसाचलेन भक्त्या युक्तो योगबलेन चैव।**
**भ्रुवोर्मध्ये प्राणमावेश्य सम्यक् स तं परं पुरूषमुपैति दिव्यम्।।**[1]

अचल मन से दृढ़ भक्ति और श्रद्धा से मरते समय परमात्मा का ध्यान करने वाले व्यक्ति दिव्य पुरूष को प्राप्त होते हैं। प्राण और मन का सम्बन्ध कैसा है वह ऊपर बताया है जिसके कारण योगबल से प्राण को दो भौंहों के बीच में स्थिर करने के सूचना दी है।

विज्ञान की दृष्टि से देखने से भी ऊपर की सूचना बहुत ही व्यावहारिक है परन्तु प्रत्येक मनुष्य को वैज्ञानिक दृष्टि से इस विषय पर विचारने का समय तथा बुद्धि बल नहीं हो सकता। ऐसे मनुष्यों को भी विज्ञान न जानते हुए भी उन्हें विज्ञान की शोध का लाभ मिले इसलिए वैसे अभ्यासियों को सादी और सरल सूचना दी है:-

**मय्येव मन आधत्स्व मयि बुद्धिं निवेशय।**
**निवसिष्यसि, मय्येव अत ऊर्ध्वं न संशयः।।12-8**

अर्जुन! अभ्यासी तू तेरा मन मुझमें-श्रीकृष्ण में, परमेश्वर में एकाग्र कर तेरी बुद्धि को मुझ में पिरो। इस प्रकार करने से अभ्यासी मुझे ही परमेश्वर को ही पायेगा उसमें संदेह नहीं हैं। मन में उच्च भावना रखने से मन परमात्मा में पिरोने से मनुष्य अभ्यासी परमात्मा जितनी उच्च पदवी को पाता है इस महान सत्य को इस श्लोक में भगवान व्यास ने संग्रहीत किया हैं।

मन की एक दूसरी भी विशिष्टता है। मन को कुछ आधार कुछ अवलम्बन, कुछ विचार करने के विषय की जरूरत है सामान्य मनुष्य का मन किसी भी प्रकार के आलम्बन के बगैर रह नहीं सकता। मन की उन्नति तथा अवनति का आधार उसके ऊँचे या नीचे आलम्बन पर हैं। ऊपर के श्लोक से

---

1. गीता-8/10.

स्पष्ट है कि मनुष्य के- अभ्यासी के मन को ऊँचे से ऊँचा आलम्बन श्रीमद्भगवद्गीता में दिया गया हैं। मनोविकास की यह पद्धति बहुत सादी, सरल फिर भी बहुत सचोट उच्च आलम्बन पर मन को लगाने से मनुष्य को कोई द्रव्य व्यय करने की जरूरत नहीं है और महान कष्ट उठाने की भी जरूरत नहीं हैं। केवल उच्च भावना से ही मनुष्य का मन बहुत उच्चस्थिति पर पहुँच सकता हैं। इस पद्धति से मनुष्य का मनोविकास हो सकता है। मन को हल्के विचारों में से रोककर उच्च विचारों में जोड़ना इस पद्धति का मुख्य स्तम्भ है।

अभ्यासी के लिए यह महत्व की सूचना है, परन्तु इस सूचना के अनुसार अमल करता हुआ अभ्यासी कैसे जाने कि उसका मन कब एकाग्र हुआ हैं। अभ्यासी को अपनी परीक्षा करने का साधन मिले वैसी व्यवस्था भी श्रीमद्भगवद्गीता में रखी हैं:-

**यथो दीपो निवातस्थो नङ्गते सोपमा स्मृता।**
**योगिनो यतचित्तस्य युञ्जतो योगमात्मनः।।**[1]

निर्वात-पवन के स्थान पर दिये की ज्योति जैसे स्थिर रहती है, उसी तरह से योगी की चित्त-मन स्थिर रहता हैं। दिये का यह उदाहरण बहुत माननीय हैं। दिये की ज्योति पवन के झोकों से अस्थिर होती है और कभी बिल्कुल बुझ भी जाती है उसी प्रकार मन की स्थिरता संकल्प से संकल्पजन्य कामना, वासना से अस्थिर होती है, उसका प्रकाश कम होता है और कभी बिल्कुल बुझ भी जाता हैं। उपरोक्तानुसार प्रशिक्षित मन-निर्वात दीप के जैसा स्थिर किया हुआ मन-साम्यावस्था में सुदृढ हुआ मन कितना उपयोगी है इस सम्बन्ध में कहा है कि:-

**इहैव तैर्जितः सर्गो येषां साम्ये स्थिरं मनः।**
**निर्दोषं हि समं ब्रह्म तस्माद् ब्रह्मणि ते स्थिताः।।**[2]

इस लोक में, इस दुनिया में जिस मनुष्य का मन स्थिर होता है वही प्रत्येक वस्तु पर जय पा सकता हैं। निर्दोष और महान ब्रह्म तत्व ही सम-स्थिर हैं। इस कारण से जो अभ्यासी साम्य मन वाले, मन की साम्य स्थिरता वाले हैं, वे यहाँ भी इस लोक में भी ब्रह्म में स्थिर हुए-बहुत उच्चस्थिति को प्राप्त हैं।

इन्द्रिय द्वारा पड़े हुए प्रभाव को- इन्द्रिय द्वारा हुए ज्ञान पर मन संकल्प-विकल्प करता है परन्तु उस पर सार-असार का परिमाण निश्चित कर उस पर अंतिम निर्णय देना बुद्धि का काम हैं।

---

1. गीता-6/16.
2. गीता-5/16.

संस्कृत-विमर्शः 2020 ( अङ्कः 18 ) ISSN : 0975-1769

# चारित्र्यविकासे भर्तृहरेः अवदानम्

-डॉ. रत्नमोहन झा
सहायकाचार्यः, दूरस्थशिक्षा
केन्द्रीयसंस्कृतविश्वविद्यालयः, नवदेहली

**[ अस्मिन् लेखे मनुष्यस्य चारित्र्यमहत्त्वम्, विवेकमूलम्, सज्जनप्रशंसा, दुर्जननिन्दा इत्यादिविषयाः सम्यक् उपवर्णिताः सन्ति। ]**

ब्रह्मणः सृष्टौ सर्वोत्कृष्टं स्थानं भवति मानवस्य, यतः मानवः चिन्तनशीलः विवेकशीलश्च वर्तते। पूर्वं कृतस्य कार्यस्य परिणामं परिशील्य अग्रे करणीयकार्यस्य दशां दिशां च सुविचिन्त्य निर्धारयति मानवः। प्रतिपलं शिक्षणमवाप्य असौ आत्मपरिष्कारं विदधाति। सततम् अग्रे गमनं मानवस्य सहजः स्वभावः भवति। एतदर्थं यद् यद् आवश्यकं भवति तत्सर्वं साधयति मनोः सन्ततिः।

वेदादिविविधविद्याः अनादिकालादेव सम्पूर्णचराचरजगति अनुस्यूततया विकास-मन्दाकिनीं प्रवाहयन्ति। मानवस्य चारित्र्यविकासे व्यवहारज्ञानस्य महती भूमिका वर्तते। विविधप्रसङ्गेषु अस्माभिः क्रियमाणः व्यवहारः एव अस्माकं विकासस्य परिचायकः भवति। इदं च व्यवहारज्ञानम् अत्यन्तं सरलरीत्या प्रायेण काव्येनैव सम्भवति। समन्वयवादी काव्यशास्त्री आचार्यमम्मटोऽपि काव्यप्रयोजनमुपस्थापनकाले व्यवहारज्ञानाय आग्रहं प्रदर्शयति-

**काव्यं यशशेऽर्थकृते व्यवहारविदे शिवेतरक्षतये।**
**सद्यः परनिर्वृतये कान्तासम्मिततयोपदेशयुजे।।**[1]

काव्यपरम्परायां नीतिकाव्यानि अत्यन्तं प्रथितानि विद्यन्ते। नीतिकाव्यस्य नामोच्चारणमात्रेणैव भर्तृहरिः स्मृतिपथमायाति। स्वकाव्यप्रतिभया ज्ञानेन च लब्धप्रतिष्ठस्य भर्तृहरेः जन्मदेशकालादिविषये सप्रमाणम् इदमित्थं वक्तुं तथ्यानि नैव समुपलभ्यन्ते। विदुषां मतानुसारेण भर्तृहरिः मालवदेशस्य राजा आसीत्। अस्य पिता महाराजः गन्धर्वसेनः अनुजश्च महाराजः विक्रमादित्यः आसीत्। अस्य पत्न्याः नाम पिङ्गला आसीत्। अयं कालक्रमेण वैराग्यमवाप्य राज्यशासनदायित्वम् अनुजाय समर्प्य

1. काव्यप्रकाशे का. 2

गोरखनाथस्य शिष्यत्वं प्राप्य योगी अभवत्। नीतिशतकम्, शृङ्गारशतकम्, वैराग्यशतकम्, वाक्यपदीयञ्चेति अस्य प्रसिद्धाः रचनाः सन्ति। किन्तु शतकत्रयस्य कर्त्ता भर्तृहरिरेव वाक्यपदीयस्य च कर्त्ता वेत्यत्र विद्वत्सु अभिप्रायभेदोऽपि दृश्यते।

भर्तृहरेः नीतिशतकं मुक्तककाव्यं वर्तते। मुक्तके प्रत्येकमपि श्लोकः अर्थदृष्ट्या स्वतन्त्रो भवति। अर्थावबोधाय पूर्वापरप्रसङ्गस्य न कापि अपेक्षा भवति। नीतिशतके एतादृशाः शतं श्लोकाः सन्ति। ग्रन्थेऽस्मिन् भर्तृहरिः स्वानुभवसिद्धान् बहून् विचारान् श्लोकरूपेण प्रास्तौत्। सः अनेन माध्यमेन जीवनोपयोगीनि नैतिकमूल्यानि अशिक्षयत्। अस्मिन् पदलालित्यम् अर्थगाम्भीर्यं दृष्टान्तञ्च अत्यन्तं हृदयग्राह्यं वर्तते। संस्कृतवाङ्मये सत्सु अपि बहुषु नीतिग्रन्थेषु भर्तृहरिप्रणीतः नैतिकविचारविस्फोरकः सुभाषित-समुच्चयात्मकः अयं ग्रन्थः विशिष्टं स्थानं भजते।

नीतिशतके उत्कृष्टाः नैतिकसिद्धान्ताः प्रतिपादिताः सन्ति। एते सिद्धान्ताः विशिष्टजातिवर्गक्षेत्रभाषासम्प्रदायसम्बद्धाः न सन्ति। अत्रत्यः प्रतिपाद्यविषयः लोकव्यवहारकौशल्यं बोधयति। अनेनैव अस्माकं चारित्र्यविकासः सम्भवति। अत्रत्याः सर्वे विषयाः मानवस्य गम्भीरसांसारिकानुभवाधारिताः सन्ति। व्यवहारजगति के गुणाः आवश्यकाः, कीदृशी च जीवनशैली अपेक्षिता इति समीचीनरीत्या अस्मिन् निरूपितं विद्यते। नीतिशतकेऽस्मिन् अस्माकं चारित्र्यविकासाय विवेचितानां विषयाणां दिङ्मात्रमत्र निरूपणं विधीयते।

चीनयात्रिणः इत्सिंगस्य यात्राविवरणेन ज्ञायते यत् 651 तमे ख्रैष्टाब्दे भर्तृहरिनामकस्य कस्यचित् वैयाकरणस्य मृत्युः अभवत्। तदनुसारेण अस्य कालः सप्तम्यां शताब्द्यां सम्भाव्यते, परन्तु भारतीयपुराणेषु सन्दर्भेऽस्मिन् न कोऽपि उल्लेखः प्राप्यते। तस्मात् प्रतिभाति यत् इत्सिंगद्वारेण वर्णितः भर्तृहरिः अन्यः कोऽपि स्यादिति।

भर्तृहरिसम्बद्धाः किम्वदन्त्यः अपि श्रूयन्ते। अत्र किम्वदन्तीद्वयस्य उल्लेखः क्रियते। एकदा महाराजः भर्तृहरिः पत्न्या पिङ्गलया सह मृगयाविहारार्थं वनम् अगच्छत्। तत्र बहुकालं यावदितस्ततः अटनानन्तरमपि न कोपि वन्यप्राणी लब्धः। ततः प्रत्यागमनकाले मार्गे कश्चन मृगसमूहः समवलोकितः। राजा समूहस्य अग्रेसरं विलोक्य तं प्रहर्तुमुद्यतः। राजानं निवारयन्ती पिङ्गला अवदत् यदयं मृगराजः समग्रस्यास्य मृगसमूहस्य पालकः विद्यते। अत एव असौ न मारणीयः। परन्तु भर्तृहरिः पत्न्याः वचनमपरिगणय्य प्राहरत्। हरिणः भूमौ अपतत्। प्राणत्यागात् प्राक् राजानं भर्त्सयन् सः अकथयत् यत् भोः राजन्! त्वया समीचीनं नाचरितम्। इदानीं यदहं वच्मि तत्त्वं परिपालय। मम मृत्योः परं मदीयं शृङ्गं शृङ्गिणे साधवे, मदीये चञ्चले नयने नार्यै, मदीयं चर्म तपस्विने, मदीयाः पादाः चोरेभ्यः, मदीयं मांसं च

पापिने राज्ञे प्रयच्छ इति। हरिणस्य कारुण्यपूर्णं वचनं निशम्य भर्तृहरेः हृदयं द्रवीभूतम्। सः हरिणस्य मृच्छरीरम् अश्वे संस्थाप्य अग्रे प्रयातः। मार्गे तस्य मेलनं योगिना गोरक्षनाथेन सह अभूत्। राजा समग्रां घटनां योगिने विनिवेद्य हरिणाय जीवनं प्रदातुं तं न्यवेदयत्। राज्ञः वचनम् आकर्ण्य गोरक्षनाथेनोक्तं यत् हरिणाय अहं जीवनं प्रदास्यामि परन्तु त्वया मदीयशिष्यत्वेन भाव्यम्। तदनु भर्तृहरिः राज्यं परित्यज्य योगिनः शिष्यः सञ्जातः।

भर्तृहरेः वैराग्यस्य विषये अपि काचित् किम्वदन्ती आकर्ण्यते। तदनुसारेण भर्तृहरेः समीपम् एकदा कश्चन साधुः समायातः। सः राज्ञे किञ्चिद् अमरफलं प्रदाय अवदत् यदिदं फलं खादित्वा भवान् अमरत्वं प्राप्तुमर्हतीति। महाराजस्य भर्तृहरेः अतिशयप्रीतिः राज्ञि आसीत्। तस्मात् सः स्वयम् अभुक्त्वा तत् फलं तस्यै अयच्छत्। राज्ञी सेनानायके प्रीणाति स्म, तस्मात् सा अपि फलम् अभुक्त्वा तस्मै सेनानायकाय दत्तवती। सः सेनानायकः तत्फलं स्वकीयप्राणप्रियायै राजनर्तक्यै प्रायच्छत्। राजनर्तक्याः प्रीतिभाजनः राजा भर्तृहरिः आसीत्। अत एव सा तत् फलं प्राप्य राज्ञे दातुमैच्छत्। सा राज्ञः सकाशं समागत्य तत् फलं तस्मै अर्पयत्। इत्थं राज्ञे प्रदत्तं फलं राजनर्तक्याः सकाशात् पुनः समवाप्य भर्तृहरिः स्तब्धः सञ्जातः। पृष्टायां सत्यां सा समस्तं वृत्तान्तमकथयत्। अस्याः घटनायाः महान् प्रभावः भर्तृहरेः मनसि समजनि। स च संसारस्य नश्वरतामभिज्ञाय अनुजाय विक्रमाय सम्पूर्णं राज्यं समर्प्य स्वयं संन्यासं स्व्यकरोत्।

एतादृशीनां किंवदन्तीनां प्रामाण्यविषये इदमित्थं प्रतिपादयितुं नास्ति कश्चन अपरः मार्गः। परन्तु नीतिशतकस्य प्रारम्भिके श्लोके अपि भर्तृहरेः प्रेमविषयकः क्षोभः अस्माभिः अनुभवितुं शक्यते। अनेन प्रणीतेषु त्रिष्वपि शतकेषु अनेकानि पद्यानि स्वानुभूत्या परिप्लावितानि वर्तन्ते। तेषु आत्मदर्शनतत्त्वानि सर्वतोभावेन परिलक्ष्यन्ते।

भर्तृहरिः मुक्तककाव्यपरम्परायाम् अग्रगण्यः कविः विद्यते। सत्कवेः सर्वेऽपि गुणाः अस्य शतकत्रये दृश्यन्ते। अस्य भाषा सरला मधुरा सरसा मनोरमा प्रवाहमयी च वर्तते। भावाभिव्यक्तिश्च अत्यन्तं प्रभावोत्पादिका विद्यते। अत एव पाठकानां मनः हृदयञ्च अमन्दानन्दाप्लाविते भवतः। अस्मिन् छन्दसां वैविध्यं वर्तते। अनेन भावस्य विषयस्य चानुकूलं छन्दांसि उदाहरणानि च प्रयुक्तानि। भर्तृहरिणा प्रयुक्ताः सूक्तयः जनमानसे प्रचलिताः प्रथिताश्च सन्ति। अस्योपदेशः अस्माकं जीवने सार्वकालिकं मार्गदर्शनं विदधाति।

नीतिशतके विषयोपस्थापनमतीव मनोवैज्ञानिकरीत्या कृतं विद्यते। अस्माभिः किं कर्त्तव्यं किं न कर्त्तव्यं, किं ग्राह्यं किञ्च त्याज्यमिति विविधप्रसङ्गानामुपस्थापनेन

सः बोधयति। अस्मिन् वर्णितानां विषयाणाम् विभागः इत्थं भवितुमर्हति– 1. विवेकस्य मूल्यम् 2. सज्जनप्रशंसा 3. दुर्जननिन्दा 4. मूर्खस्य स्वभावः 5. विद्यामाहात्म्यम् 6. सद्‌गुणमहिमा 7. कर्मविचारश्च। एतदाधारेण कानिचन तथ्यानि अत्र उपस्थाप्यन्ते।

### विवेकस्य मूल्यम्

विस्वस्मिन् विश्वे सर्वोऽपि जनः सुखं शान्तिञ्च वाञ्छति। एतस्मिन् विवेकस्य भूमिका सुमहती भवति। मानवेषु अहङ्कारमदमोहादयः बहवो हि दोषाः सम्भवन्ति। एतादृशदुर्गुणभरितस्य जनस्य सर्वादौ विवेकः नष्टः भवति। तस्य मैत्री अपि तादृशैः विवेकहीनैः जनैस्सह एव भवति। विवेकराहित्येन दुर्जनसंसर्गेण लिप्सया च मानवीयागुणाः तस्मात् अपगच्छन्ति दानवीयगुणाश्च तस्मिन् समुद्भवन्ति। कर्त्तव्याकर्त्तव्यविवेकशून्याः शस्त्रान्विताः शक्तिसम्पन्नाः सर्वसमर्थाः अपि जनाः धर्ममार्गं परित्यज्य अधर्ममार्गमनुसरन्ति। रावणः कंसः जरासन्धः शिशुपालः दुर्योधनादयश्च अनेके तद्‌गुणसम्पन्नाः उदाहरणभूताः अस्मत्पुरतः दृश्यन्ते। अविवेकिनः ते दुरभिमानादेव समूलं विनष्टाः। अतः दुरभिमानं दूरीकृत्य विवेकपुरस्सरं जीवनयापनं मानवस्य परमं कर्त्तव्यं वर्तते। कविः भर्तृहरिः सन्देशमिदं देवनद्याः भागीरथ्याः दृष्टान्तपूर्वकं प्रस्तौति। सः कथयति यत् भगवती गङ्गा यथा स्वर्गात् शिवस्य शिरसि, ततः हिमाद्रौ, ततः पृथिव्यां, ततश्च सागरं गच्छन्ती क्रमेण नीचौरेव अगच्छत्, तथैव विवेकभ्रष्टाः जनाः अत्युन्नतं पदं प्राप्य अपि अनेकप्रकारैः पतन्ति–

**शिरः शार्वं स्वर्गात्पशुपतिशिरस्तः क्षितिधरं**
**महीध्रादुत्तुङ्गादवनिमवनेश्चापि जलधिम्।**
**अधोऽधो गङ्गेयं पदमुपगता स्तोकमथवा**
**विवेकभ्रष्टानां भवति विनिपातः शतमुखः।।**[1]

### सज्जनप्रसंशा

सज्जनाः परोपकारभावभरिताः भवन्ति। इतरेषां साहाय्येन ते स्वीयं जीवनं धन्यं मन्वते। सर्वेषु तेषां प्रेमभावः भवति। द्वेषात् क्लेशः समुद्भवति, तस्मात् ते ततः दूरे एव तिष्ठन्ति। कदाचिदपि ते द्वेषपूर्णव्यवहारं नैव कुर्वन्ति। सज्जनपुरुषाः कदापि आत्मप्रशंसां नेच्छन्ति अपितु इतरेषां प्रशंसां कुर्वन्ति। दृष्टिवैशाल्यं मनोवैशाल्यं हृदयवैशाल्यञ्च तेषां सहजगुणाः भवन्ति। सत्पुरुषाणां चरित्रं स्वस्य कृते वज्रादपि कठोरं इतरेषाञ्च कृते कुसुमादपि मृदु भवतीति महाकविः भवभूतिरपि प्रत्यपादयत्–

1. भर्तृ. नीति. 10

**वज्रादपि कठोराणि मृदूनि कुसुमादपि।**[1]

सज्जनाः स्वयं कष्टं सोढ्वाऽपि परेषामुपकारं नैव त्यजन्ति। विपरीतदशायामपि सत्पुरुषाणां व्यवहारः संयमितः एव भवति। तेषामाचरणमेव तान् परिचाययति। सौजन्यं मानवस्य अलङ्कारः वर्तते, तद्विना चारित्र्यविकासः नैव सम्भवति। कविना भर्तृहरिणा सज्जनानां काश्चन मर्यादाः वर्णिताः। तदनुसारेण दुर्जनाः न याच्याः, सखाऽपि निर्धनः अस्ति चेत् न प्रार्थनीयः, सर्वदा न्यायसम्मता आजीविका एव आश्रयणीया, विपत्तौ अपि उन्नतं जीवनविधानं नैव त्याज्यं, प्राणसङ्कटेऽपि गर्हितं कार्यं न कर्त्तव्यम्, सुतीक्ष्णया असिधारया सममपि व्रतं कदाचिदपि नैव त्यक्तव्यम्–

**असन्तो नाऽभ्यर्थ्याः सुहृदपि न याच्यः कृशधनः**
**प्रिया न्याय्या वृत्तिर्मलिनमसुभङ्गेऽप्यसुकरम्।**

**विपद्युच्चैः स्थेयं पदमनुविधेयं च महता**
**सतां केनोद्दिष्टं विषममसिधाराव्रतमिदम्॥**[2]

## दुर्जननिन्दा

मानवस्य कश्चन समाजः भवति। सामाजिकत्वात् सः एकाकी जीवनं कर्तुं नार्हति। समाजे बहुविधाः जनाः भवन्ति। भौगोलिकपरिवेषकारणात् न केवलं विदेशे अपितु भारतेऽपि मानवेषु स्वरूपभेदः दृश्यते। आकृत्या पश्यामश्चेत् सर्वेष्वपि ज्ञानेन्द्रियाणि कर्मेन्द्रियाणि च समानानि एव भवन्ति। हस्तौ पादौ कर्णौ नेत्रे च सममेव दृश्यन्ते। परन्तु व्यवहारेण केचन सज्जनाः केचन अन्यविधाश्च भवन्ति। सज्जनाः सततं समाजस्य अभ्युदयं कामयन्ते। उन्नतिम् इच्छद्भिः अस्माभिः निश्चप्रचं सुजनानामेव संसर्गः विधेयः। चारित्र्यविकासस्य महत्त्वपूर्णः पक्षः भवति अस्मत्परितः विद्यमानानां जनानां सम्यग् अभिज्ञानम्। सन्दर्भेस्मिन् भर्तृहरेः मार्गदर्शनम् अत्यन्तं लाभदायकं वर्तते। सः उत्तममध्यमाधमानां त्रयाणां निरूपणं विधाय चतुर्थप्रकारस्यापि उल्लेखमकरोत्। तस्य मतेन प्रथमं स्थानं सत्पुरुषाणां वर्तते, ते अन्यस्य हितं साधयितुं स्वीयं हितं सहर्षं परित्यजन्ति। द्वितीयं स्थानं सामान्यजनानां विद्यते। मध्यमाः ते स्वीयं हितम् अपरित्यज्य इतरेषामपि हितं साधयन्ति। तृतीयं स्थानम् अधमानां भवति। ते अन्येषां हितं नाशयित्वा स्वार्थं साधयन्ति। एतदर्थं मनुष्येषु ते नरराक्षसाः इत्युच्यन्ते। अन्तिमं स्थानं तु तेषां भवति ये अकारणमेव परहितं नाशयन्ति। एतादृशानाम् अधमाधमानां परमनीचानां कोटिनिर्धारणेऽपि जिह्वा लज्जते–

---

1. उ.रा.च. 2/7
2. भर्तृ. नीति. 28

**एते सत्पुरुषाः परार्थघटकाः स्वार्थान् परित्यज्य ये**
**सामान्यास्तु परार्थमुद्यमभृतः स्वार्थाविरोधेन ये।**
**तेऽमी मानुषराक्षसाः परहितं स्वार्थाय निघ्नन्ति ये**
**ये तु घ्नन्ति निरर्थकं परहितं ते के न जानीमहे।।**[1]

अतः अवश्यमेव अस्माभिः अवधानतया जनाभिज्ञानं विधाय परस्परं व्यवहर्त्तव्यम्। अनेनैव विविधाभ्यः समस्याभ्यः वयं रक्षिताः स्याम। गोस्वामी तुलसीदासोपि बोधयति–

**बरु भल बास नरक कर ताता।**
**दुष्ट सङ्ग जनि देइ विधाता।।**[2]

### मूर्खस्य स्वभावः

भर्तृहरिणा न केवलं सज्जनानां दुर्जनानाञ्च निरूपणं कृतम् अपितु मूर्खाणामपि विवेचनम् अतीव सूक्ष्मेक्षिकया कृतम्। लोके जनानाम् आनन्त्यं विद्यते। तेषु अक्षरसम्बन्धादपि कश्चन भेदः दृश्यते। सामान्यतया क्वचित् निरक्षराणां कृते मूर्खपदप्रयोगः श्रूयते। परन्तु वस्तुतथ्यं तथा नास्ति। अस्मद्देशे कस्मिंश्चित् कालखण्डे साक्षराणां सङ्ख्या न्यूनायिता इति सत्यम्। परन्तु अस्माकीनाग्रामीणपरम्परावलोकनेन ज्ञायते यत् निरक्षराणामपि समाजे मूल्यमासीत्। साक्षरः बुद्धिमान् निरक्षरश्च मूर्खः स्यादित्ययं भावः समीचीनः न प्रतिभाति। शास्त्राण्यधीत्यपि भवन्ति मूर्खाः इति वचनं सुप्रथितमेव। वस्तुतः चिन्तनरीत्या व्यवहारेण च जनस्य मूर्खत्वं ज्ञायते। अस्माभिः ज्ञानलवदुर्विदग्धेभ्यः सर्वदा दूरे एव भाव्यम्। भर्तृहरिः कथयति यत् जनः प्रयत्नपूर्वकं मकरमुखान्तर्गतं रत्नं निष्कासयितुमर्हति, प्रचलदूर्मिमालायुतं समुद्रमपि सन्तर्तुमर्हति, भुजङ्गमपि पुष्पवत् शिरसि धारयितुमर्हति, सिकतासु तैलं प्राप्तुमर्हति, मृगतृष्णासु जलमपि पातुमर्हति, शशविषाणमपि आसादयितुमर्हति अर्थात् अशक्यमपि शक्यं कर्तुमर्हति परन्तु दुराग्रहग्रस्तस्य मूर्खस्य मानसं परिवर्तयितुं न कोपि प्रभवति। सर्वविधसमस्यानां निदानं शास्त्रेषु दर्शितं वर्तते। किन्तु मूर्खस्य मूर्खतायाः निदानं तत्राऽपि नास्ति। अनन्तशास्त्राणि अधीत्यापि कोपि मूर्खस्य समाधानं कर्तुं नार्हति। भर्तृहरिः अग्रे पुनः प्रतिपादयति यत् पावकः जलेन शमयितुं शक्यः, सूर्यातपः छत्रेण निवारयितुं शक्यः, मदमत्तः गजोऽपि तीक्ष्णाङ्कुशेन वशीकर्तुं शक्यः, गोगर्धभौ दण्डेन नियन्त्रयितुं शक्यौ, रोगाः औषधेन दूरीकर्तुं शक्याः, तीक्ष्णमपि विषं विविधैः मन्त्रैः अपाकर्तुं शक्यं, परन्तु लोके मूर्खजनस्य प्रतीकारः कथमपि न सम्भवति–

---

1. तत्रैव – 75
2. रा.च.मा.,सु.का. 4

**शक्यो वारयितुं जलेन हुतभुक् छत्रेण सूर्यातपो**
**नागेन्द्रो निशिताङ्कुशेन समदो दण्डेन गोगर्दभौ।**
**व्याधिर्भेषजसङ्ग्रहैश्च विविधैर्मन्त्रप्रयोगैर्विषं**
**सर्वस्यौषधमस्ति शास्त्रविहितं मूर्खस्य नास्त्यौषधम्।।**[1]

**विद्यायाः माहात्म्यम्**

मानवस्य विकासे विद्यायाः स्थानं प्रमुखं वर्तते। उन्नतं परिष्कृतं सफलं च जीवनं विधातुं ज्ञानम् परमावश्यकं भवति। ज्ञानेन विना विकासस्य कल्पना अपि अशक्या एव। विद्यया विना ज्ञानस्य नान्यः मार्गः। अद्यत्वे मानवेन कृतस्य बौद्धिकविकासस्य प्रमाण्यं नापेक्षितम्। चतसृषु दिक्षु आश्चर्यकराः वैज्ञानिकप्रयोगाः दृश्यन्ते। यातायातक्षेत्रे, रक्षान्यायचिकित्सादिक्षेत्रे, नवसर्जनादिविविधक्षेत्रेषु च जातं विकासं विलोक्य मानवजातौ गर्वानुभूतिः भवति। सर्वमिदं मनुवंशस्य विकसितबुद्धेः चमत्कारो विद्यते। मानवः बुद्धिविकासेन सार्थकत्वमवाप्य धन्यतां प्राप्नोति। तेन जगदिदं रमणीयात् रमणीयतरं ततः पुनः रमणीयतमञ्च जायते। मनुष्यतायाः परमं लक्ष्यं बुद्धेः विवेकस्य च विकासः एव विद्यते। बुद्धिविकासाभावे मानवः अन्यपशुः इव सास्नालाङ्गूलककुदखुरविषाणविहीनः पशुरेव भविष्यति। चिन्तनशक्तिकारणादेव मानवः इतरप्राणीभ्यः श्रेष्ठः भवति। चिन्तनशक्तेः बुद्धेः विवेकस्य च विकासः अस्माकं विद्याध्यवसायाधारितो भवति। उत्तमोत्तमग्रन्थानामध्ययनेनैव मानवः सततम् आन्तरिकं बाह्यञ्च विकासं साधयति। व्यक्तेः वैशिष्ट्यं, मानवतायाः गौरवं, सागरस्य सम्पूर्णं वैभवञ्च विद्यायामेव समाहितं वर्तते। इयं विद्या जन्मजन्मान्तरं यावत् सञ्चिता तिष्ठतीत्यत्र शास्त्रप्रमाणं विद्यते। लोके केचन जनाः स्वीयं सौन्दर्यं प्रभावञ्च वर्धयितुं बहुविधान् अलङ्कारान् धारयन्ति। भर्तृहरिदृष्ट्या सर्वाण्यप्यलङ्करणानि व्यर्थान्येव तात्कालिकत्वात्। श्सुन्दराणि केयूराणि, आकर्षकाः हाराः, महार्घाणि अङ्गरागाणि, सुगन्धितानि चन्दनादीनि द्रव्यानि, सुप्रसाधिताः केशादयश्च जनान् नैव अलङ्कुर्वन्ति। लोकप्रसिद्धानि इमानि अलङ्करणानि कालक्रमेण नश्यन्ति। परन्तु जनैः स्वायत्तीकृता सुपरिष्कृता सुसंस्कृता वाणी सर्वतोभावेन तान् अलङ्करोति।[2] एतादृशी वाणी विद्यया एव सम्भवति। अत एव भर्तृहरिः कथयति यत् विद्या मनुष्याणां सौन्दर्यं, सुगुप्तं धनं, भोगैश्वर्ययशः प्रदायकं, गुरूणामपि पूज्यं, विदेशे बन्धुतुल्यं, सर्वोत्तमं दैवतञ्च विद्यते। राजसु जनस्य प्रतिष्ठा विद्यया एव भवति न तु धनेन–

---

1. भर्तृ. नीति. – 11
2. तत्रैव – 19

**विद्या नाम नरस्य रूपमधिकं प्रच्छन्नगुप्तं धनं**
**विद्या भोगकरी यशःसुखकरी विद्या गुरूणां गुरुः।**

**विद्या बन्धुजनो विदेशगमने विद्या परं दैवतं**
**विद्या राजसु पूज्यते न हि धनं विद्याविहीनः पशुः।।**[1]

### सद्गुणमहिमा

सतां सज्जनानां गुणाः सद्गुणाः इति कथ्यन्ते। लोके सज्जनानां व्यवहारः आदर्शभूतः श्लाघ्यश्च मन्यते। तेषां गुणाः अन्यैः अनुकरणीयाः भवन्ति। सद्गुणस्य महिमा भूयान् भवति। दयापरोपकारस्नेहादिगुणाः जनेषु भिन्नप्रमाणेन भवन्ति। कश्चिदपि जनः तस्मिन् विद्यमानगुणाधारेण आचरति। आचरणेनैव तस्य जनस्य चरित्रं ज्ञायते। सद्गुणयुतस्य सच्चरित्रस्य जनस्य प्रतिष्ठा सर्वत्र भवति। दुर्गुणयुतस्य च स्थानं क्वचिदपि न भवति। प्रभुत्वकारणाद् धनकारणाद् वा कालविशेषे स्थानविशेषे वा इच्छया अनिच्छया वा तस्य सम्माननं भवेन्नाम परन्तु कालानन्तरे सः अवमानितः भवत्येव। तस्मिन् न केपि विश्वसन्ति। परमात्मोपलब्धये भक्तये सुखशान्तिभ्यां च अस्माभिः अवश्यमेव सद्गुणाः अधिगन्तव्याः। भर्तृहरेः अनुसारेण कस्यचिदपि जीवस्य प्राणघातात् निवृत्तिः अन्यस्य धनहरणे संयमः सत्यभाषणं आवश्यकतायां सत्याम् सामर्थ्यानुसारेण सहकारप्रदानं परनारीविषयकचर्चासु मौनालम्बनं लोभस्य प्रशमनं गुरुषु विनम्रता सर्वप्राणिषु दया इत्येते गुणाः सर्वशास्त्रविहितं सार्वत्रिकं सार्वकालिकं मङ्गलकरञ्च मार्गं प्रशस्तीकुर्वन्ति-

**प्राणाघातान्निवृत्तिः परधनहरणे संयमः सत्यवाक्यं**
**काले शक्त्या प्रदानं युवतिजनकथामूकभावः परेषाम्।**

**तृष्णास्त्रोतोविभङ्गो गुरुषु च विनयः सर्वभूतानुकम्पा**
**सामान्यः सर्वशास्त्रेष्वनुपहतविधिः श्रेयषामेष पन्थाः।।**[2]

### कर्मविचारः

भारतीयदर्शने पुरुषार्थचतुष्टयस्य मूलाधारः कर्म एव वर्तते। मानवः कर्मबलेन सर्वविधां सिद्धिं लभते। कर्म अकृत्वा न कोऽपि जनः अभीष्टं फलं प्राप्तुमर्हति। तत्तत्कर्मफलेनैव सज्जनाः सर्वदा प्रशंस्यन्ते दुर्जनाश्च निन्द्यन्ते। भगवता व्यासेन उक्तम्-

---

1. तत्रैव - 20
2. तत्रैव – 26

**ना भुक्तं क्षीयते कर्म कल्पकोतिशतैरपि।**
**अवश्यमेव भोक्तव्यं कृतं कर्म शुभाशुभम्॥**[1]

अयमेव सिद्धान्तः केनचित् कविना अधोलिखितरुपेण निरूपितः। पङ्क्तिरियं रामचरितमानसस्य विद्यते इति केचन ब्रुवन्ति। किन्तु परिशीलनेन ज्ञातं यत् मानसे क्वापि आसाम् उल्लेखः नास्ति। परञ्च भावस्त्वत्र अतीव स्फुटः वर्तते–

**कर्म प्रधान विश्व रचि राखा। जो जस करहिं सो तस फल चाखा॥**
**सकल पदारथ हैं जग मांही। कर्महीन नर पावत नाही॥**[2]

कर्त्तव्यरूपकठोरमार्गे प्रयाणेनैव जीवनं सुवर्णायते। वस्तुतः अस्माभिः स्वीयं कर्म एव नियन्त्रयितुं परिष्कर्तुं वा शक्यते न तु तस्य फलम्। यतः फले कस्यचिदपि अधिकारः नैव भवति। श्रीमद्भगवद्गीतायामपि उक्तम्–

**कर्मण्येवाधिकारस्ते मा फलेषु कदाचन।**[3]

आचार्यः भर्तृहरिरपि कर्मणः माहात्म्यं विस्तरेण प्राकटयत्। तन्मतेन 'विधाता अपि जनस्य कर्मानुसारेणैव फलं ददाति। सोऽपि कर्मातिरिच्य फलं कस्मैचित् न ददाति। यतः विधाता कर्मणः अपेक्षया बलवान् नास्ति।'[4] 'कर्मणा एव सम्पूर्णं जगदिदं नियन्त्र्यते। तेनैव ब्रह्मा ब्रह्माण्डभाण्डोदरे कुलालवत् नियमितः, विष्णुः दशावतारगहने महासङ्कटे क्षिप्तः, रुद्रः कपालपाणिपुटके भिक्षाटनं कारितः, सूर्यश्च नित्यमेव गगने भ्राम्यते।'[5] 'हे बन्धो! सत्क्रियारूपी भगवती तत्क्षणमेव खलान् साधून्, विदुषः मूर्खान्, द्वेषिणः हितान्, परोक्षं प्रत्यक्षं, विषञ्च अमृतं कुरुते। तस्मात् तां देवीम् आराधय, व्यसनैः विपुलेषु गुणेषु वृथा आस्थां मा कुरु।'[6] 'पुंसां बुद्धिरपि कर्मानुसारिणी एव भवति, अतः बुद्धिमद्भिः सततं कर्मणः फलविषये चिन्तनं विधाय सुविचार्य च कर्म कर्त्तव्यम्'[7] अन्यथा त्वरया अविवेकेन च कृतानां कर्मणां परिणामः यावज्जीवं हृदयसन्तापकारी भवति–

**गुणवदगुणवद्वा कुर्वता कार्यमादौ**
**परिणतिरवधार्यायत्नतः पण्डितेन।**

---

1. ब्रह्मवैवर्त. प्रकृति. अ. 37
2. अज्ञातम्
3. श्रीमद्भगवद्गीता–2/7
4. भर्तृ. नीति. – 88
5. तत्रैव – 89
6. तत्रैव – 90
7. तत्रैव – 92

**अतिरभसकृतानां कर्मणामाविपत्तेर्भवति**
**हृदयदाही शल्यतुल्यो विपाकः॥**[1]

संस्कृतसाहित्ये चारित्र्यविकासार्थं मार्गदर्शनस्य प्राचुर्यं विद्यते। काव्येषु विशेषतया नाटकेषु च सदाचारपूरितानि अनेकानि तथ्यानि समुपलभ्यन्ते। अन्यत्रापि नैयून्यं नास्ति। परन्तु भर्तृहरेः नीतिशतके एकत्र मनुस्मृतिसदृशी शिक्षा, महाभारतसदृशोपदेशः, पुराणसदृशरसास्वादनं, दर्शनसदृशतर्कशीलता दृश्यते, अपरत्र कालिदासस्योपमा, दण्डिनः पदलालित्यं, भारवेः अर्थगाम्भीर्यञ्च समुपलभ्यते। नीतिशतकं मानवमात्रस्य कृते मधुरम् औषधं वर्तते। आबालवृद्धाः सर्वेऽपि विना कष्टं आनन्देन अस्य पानं कर्तुं प्रभवन्ति। कविवरेण भर्तृहरिणा नीतिशतकमाध्यमेन विशिष्टमेकं जीवनदर्शनं प्रदत्तम्। अस्य पद्यानि प्रतिपदमस्मान् प्रहरीत्वेन प्रबोध्य योग्यमार्गमानीय दिव्यं भव्यञ्च जीवनं जीवितुं प्रेरयति। अनेन मानवः किंकर्त्तव्यविमूढदशायामपि सरलं सुगमं च मार्गं प्राप्नोति। ग्रन्थोऽयं न केवलं संस्कृतज्ञानाम् अपितु सर्वेषां प्रियतमं कण्ठाभरणं विद्यते। अयं छात्राणां ब्रह्मचारीणां संन्यस्तानां गृहस्थानां जैनबौद्धादीणां तदितरेषाञ्च कृते समानरूपेण मार्गदर्शनं विधाय तान् तान् उन्नतेः उत्तुङ्गं शिखरं प्रापय्य पारस्परिकं प्रेमभावं पुष्णाति। एतद्द्वारा जनः स्वीयं दायित्वमवगत्य कर्त्तव्यपरायणः भवति। तेन च चारित्र्यविकासपुरस्सरं समाजस्य देशस्य राष्ट्रस्य विश्वस्य च विकासं साधयितुमर्हति।

✦✦✦

1. तत्रैव - 99

संस्कृत-विमर्शः 2020 ( अङ्कः 18 ) ISSN : 0975-1769

# ईदूदेद्विवचनं प्रगृह्यम् इति सूत्रविचारः

-डॉ. मधुकेश्वर भट्टः
सहाचार्यः, केन्द्रीयसंस्कृतविश्वविद्यालयः, नवदेहली

**[ व्याकरणशास्त्रे संज्ञाविधायकेषु अन्यतमं सूत्रम् ईदूदेद्विवचनं प्रगृह्यम् इति। प्रगृह्यसंज्ञायाः प्रयोजनं तु प्लुतप्रगृह्या अचि नित्यम् इति सूत्रेण प्रकृतिभावस्य विधानं विद्यते। अस्य सूत्रस्य चत्वारः पक्षाः भगवद्भाष्यकारैः न्यरूपिषत। एते चत्वारः पक्षाः कथं संभवन्ति चतुर्षु पक्षेषु के च दोषाः के च गुणाः परापतन्ति। तेषां दोषाणाम् अपाकरणं कथं व्यधायि भाष्यकारैः। उपात्तेषु पक्षेषु कतमः पक्षः भाष्यकारैः सिद्धान्तितः इति अंशाः अस्मिन् लेखे सूपत् न्यरूपि। ]**

असाधुशब्देभ्यः विविच्य साधुशब्दान् अनुशास्ति व्याकरणशास्त्रम्। अत एव भगवद्भाष्यकाराः व्याकरणशास्त्रस्य परमं प्रयोजनं शब्दानुशासनम्[1] इति समूचिरे। अत्र शब्दपदेन साधुशब्दानामेव ग्रहणम्। वैदिकलौकिकोभयविधशब्दानाम् अनुशासनं पाणिनीयव्याकरणस्य वैशिष्ट्यं विद्यते। महर्षिपाणिनिविरचितायाः अष्टाध्याय्याः प्रथमाध्यायस्य प्रथमपादे एकादशं सूत्रम् ईदूदेद्विवचनं प्रगृह्यम्। सूत्रेणानेन प्रगृह्यसंज्ञा विधीयते। ईदूदेत्, द्विवचनम्, प्रगृह्यम् पदत्रयेण सूत्रस्य विभागः। सूत्रे ईदूदेद्विवचनम् इति पदे उद्देश्यसमर्पके भवतः। प्रगृह्यमिति पदं विधायकम्। अतः ईदूदेदन्तं द्विवचनं प्रगृह्यसंज्ञं स्यात् इति सूत्रार्थः। हरी + एतौ, विष्णू + इमौ, गङ्गे + अमू, पचेते + इमौ इत्यादिषु अनेन सूत्रेण प्रगृह्यसंज्ञायां प्लुतप्रगृह्या अचि नित्यम्[2] इति सूत्रेण प्रकृतिभावः प्राप्नोति। अस्य सूत्रस्यार्थप्रतिपादनावसरे महाभाष्ये भगवद्भाष्यकारैः चत्वारः पक्षाः उपस्थापिताः।

### 1. प्रथमपक्षः

द्विवचनरूपाणाम् ईकारोकारैकाररूपाणां प्रगृह्यसंज्ञा स्यात् इति। अयमस्य सिद्धिप्रकारः– सूत्रेस्मिन् ईदूदेतां प्रथमोपात्तत्वात्, अदसो मात्[3] इति अग्रिमसूत्रे

1. अथ शब्दानुशासनम्
2. अष्टा– 06-01-125
3. अष्टा– 01-01-12

उद्देश्यांवशत्वेन उपात्तत्वाच्च विशेष्यतामाश्रित्य द्विवचनमिति पदस्य विशेषणत्वस्विकारे द्विवचनरूपाः ये ईकारोकारैकाराः ते प्रगृह्यसंज्ञकाः भवन्तीति।

**2. द्वितीयपक्षः**

गङ्गे, माले इत्यादौ एकाररूपस्य द्विवचनस्यालाभात् द्विवचनमितिपदं विशेष्यतया ईदूदेदिति तद्विशेषणतया च स्वीक्रियते तदा येन विधिस्तदन्तस्य[1] इति सूत्रेण तदन्तबोधात् ईदाद्यन्तं यत् द्विवचनं तस्य प्रगृह्यसंज्ञेति अर्थः सिद्धः इत्ययं द्वितीयः पक्षः।

**3. तृतीयपक्षः**

सूत्रेस्मिन् द्विवचनमितिपदेन औकाररूपप्रत्ययग्रहणेन 'प्रत्ययग्रहणे यस्मात्स विहितस्तादेस्तदन्तस्य ग्रहणम्'[2] इति परिभाषया तदन्तस्य ग्रहणात् द्विवचनमिति लभ्यते। तस्य च ईदूदेदिति विशेषणं भवतीति येन विधिस्तदन्तस्य[3] इति सूत्रेण तदन्तविधिः, शब्दस्वरूपमिति पदम् अध्याह्रियते। तदा ईदाद्यन्तं यत् शब्दस्वरूपं द्विवचनान्तं च भवति तत् प्रगृह्यसंज्ञकं स्यादिति तृतीयः पक्षः सिद्धः।

**4. चतुर्थपक्षः**

द्विवचनमिति विशेष्यं, तद्विशेषणम् ईदूदेदिति पदमीकाराद्यन्तमित्यर्थबोधकम्। तेन ईदाद्यन्तं यत् द्विवचनमित्यर्थे लब्धे ततः प्रत्ययग्रहणपरिभाषया[4] तदन्तस्य स्वीकारात् ईदाद्यन्तं यत् द्विवचनं तदन्तं शब्दस्वरूपं प्रगृह्यसंज्ञकमिति चतुर्थः पक्षः सिद्धः।

अत्र तृतीये चतुर्थे च पक्षे संज्ञाविधौ प्रत्ययग्रहणे तगन्तग्रहणं नास्ति[5] इति परिभाषाविरोधो यद्यपि जागर्ति, तथापि परिभाषाम् अनाश्रित्य शङ्का, परिभाषामाश्रित्य पक्षयोः परिहारः इति प्रदीपोद्योतयोः स्पष्टम्। एवं पक्षचतुष्टये प्रसक्ते कः पक्षोत्र सिद्धान्तितः भाष्यकृतेति चेत् क्रमशः गुणदोषान् एतेषु पक्षेषु विचार्य 'तस्मादस्तु स एव मध्यमः पक्षः'[6] इति द्वितीयः पक्षः सिद्धान्तत्वेन सूचितः अन्ये च निराकृताः।

---

1. अष्टा– 01-01-72
2. परिभाषेन्दुशेखरे परिभाषासंख्या– 24
3. अष्टा– 01-01-72
4. प्रत्ययग्रहणे यस्मात्स विहितस्तादेस्तदन्तस्य ग्रहणम्
5. परिभाषेन्दुशेखरे परिभाषासंख्या– 28
6. महाभाष्यम्– 01.अ– 01 पा– 05 आह्निकम् पृ.सं. 274

## प्रथमपक्षे गुणदोषाः, तन्निराकरणं च

वर्णानां विशेष्यतामाश्रित्य द्विवचनरूपाः ई,ऊ,ए, वर्णाः प्रगृह्यसंज्ञा भवन्तीति प्रथमक्षस्य स्वीकारे हरी+एतौ, विष्णू+इमौ इत्यादिसुबन्तस्थले प्रथमयोः पूर्वसवर्णः[1] इति सूत्रेण पूर्वसवर्णदीर्घे परादिवद्भावेन[2] ईकारादौ द्विवचनत्वे लब्धेपि पचेते + इमौ इत्यादौ तिङन्तस्थले अव्याप्तिः प्राप्नोति। पचधातोः कर्तरि लटि, तङि, प्रथमपुरुषद्विवचने, आतामि, शपि, टेरेत्वे अतो येयः[3] इति इयादेशे, लोपो व्योर्वलि[4] इति सूत्रेण यलोपे हि पचेते इति रूपसिद्धिः। अत्र आताम् इति द्विवचनस्य स्वरूपम्। टेरेत्वेन आते इति एकारान्तं जातम्। नत्वेकाररूपमात्रम्। तथा च एकाररूपस्य द्विवचनस्य विधीयमाना प्रगृह्यसंज्ञा एकारान्तविषयेत्र न स्यात्। ननु साक्षादेकारस्य द्विवचनत्वालाभे विधानसामर्थ्यात् एकारान्तविषये प्रवर्तते इति चेन्न। गङ्गे इत्यादौ साक्षादेकारस्य द्विवचनत्वस्थले चरितार्थत्वेन पचेते इत्येकारन्तस्थले प्रवृत्तये सामर्थ्याश्रयणस्य अयुक्तत्वात्। अतः पचेते+इमावित्यादौ प्रगृह्यसंज्ञासिद्ध्यर्थं वाक्यान्तरमारम्भणीयमिति गौरवात् मास्त्वयं पक्षः इति ईदादयो द्विवचनं प्रगृह्या इति चेदन्त्यस्य विधिः[5] इति वार्तिकेन प्रत्यपादि।

## द्वितीयपक्षे गुणदोषाः, तन्निराकरणं च

ईदाद्यन्तं यत् द्विवचनं प्रगृह्यमिति द्वितीयपक्षे पचेते इत्यादोविष्टसिद्धावपि ईकारोकारमात्रयोः द्विवचनत्वस्थले खट्वे+इति, माले+इति इत्यादौ द्विवचनस्य ईदाद्यन्तत्वं नेति प्रगृह्यसंज्ञायाः अव्याप्तिः प्राप्नोति। अतः एकस्यैव वर्णस्य द्विवचनत्वस्थले संज्ञार्थमस्मिन् पक्षेपि वचनान्तरमारब्धव्यमिति गौरवमेव। ननु वचनसामार्थ्यात् ईकारान्तोकारान्तयोः उक्तावपि ईकरोकारयोः द्विवचनत्वस्थले प्रगृह्यसंज्ञाप्रवृत्तिः कल्प्यताम्। अन्यथा ईकारान्तद्विवचनालाभे तदुद्देशेन प्रगृह्यसंज्ञाविधिरेव वैयर्थ्यापत्तेः इति चेन्न। अत्रैवं सामर्थ्यात् ईकारोकारद्विवचनविषये प्रवृत्तावपि खट्वे इति, माले इति इत्यादौ एकाररूपद्विवचनस्थले सामर्थ्याश्रयणानुपपत्या एकारान्तत्वाभावेन प्रगृह्यसंज्ञाया अनापत्तेः दुर्निवारत्वात्।

तथाहि—खट्वाशब्दात् प्रथमाद्विवचने, खट्वा+औ इति स्थिते, औङ आपः इति सूत्रेण औङः शीभावे, गुणेनैकारे एकादेशे, परादिवद्भावेन तस्य द्विवचनत्वेपि एकारान्तत्वाभावेन एतत्सूत्राप्रवृत्या दोषात्। नच एदित्यंशेपि सूत्रे सामर्थ्यमाश्रित्य

---

1. अष्टा– 06-01-102
2. अन्तादिवच्च (06-01-85) इति सूत्रेण
3. अष्टा– 07-02-80
4. अष्टा– 06-01-66
5. महाभाष्यम्– 01.अ– 01पा– 05आह्निकम् पृ.सं. 272

एकारान्तद्विवचनालाभेन एकाररूपद्विवचनस्थले प्रवत्त्यङ्गीकारे न दोषः इति वाच्यम्। पचेते इत्यादितिङन्तस्थले आते इत्यादेरेकारन्तस्य सम्भवेन सामर्थ्याश्रयणानुपपत्तेः। नच आभ्यामित्यादाविव विष्णू+इमावित्यादौ एकवर्णस्थले आद्यन्तवदेकस्मिन्[1] इति पूर्वान्तवद्भावात् एकारान्तत्वं द्विवचनस्य संभवतीति तदर्थं वचनान्तरं न कल्प्यमिति वाच्यम्। तदा आद्यन्तवद्भावाश्रयणस्य गौरवस्य प्रसङ्गात्। अतः पक्षोयमपि न युक्तः इति।

### तृतीयपक्षे गुणदोषाः, तन्निराकरणं च

ईदाद्यन्तं द्विवचनान्तं च यत् शब्दस्वरूपं तत्प्रगृह्यसंज्ञकमिति तृतीयपक्षेपि यद्यपि पचेते इत्यादौ हरी, विष्णू इत्यादौ च ईदाद्यन्तस्य द्विवचनान्तत्वस्य च सत्वादिष्टसिद्धिः, तथापि वार्तिककृतात्रैवं दोषान्तरमाशङ्कितम्– 'ईदाद्यन्तं द्विवचनान्तमिति चेत् लुकि प्रतिषेधः'[2] इति वार्तिकेन। अस्यायमाशयः– पक्षेस्मिन् कुमार्योरगारम्– कुमार्यगारम्, वध्वोरगारम् वध्वगारमित्यादौ कुमारीवधूशब्दयोः अगारशब्देन समासे सुपो धात्वित्यादिना सुब्लुकि, स्वतः ईकारेकारान्तत्वात् प्रत्ययलक्षणन्यायेन द्विववचनान्तत्वाच्च अनेन प्रगृह्यसंज्ञायाः अतिव्याप्तिः स्यात्। प्रकृतिभावश्च प्रवर्तेत। तद्दोषवारणाय वाक्यान्तरञ्चारम्भणीयं स्यात् इति। अत्रेयमाशङ्का ननु कुमार्यगारम् इत्यादौ प्रगृह्यसंज्ञा न प्रवर्तते। ईदूतौ च सप्तम्यर्थे[3] इति प्रगृह्यसंज्ञासूत्रे अर्थे इति पदग्रहणसामर्थ्यात् प्रगृह्यसंज्ञाविषये सुब्लुकि प्रत्ययलोपे प्रत्ययलक्षणन्यायो न प्रवर्तते इति ज्ञाप्यमान्वात्। यदीह सुब्लुक्स्थले प्रत्यलक्षणन्यायः प्रवर्तेत तर्हि ईदूतौ सप्तमी इति सूत्रन्यास एव स्यात्। सप्तमीति प्रत्ययग्रहणेन तदन्ते लब्धे ईदूतावित्यस्य तद्विशेषणतया तदन्तविधौ ईदूदन्तं यत् सप्तम्यन्तं तत् प्रगृह्यमित्यर्थलाभात् सोमो गौरी अधिश्रितः इत्यादौ ङेः सुपां सुलुगित्यादिना लुक्यपि प्रत्ययलक्षणन्यायेन सप्तम्यन्तत्वात् स्वतः ईकारान्तत्वाच्च प्रगृह्यसंज्ञायाः सिद्धौ सप्तम्यर्थे पर्यवसन्नम् ईदूदन्तं प्रगृह्यमिति अर्थलाभाय कृतमर्थग्रहणं व्यर्थीभूयैतत् ज्ञापयति। प्रगृह्यसंज्ञाविषये प्रत्ययलक्षणन्यायो नेति तेन ईदूदन्तत्वेपि द्विवचनान्तत्वाभावात् सूत्राप्रवृत्तौ तदर्थं कृतमर्थग्रहणं स्वांशे चरितार्थमित्यदोषः इति।

**अत्रेदं समाधानम्–** ईदूतौ च सप्तम्यर्थे इति सूत्रे तत्तर्हि ज्ञापकमर्थग्रहणं कर्तव्यम् इति प्रश्नेन प्रकृतार्थज्ञापकतायामनादरं संसूच्य मा वा पूर्वपदस्य भूत् इत्यंशेन अर्थग्रहणस्य अन्यार्थोपपादनेन लुकि प्रत्ययलक्षणाभावज्ञापकत्वायोगस्य भाष्यात् प्रतीत्या कुमार्यगारम् इत्यादौ दोषस्तदवस्थ एव। तथाहि अर्थग्रहणाभावे सप्तम्यन्तस्य

1. अष्टा– 01-01-21
2. महाभाष्यम्– 01.अ– 01पा– 05आह्निकम् पृ.सं. 273
3. अष्टा– 01-01-18

ईदन्तादेः प्रगृह्यसंज्ञेति सूत्रार्थलाभेन वाप्यश्वः इत्यादिसमासेषु पूर्वपदस्य वापी इत्यादेः प्रत्ययलक्षणेन सप्तम्यन्तत्वात् स्वतः ईदन्तत्वाच्च प्रगृह्यसंज्ञाया अतिव्याप्तिः दुर्वारा स्यात्। अतस्तत्र प्रकृतिभाववारणाय कृतमर्थग्रहणं सप्तम्यर्थे प्रयवसन्नस्यैव ईदूदन्तस्य प्रगृह्यसंज्ञा नान्यस्येति ज्ञापयति। तथा च समासेषु रूढिस्थले जहत्स्वार्थावृत्या समुदायस्यैवार्थबोधकतया अवयवस्यानर्थकत्वेन वापी इत्यादेः पूर्वपदस्य सप्तम्यर्थे पर्यवसन्नं नास्तीति नातिव्याप्तिः। एवमेतादृशस्थले दोषवारणायोक्तार्थज्ञापनाय चरितार्थमर्थग्रहणं लुकि प्रत्ययलक्षणाभावं ज्ञापयितुमक्षममिति कुमार्यगारमित्यादौ दोषस्य तादवस्थ्यात् अयम्पक्षोपि न युक्त इति तदाशयः।

## चतुर्थपक्षे गुणदोषाः, तन्निराकरणं च

ईदाद्यन्तं यत् द्विवचनं तदन्तं शब्दस्वरूपं प्रगृह्यमिति चतुर्थपक्षे द्विवचनस्य ईकाराद्यन्तत्वाश्रयणेन कुमार्यगारममित्यादौ लुप्तस्य ओसः द्विवचनत्वेपि ईदीद्यन्तत्वाभावात् यद्यपि नातिव्याप्तिः। तथापि पक्षेस्मिन् शुक्ल्यास्तां वस्त्रे इत्यादौ च्विप्रत्ययान्तस्थले प्रगृह्यसंज्ञा प्रवर्तेत। तथाहि अशुक्ले वस्त्रे शुक्ले समपद्येताम् इत्यर्थे अभूततद्भावे कृभ्वस्तियोगे सम्पद्यकर्तरि च्विः[1] इति सूत्रेण शुक्लशब्दात् च्विप्रत्यये शुक्ल+च्वि इति स्थिते च्वेस्सर्वस्य लोपे तद्धितान्तत्वात् प्रातिपदिकत्वे तदवयवस्य औप्रत्ययस्य सुपो धातुप्रातिपदिकयोः[2] इति सूत्रेण सुब्लुकि प्रत्ययलक्षणन्यायेन च्विपरत्वात् अस्य च्वौ इति सूत्रेण ईत्वेन निष्पन्नं हि शुक्ली इति प्रातिपदिकम्। अस्मात् जातस्य औ इति द्विवचनप्रत्ययस्य नपुसंकाच्च[3] इति सूत्रेण शीभावे च्विप्रत्ययस्य ऊर्यादिच्विडाचश्च[4] इति सूत्रेण निपातत्वेन तदन्तस्य स्वरादिनिपातमव्ययम्[5] इति निपातत्वात् ततः परस्य शी इत्यस्य अव्ययादाप्सुपः[6] इति सूत्रेण लुकि प्रत्ययलक्षणेन शुक्ली इत्यस्य ईकारान्तं यद् द्विवचनं तदन्तमस्तीति प्रगृह्यसंज्ञा आपद्येत, प्रकृतिभावश्च दुर्वारः स्यात्।

अत्रावन्तरशङ्केयमुत्थाप्यते यत् च्विप्रत्ययान्तात् शुक्लीशब्दात् तद्धितान्तत्वात् प्रातिपदिकत्वेन जातस्य औङः युगपत् औङश्शी इति शीभावस्य अव्ययादाप्सुपः[7]

---

1. अष्टा– 05-04-50
2. अष्टा– 02-04-71
3. अष्टा– 07-01-19
4. अष्टा– 01-04-61
5. अष्टा– 01-01-37
6. अष्टा– 02-04-82
7. अष्टा– 02-04-82

इति लुकश्चोभयोः प्राप्तौ विप्रतिषेधे परं कार्यम्[1] इति परत्वेन शीभावे प्राप्तेपि नित्यत्वात् लुकः तद्बाधकतया प्रथमतः प्रवृत्तेः। शीभावे कृते, अकृते च लुकः प्रसङ्गात् शीभावस्य तु लुकि कृते औङोभावेन अप्रसङ्ग इत्यनित्यत्वात्। तथा च शीभावाप्रवृत्या प्रत्ययलक्षणन्यायेन द्विवचनान्तत्वेपि तस्य ईदन्तत्वाभावे नैतत्सूत्राप्रवत्या तत्रातिव्याप्तिर्न प्रसङ्गः इति।

तन्न– यथा शीभावः अकृते लुकि भवति कृते तु न भवतीत्यनित्यः, तथा लुगपि शीभावे कृते ईकारस्य, कृते तु औकारस्येति शब्दान्तरस्य प्राप्त्या शब्दान्तरस्य प्राप्नुवन्विधिरनित्यः इति न्यायेन अनित्य एवेति, उभयोरनित्ययोः परत्वस्यौव बाधकत्वेनाश्रयणात् शीभावे प्रवृत्ते ततो लुकि प्रत्ययलक्षणन्यायेनोक्तदोषस्य तदवस्थत्वात्।

दोषान्तरेणापि चतुर्थपक्षनिराकरणम्- किञ्च यदि तु लुकः अव्ययादाप्सुपः इति सुब्मात्रविषयत्वात् स्थानिविशेषाविवक्षया प्रवृत्तिराश्रीयते तदा कृताकृतप्रसङ्गन्यायेन नित्यो लुक् शीभावस्य बाधक एवेति तदपेरवृत्त्या प्रत्ययलक्षणन्यायेन ईकारान्त-द्विवचनान्तत्वासम्भवान्न दोषः। इत्युच्यते तर्हि तदपि दोषान्तरस्य सत्त्वेनास्य पक्षस्य सम्भव एव नेति निरूप्यते भाष्यकृता अथापि कथञ्चित् नित्यो लुक् स्यात् एवमपि दोषः इत्यादिना इदञ्च प्रत्ययग्रहणमयञ्चापि संज्ञाविधिः[2] इत्यन्तेन ग्रन्थेन।

**अस्यायमाशयः–** प्रगृह्यमिति संज्ञाविधायके अस्मिन् सूत्रे द्विवचनमिति पदं प्रत्ययग्रहणम्। तेन प्रत्ययग्रहणपरिभाषया तदन्तग्रहणं यदि सिषाधयिषितं तर्हि सुप्तिङन्तं पदम्[27] इति सूत्रे अन्तपदेन ज्ञापितया संज्ञाविधौ प्रत्ययग्रहणे तदन्तग्रहणं नास्ति इति परिभाषया विरोध आपद्येत। तेन तदन्तविध्यलाभात् ईदाद्यन्तं यत् द्विवचनं तदन्तमिति सूत्रार्थो व्याख्यातुं न शक्यते। एवमयेमेव निषेधः ईदाद्यन्तं यत् द्विवचनान्तञ्चेति तृतीयपक्षस्योत्थानमपि प्रतिबध्नाति। अपि च ईकारान्तं यत् द्विवचनं तदन्तं प्रगृह्यमिति चतुर्थेस्मिन् पक्षेपि गङ्गे+अमू, खट्वे+इमे इत्यादौ एकारमात्रस्य द्विवचनत्वस्थले एकारान्तत्वसिद्ध्ये द्वितीयपक्षे इव आद्यन्तवद्भावः आश्रयणीयः स्यादिति गौरवं महत् स्यात्– इति।

## द्वितीयपक्षस्य सिद्धान्तरूपेण स्थिरीकरणम्

एवं क्रमेण पक्षचतुष्टयेपि गुणदोषौ विचार्य भगवान् भाष्यकारः अवश्यं खल्वस्मिन्नपि पक्षे आद्यन्तवद्भाव एषितव्यः तस्मादस्तु स एव मध्यमः पक्षः[3] इति वाक्येन ईदाद्यन्तं यत् द्विवचनमिति द्वितीयः पक्षः एव सिद्धान्तपक्षः इति समसूचयत्।

---

1. अष्टा– 01-04-02
2. महाभाष्यम्– 01. अ-01 पा-05 आह्निकम् पृ.सं. 274
3. महाभाष्यम्– 01. अ-01 पा-05 आह्निकम् पृ.सं. 274

तथाहि द्वितीयपक्षे केवलमेकाररूपद्विवचनस्थले गङ्गे इत्यादौ एकारान्तत्वसिद्धये आद्यन्तवद्भावोङ्गीकर्तव्य इति गौरवं प्रदर्शितम्। चतुर्थपक्षे तु तेन सह परिभाषान्तर-रूपविरोधरूपं दोषान्तरमपीत्येतदपेक्षया लाघवात् आभ्यामित्यादौ आवश्यकत्वात् क्लृप्तस्य आद्यन्तवद्भाश्रयणमेव युक्तमिति भाष्याशयः। अस्य चतुर्षु पक्षेषु मध्यमत्वं कथमिति चेत् तृतीय-चतुर्थपक्षयोः संज्ञाविधाविति परिभाषाविरोधेन असमभरूपसाम्य-देकत्वमिति मत्वा पक्षत्रयधिया द्वितीयपक्षस्य मध्यमत्वं सिध्यतीति उद्योते स्पष्टम्।

**आकरग्रन्थाः**


1. व्याकरणमहाभाष्यम्, संपादकः- श्री गुरुप्रसादशास्त्री, प्रकाशकः- राष्ट्रियसंस्कृत-संस्थानम्, नवदेहली 2006
2. अष्टाध्यायी - संपादकः आचार्य पं. सत्यनारायणशास्त्री खण्डूडी, प्रकाशकः कृष्णदास अकादमी, वाराणसी-1985
3. परिभाषेन्दुशेखरः संपादकः हर्षनाथ मिश्रः , प्रकाशकः- राष्ट्रियसंस्कृतसंस्थानम्, नवदेहली-1987
4. वैयाकरणसिद्धान्तकौमुदी - संपादकौ - गिरिधर शर्मा चतुर्वेदः, परमेश्वरानन्द विद्याभास्करः, प्रकाशकः- मोतिलाल बनारसीदास, पुनर्मुद्रणम् -2011


✦✦✦

 ISSN : 0975-1769

# महाकविकालिदासस्य काव्येषु राजधर्मनिरूपणम्

**-डॉ. शिव कुमार मिश्रः**
संस्कृतविभागाध्यक्षः
कुँवरसिंह महाविद्यालयः, लहेरियासराय
ल.ना.मि.विश्वविद्यालय, दरभंगा–846003

**[ काव्यं समाजस्य दर्पणः भवति। अतः एव काव्येषु सर्वे समाजिक-विषयाः अन्तर्भूताः भवन्ति। अस्मिन् लेखे कालिदासस्य काव्येषु निरुपिताः राजधर्मविचाराः सूपत् प्रस्तुताः। ]**

**राष्ट्रेषु भारतं भव्यं भव्यः संस्कृतवाङ्मयः।**
**तत्रत्या संस्कृतिर्धन्याः संस्कृतसाधकाः॥**
**मूर्धन्यः सुरभारत्याः कालिदासो महाकविः।**
**कृतित्त्वयशस्य यस्य शोभते सुरभारती॥** तथास्तु॥

अखिल–कविकुलललामभूतस्य कविकुलगुरोः कालिदासस्य कविताकामिनी बहुजन–हिताय, बहुजन–सुखाय, सर्वलोकोपकाराय च वर्तत इति विदितचरमेव विदुषाम्। सम्प्रति राजधर्मविमुखा राजानः सततमात्मानं कलङ्कयन्ति। प्रजाः वंचयन्तीति व्यवहारं दृष्ट्वा चेखिद्यते मनः। अतः साम्प्रतिके युगे कालिदासस्य काव्ये वर्णिताः राजधर्माः श्लाधनीया उपयोगिनश्च सन्ति। राजधर्म–निरूपणं कालिदासेन यादृशं कृतं स्वकीये काव्ये न तादृशमन्यत्र दृश्यते श्रूयते च। यत्तु काव्यगतं प्रयोजनं प्रतिपादयता मम्मटेनावादि–

**काव्यं यशसेऽर्थकृते व्यवहारविदे शिवेतरक्षतये।**
**सद्यः परनिर्वृत्तये कान्ता सम्मिततयोपदेशयुजे॥**[1]

तत्र वयमिदं विचारयामो यद् व्यवहारज्ञानाय राजादिगतोचिताचार–ज्ञानाय वा काव्यशास्त्रस्य परमावश्यकत्वमस्तीति सर्वथा काव्यस्यानुशीलनं कर्त्तव्यमेवेति प्रतिपादितं भवति। अतश्चावश्यकं प्रतिभाति यत् काव्यशास्त्राध्ययनं विना कृतश्रमाः

---

1. काव्यप्रकाशे?

अपि विद्वांसः समाजे समादरं नैव लभन्ते। किं बहुना काव्यशास्त्रापरिशील-नाल्लौकिकाचार-विचारव्यवहार-विज्ञान-विधुराः सन्तः राजनेतारः समाजे हास्यतां व्रजन्ति। अतः ते संसारयात्रा-निर्वाहाय राजधर्मपरिपालनाय च कालिदासीयां शिक्षामासादयेयुरिति मे मतिः। कालिदासस्य काव्ये सर्वत्र प्रतिपदं राजधर्मः प्रतिपादितः। इदं प्रतिभाति यद् धर्महीना राजनीतिः वेश्येव विगर्हिता हेया च भवति। अतः कालिदासेन धर्मानुमोदिता राजनीतिः स्वीकृता, अभिज्ञानशाकुन्तलस्य पंचमाङ्के कंचुकिनः उक्तिद्वारा—

**आचार इत्यवहितेन मया गृहीता**
**या वेत्रयष्टिरवरोध-गृहेषु राज्ञः।**
**काले गते बहुतिथे मम सैव जाता**
**प्रस्थान-विक्लव-गतेरवलम्बनार्था।।**[1] इति

उपर्युक्त-पद्ये कविनाऽऽचारस्य चर्चा कृता। तत्र को नामाचारः इति प्रश्ने आचारो नियमः सत्सम्प्रदायो धर्मश्च निरूपितो भवति। स च सर्वथा पालनीयो ग्राह्यश्चेति धिया कथमपि राज्ञा न हेयः। "आचारहीनं न पुनन्ति वेदाः" "आचारः परमो धर्मः" इत्यादयो बहवो नियमाः राजानं प्रतिबोधयन्ति धर्मानुष्ठानाय। राजधर्ममनादृत्य राजानः कथमपि लोकान् रंजयितुं नैव प्रभवन्ति। तथैव कंचुकी प्रतिपादपति यद् "भोः कामं धर्मकार्यमनतिपात्यं देवस्य, तथाऽपीदानीमेव धर्मासनादुत्थिताय पुनरूप-रोधकारि कण्वशिष्यागमनमस्मै नोत्सहे निवेदयितुम्। अथवा अविश्रमोऽयं लोकतन्त्राधिकारः"। उपर्युक्त-विवेचनया स्पष्टं प्रतिभाति यदिह लोकतन्त्रो वर्णाश्रम-लक्षितस्य प्रजाजनस्य योगक्षेमाय सर्वदैव राज्ञा भाव्यमिति। प्रथितमिदं यल्लोकतन्त्रो लोकाधीनः तन्त्राधिकारः प्रधानाधिकारो भवति। न हि स्वतन्त्रेण मनसा राज्ञा किमपि कर्त्तुं शक्यते किन्तु प्रजापालनाधिकारः प्रजानुरोधनैव सम्पादयितुं शक्यते। किं बहुना प्रजापालन-तत्परेण राज्ञा कथमपि विश्रमो नाश्रयणीय इति राजधर्मः। उक्तं हि तत्रैव—

**भानुः सकृद् युक्त-तुरंग एव रात्रिन्दिवं गन्धवहः प्रयाति।**
**शेषः सदैवाहित-भूमिभारः षष्ठांश-वृत्तेरपि धर्म एषः।।**[2]

अत्र पद्ये विश्रामानपेक्षस्य सार्वकालिक-प्रवृत्यात्मकस्य राजधर्मस्य वाक्यचतुष्टयेन प्रतिपादनं कविना कृतम्। विचारयन्तु सुधियो यद् भगवान् भास्करः सकृदेव रथे तुरङ्गमान् संयोज्य अविरतं पर्यटति। यतो हि कालात्मा भगवान् भास्करः क्षणमपि विश्रान्त्यपेक्षया यदि विलम्बते तर्हि कालगतिः कुण्ठिता स्यात्

1. अभिज्ञानशाकुन्तले-5-3।
2. अभिज्ञानशाकुन्तले-5-4।

अव्यवस्था च भवेत्। जगत्-प्राणो मारूतः अहोरात्रमविरतं प्रयाति यदि क्षणमपि तिष्ठेत्तर्हि विनश्येयुरिमाः प्रजाः। एवमेव शेषोऽपि पृथ्वीमकम्पेन शिरसा धारयति। इत्थं चोर्ध्वलोकस्थौ सूर्यवायू, अधोलोकस्थो भगवाननन्तश्च यथा समुज्झित-निज-सुखाः सर्वदा परार्थमेव प्रयतन्ते तथैव साम्प्रतिकैः राजनेतृभि-र्भाव्यमिति कालिदासस्याभिप्रायः। तथा च प्रजा-षष्ठांशभुजां राज्ञामपि स्वसुखमनपेक्ष्य सर्वथा प्रजापरिपालनं धर्म इति विज्ञेयः। धर्मासनस्थो हि राजा स्वापत्यनिर्विशेषं प्रजाजनान् परिपाल्य तान् स्वे स्वे कर्मणि नियोजयन् तेषां विवादांश्च शमयन् तन्निरूप-सर्गान् विधाय धन्यमात्मानं मन्यते। उक्तं हि-

**प्रजाः प्रजाः स्वा इव तन्त्रयित्वा निषेवतेऽशान्तमना विविक्तम्।**
**यूथानि संचार्य रविप्रतप्तः शीतं दिवा स्थानमिव द्विपेन्द्रः॥**[1]

राज्ञः धर्मो विद्यते यत् स सर्वदेवात्मनः सुखादिसाधनमनपेक्षमाणः प्रजाजनस्य सुखसम्पादनार्थमविरतं प्रयासं कुर्यादिति। आत्मसुख-निरपेक्षा प्रजाजनसुख-सम्पादन-प्रयत्नात्मिका प्रवृत्तिः राज्ञः भवेदिति विवेचनेन प्रतिभाति। सा च नैव सम्प्रति श्रूयते अनुभूयते वा। जनानां राज्ञां वा का चर्चा स्थावरादयोऽपि मूर्ध्ना मध्यन्दिन-देदीप्यमान-प्रचण्ड-मार्तण्ड-प्रखरांशुजालं सर्वदा सहमानाः स्वतलोपविष्टानां पथिकानां छायादानेनातपसन्तापं दूरीकुर्वन्ति। उक्तं हि तेनैव-

**स्वसुख-निरभिलाषः खिद्यसे लोकहेतोः**
**प्रतिदिनमथवा ते वृत्तिरेवं-विधैव।**
**अनुभवति हि मूर्ध्वा पादपस्तीव्रमुष्णं**
**शमयति परितापं छायया संश्रितानाम्॥**[2]

एवमेव राजधर्म-निरूपणप्रसंगं सविस्तरं वर्णयता तेन प्रतिपादितं यत् विमार्गप्रस्थिताः जनाः सत्पथे स्थापनीयाः, दण्डेन दुर्वृत्ताः नियमनीयाः। यदुक्तं मनुना-

**तदर्थं सर्वभूतानां गोप्तारं धर्ममात्मजम्,**
**ब्रह्मतेजोमयं दण्डमसृजत् परमेश्वरः।**
**स्वराष्ट्रे न्याय-वृत्तिः स्यादग्रदण्डश्च शत्रुषु**
**सुहृत्स्वजिह्मः स्निग्धेषु ब्राह्मणेषु क्षमान्वितः॥**[3]

---

1. अभिज्ञान शाकुन्तले-5-5।
2. अभिज्ञान शाकुन्तले-5-7।
3. मनुस्मृतौ-7.4.32।

तथा च राज्ञः प्रथमं कर्त्तव्यं भवति यद् वैभवेन प्रजासु सर्वविध-सम्पत्ति-पोषणं कुर्यात्। कलह-शमनात् सुहृद्रक्षणात् पुत्रवत् प्रजा-परिपालनाद्राजा भवति। तथाहि–

**नियमयसि विमार्गप्रस्थितानात्तदण्डः**
**प्रशमयसि विवादं कल्पसे रक्षणाय।**
**अतनुषु विभवेषु ज्ञातयः सन्तु नाम**
**त्वयि तु परिसमाप्तं बन्धुकृत्यं प्रजानाम्।।**[1]

यथा जलफलागमैर्धना वृक्षाश्च नम्राः भवन्ति तथैव परार्थघटकानां सत्-पुरूषेषु परोपकारिषु च नम्रत्वेन स्वभावत एव भवितव्यम्। उद्धता राजानः नैव प्रजापरिपालनाय समर्था इति सूचितम्। यस्य राज्ञः शासने निर्विघ्न-तपसो मुनयः धर्मक्रियासु प्रवर्तन्ते स राजा अभ्यर्थनीयो भवति। यथा तत्रैव प्रतिपादितम्–

**कुतो धर्मक्रियाविघ्नः सतां रक्षितरि त्वयि।**
**तमस्तपति धर्मांशौ कथमाविर्भविष्यति।।**[2]

रघुवंशेऽपि कविना एवमेव सविस्तरं प्रतिपादितम्–

एतेन वर्णनेनेदं प्रतिभाति यत् प्रतापोपेतो राजा एव वर्णाश्रमक्रिया-प्रवर्तको भवति। राजति, दीप्यते, रंजयति वा, इति व्युत्पत्त्या राजशब्दो निष्पद्यते। उक्तं हि तत्रैव "अर्थवान् खलु मे राजशब्दः" इति। कालिदासस्य काव्ये राजधर्मस्य परिपालनं सर्वत्र दृग्गोचरीभवति। ऋष्यागमनावसरे "कुशली कण्व" इति वचसा मनुना प्रतिपादितं राजधर्ममेवानुसरति कविः। उक्तं हि मनुना–

**ब्राह्मणं कुशलं पृच्छेत् क्षत्रबन्धुमनामयम्।**
**वैश्यं क्षेमं समागम्य शूद्रमारोग्यमेव च।।**[3]

यः खलु राजा आत्मनः स्खलितमपि न जानाति स कथं प्रकृतिषु को जनः केन पथा प्रचरतीति वेत्स्यति? तथा चात्मसम्बन्ध-विषयेऽपि सम्यगनुशीलनं कर्त्तव्यमिति राजधर्मः स्वयमसिद्धः परान् कथं साधयेत् इति धिया स्वयमनभिज्ञः कथं ब्रूयाद् यन्न प्रजासु मे पापः कोऽपि विद्यते। एतावतात्मशुद्धिः सर्वथा समपेक्षिता विद्यते। न हि पापात्मा राजा कथमपि लोककल्याणाय प्रभवति। उक्तं हि–

**अहन्यहन्यात्मन एव तावज्ज्ञातुं प्रमादस्खलितं न शक्यम्।**
**प्रजासु कः केन पथा प्रयातीत्यशेषतः को नु विदाङ्करोतु।।**[4]

---

1. अभिज्ञानशाकुन्तले-5-8।
2. अभिानशाकुन्तले-5-14।
3. मनुस्मृतौ–1.27।
4. अभिज्ञानशाकुन्तले-6-26।

आर्त्तत्राणमपि राज्ञः प्रथमं कर्त्तव्यमिति ज्ञात्वा प्रजासु भयं न स्यादित्यर्थं सर्वतोभावेन तेन यतनीयमिति। उक्तं हि तत्रैव–

**आर्त्तानां भयमपनेतुमात्तधन्वा,**
**दुष्यन्तस्तव शरणं भवत्विदानीम्।।**[1]

राजधर्म-निरूपणावसरे भरतवाक्येऽपि साटोपं प्रकृतिहितादयो धर्माः निरूपिताः। "पृथिवी-पतिः प्रकृति-हिताय प्रवर्तताम्" इत्यनेनेदं सूचितम् यत् सप्तांगी प्रकृतिर्भवति तस्यायमभिप्रायो यन्न त्वात्मतुष्टये किन्तु पौर-श्रेणी-हिताय सर्वथा यतनीयमिति। प्रकृतिशब्देन स्वाम्यादिराख्याङ्गानि कथ्यन्ते। "राज्याङ्गानि प्रकृतयः इत्यमरः।"। याज्ञवल्क्येनापि प्रतिपादितम्–

**स्वामी जनपदोऽमात्यः कोशो दुर्गबल सुहृत्।**
**राज्यं सप्तप्रकृत्यङ्गं नीतिज्ञाः सम्प्रचक्षते।।**[2]

इत्थञ्च सप्ताङ्गप्रकृति-युक्तो राजा लोकविलक्षणो भवति। अतो राज्ञा बुद्ध्यादिसम्पन्नेन प्रकृत्यादि-युक्तेन च भवितव्यमिति। एवम्भूतो राजाऽप्रमत्तां भवति। अन्यथा राज्ञः स्वरूप-हानिरपि भवितुमर्हतीति ध्येयम्। माघेनापि शिशुपालवधमहाकाव्ये स्वकीयं तात्पर्यमत्रैव रक्षितम्।

**शिव कुमारमिश्रेण निरूपितं यथामति।**
**संस्कृतस्य प्रचारार्थं राष्ट्रकल्याण वांछया।।**

✦✦✦

---

1. अभिज्ञानशाकुन्तले-6-27।
2. याज्ञवल्क्यस्मृतौ-3-53।

 ISSN : 0975-1769

# Prāṇāyāmaparāyaṇāḥ

**-Smt. Uma K.N.**
Research Scholar, Kuvempu University,
Sanskrit Muvempu University, Shivamogga

**[अस्मिन् लेखे प्राणायामस्य किं प्रयोजनम्, शरीरमनसोः कीदृशं प्रभावं जनयति, प्राणायामस्य कः अर्थः इत्यादिविषयाः अस्मिन् लेखे निरूपिताः।]**

*Pranayama* is an integral part of yoga. It is an art as well as science to demonstrate with certain cause and effect as shown in Indian philosophical texts. This article is an effort towards the examination on this core aspect of Pranayama.

Visionary seers visualized the body and mind relation, effects of breath on the body and mind etc. in Upanisads and Yogasastra. Breathe controls and governs various functions of the physical body. Nuero-biologists, by their experiment have found certain areas in the brain, which gets triggered by neuron generated electric signals. These cause for different emotions like anger, laugh, agony, happiness etc. Seers have visualized that it is possible to trigger such emotions and calm down them also through yogic techniques like pranayama, stimulating the brain parts.

The imbalance in the breathing disturbs the physiological functions. Diseases like diabetes, irritable bowel syndrome, migraine, hypertension, asthma etc are the causes for disturbing breathing method. It can be eliminated by various breathing patterns, Pranayama and asana-s.

## Respiration in human beings

By means of breathing every cells of the body receives oxygen. It cleans the byproducts of oxidation. Oxygen combined with the hydrogen and carbon of the tissues enables the metabolic

process in each individual cell. In this process waste products in the form of carbon dioxide and water are eliminated. The respiration works like an engine, by which energy is released from food in our body. The respiratory system is also called gas exchange system. This system consists of certain organs like nose, pharynx, larynx, trachea, bronchi, lungs, alveoli or air sacs.

**Bridge to mind and body**

Respiratory system connects body and mind like a bridge, since it can be both voluntary and involuntary. The signal-genesis centers of the brain, which is the highest centre of intelligence and creativity, controls the lower brain and physiology of the body.

The brain has three main parts. They are cerebrum, cerebellum and brainstem. The largest part in the brain is Cerebrum; it has right and left hemispheres. Under the cerebrum, Cerebellum is located. Brainstem works acts as a relay center connecting the cerebrum and cerebellum to the spinal cord.

The respiratory center in the brainstem is medulla. It is connected to and nearest to the spinal cord. This is primarily responsible for controlling human breathing rate. It directs the spinal cord to maintain breathing and the Pons which is near to medulla provides further smooth respiratory pattern. Without our knowledge, direction for involuntary or automatic breathing comes from here. While sleeping etc involuntary respiration happens when voluntary respiration is not possible.

Hypothalamus is situated above the mid-brain. It controls and governs all involuntary functions in the body; autonomic nerves system and the endocrine systems are under the hypothalamus. The higher-centers of the brain govern the voluntary functions through the voluntary nervous system. The connection between this voluntary nervous system and hypothalamus are essentially through the higher centers of the brain and is very feeble in normal human beings. The respiratory system is innately connected by the nerves of this voluntary nervous system too. Hence, we can voluntarily change the breathing rate, pattern, rhythm, etc. by directing our will towards the same, essentially bringing the voluntary nervous system to override the hypothalamic autonomic control.




By systematically regulating the speed and rhythm of breathing through voluntary nervous system, the autonomic functions also change. Many yogis have invented various types of Systematic breathing or engineering on the breathing called as pranayama-s by name Anuloma Viloma, Bhstrika, Sitali, Sitkari, Ujjayi etc.

The autonomic system is closely connected with the physiological processes such as absorption, respiration, immune system, etc. The sympathetic nervous system or fight-flight-response gets activated whenever we encounter stressful situations or fell anxious. When the sympathetic nervous system gets too much work, our body and mind suffer. The over work and stress on this, lowers the blood flow to the gastrointestinal tract and increases blood pressure resulting indigestive, cardiovascular related troubles, and other problems. Yogic breathing techniques kick-start the activity of parasympathetic nervous system (or the calm connect response) which allow us to recoup from the stressful daily work. The slow, deep breathing brings a sense of calmness. *"The biological research shows that a small part of the air we breathe through nostrils goes*

*directly to the brain via the Olfactory lobe and rest (major portion) goes to the lungs supplying the necessary oxygen to the blood. The inhaled breathe affects the mind and the body directly. Moreover, the air we breathe has a direct impact, on our brain. Scientists have also found breathing through one Nostril affects part of the brain on that side and thus the practice of inhaling through one nostril during Pranayana could be to stimulate that side of the brain"*[1].

Modern biological science states that there are ten areas of the brain; of them we are using only one at our present stage of evolution. To use the other ninety percent/nine areas, we have to make the area active through Prana to awaken them. The sub-conscious mind and its relationship to the conscious mind are dealt within pranayama by the establishing an interface between the conscious and sub-conscious minds in the area of the brain called the Reticular Activating System (RAS). As told by biological scientists, RAS is a network of neurons located in the brain stem considered as one of the most important system which facilitates the functioning of sensation and attention. This is made up of a net-like bundle of neurons that run through the hind brain, mid brain and part of the fore-brain called hypothalamus. The RAS is the trigger for other parts of the brain. Any person is able to affect the RAS through the breath only. No other functions of the autonomic nervous system can be controlled by conscious human activity. Control of the brain through the RAS by means of conscious breathing is a method by which other functions of the body may be effectively controlled, for example, heart rate, blood pressure, digestion, excretion and absorption. Therefore, control of the sub-conscious is achieved through conscious activity of *prana-nigraha and pranayama*. This is the essence of the *pranayama*.

### What is pranayama

Pranayama has two words, that is Prana (प्राण) and Ayama (आयाम). Sanskrit word प्राण derived from Pra (prefix) + Ana (Root

---

1. Anil K. Rajvanshi; https://www.huffingtonpost.in/dr-anil-k-rajvanshi/science-of-pranayam_b_7340474.html referred in July 2019.

Verb) ; Aa (prefix) + yaama (Root Verb). Prana means energy... creation etc. Every atom, molecule and cell is an extension of प्राण just like waves of the seaà. It is the basic ingredient of all creation. The word आयाम suggests this meaning in connection with the word प्राण.

**सः यो वायु प्राणा एव सः।**[1]

He, who is vayu, he is also prana.

Hamsa is visualized as prana so it is said in the maitryaniya upanisad: "प्राणो हंसः" Avacchandabhairavatantra notes that: "हंसः प्राणयुक्तः सदा"।

**आत्मा वै हंस इत्युक्तः प्राणो हंससमन्वितः।**
**स्वरो वेदाश्च शास्त्राणि स्वरो गान्धर्वमुत्तमम्।**
**स्वरे च सर्वं त्रैलोक्यं स्वरमात्मस्वरूपकम्॥**[2]

All the Vedas, sastras, the best music and all the three worlds are inherent in the svara and this svara is verily the form of atman.

**ब्रह्माण्ड-खण्ड-पिण्डाद्याः स्वरेणैव हि निर्मिताः।**
**सृष्टिसंहारकर्ता च स्वरः साक्षान्महेश्वरः॥**[3]

The parts and micro-cosm of the macro-cosm are created only by the svara (prana). Svara actually is the manifested lord Siva and is the cause of creation and dissolution.

**हंकारो निर्गमे प्रोक्तः सकारस्तु प्रवेशनम्।**
**हंकारः शिवरूपेण सकारः शक्तिरुच्यते॥**[4]

During exhalation the sound 'हं' and during inhalation the sound 'स' is produced 'हं' is said to be the form of 'शिव' and 'स' is of the form of 'sakti'.

The puraka accomplishes the growth and the stability of the elements, whereas kumbhaka preserves the life through the suspension of breath.

---

1. Jaiminyopanisad 3.3.1
2. Sivasvarodaya 16
3. Sivasvarodaya 20
4. Sivasvarodaya 51

पूरकः कुरुते वृद्धिं धातुसाम्यं तथैव च।
कुम्भकः स्तम्भनं कुर्याज्जीवरक्षा विवर्धनम्॥[1]

रेचको हरते पापं कुर्याद्योगपदं व्रजेत्।
पश्चात्सङ्ग्रामवत्तिष्ठेल्लयबन्धं च कारयेत्॥[2]

Recaka removes the sin and raises one to the status of yogi then after practicing the recaka one should concentrate to practice the sequentially.

Whatever exists in the three worlds, is all under the control of prana. This is said thus in the Prashnopanisad.

प्रणस्येदं वशे सर्वं त्रिदिवे यत्प्रतिष्ठितम्।
एषोग्निस्तपत्येष सूर्य एष पर्जन्यो मघवानेष
वायुरेष पृथिवी रयिर्देवः सदसच्चामृतं च यत्॥[3]

Prana shaines in the fire, he is the sun, the moon, he is the Indra, he is the cloud, he is the wind, he is the earth, matter, what is and what is not and what is immortal.

Taittiriya-upanishad says,

प्राणं देवा अनु प्राणन्ति। मनुष्याः पशवश्च ये। प्राणो हि भूतानामायुः। तस्मातसर्वायुषमुच्यते। सर्वमेव त आयुर्यन्ति। य प्राणं ब्रह्मोपासते। प्राणो हि भूतानामायुः। तस्मात्सर्वायुषमुच्यत इति। तस्यैष एव शारीर आत्मा। यः पूर्वस्य।[4]

Pranavayu is the life span of living beings. It is the breath of life. The breath gives life to living beings so it is called universal life. Those who worship the breath of life as the Brahman, attain long lives. It is the breath of life that imparts life expectancy to all elements.

Kathopanisad interprets prana as, whatever is in this world the whole moves in the prana and comes from it. It is like almighty reverence, like an uplifted thunderbolt, they who know this, they verily become immortal.

---

1. Sivasvarodaya 377
2. Sivasvarodaya 378
3. Prashnopanisad 2. 5
4. Taittariya upanisad Brahmanandavalli lesson 3

यदिदं किं च जगत्सर्वं प्रण एजति निःसृतम्।
महद्भयं वज्रम् उद्यतं य एतद्विदुरमृतास्ते भवन्ति॥[1]

The source of prana is verily the all pervading, unmanifested even existing Brahman, and also called Atman.

Shivasamhita names ten prana vayu-s, of them five main Prana-s known as- *prana, apana, samana, udana* and *vyana* and *five subsidiary vayu-s -naga, kurma, krkara, devadatta and dananjaya.*

Maharshi Patanjali defines pranayama thus;

तस्मिन्सति श्वासप्रश्वासयोर्गतिविच्छेदः प्राणायामः॥[2]

pranayama is the stoppage of the inspiratory and expiratory movements.

प्रणो वायुः शरीरस्य आयामस्तस्य निग्रहः।
प्रणायाम इति प्रोक्तः।[3]

प्रणापानसमारोधात्प्राणायामः स कथ्यते॥[4]
प्राणापाननिरोधस्तु प्राणायामः प्रकीर्तितः॥[5]

Pranayama is a state which is already obtained. Pranayama is not simply breathing practice called shitali, seetkari, bhramari, kapalabhati etc. Pranayama is the state which comes after practice of various breathing techniques.

Vayupurana defines pranayama as under

प्रणायामगतिश्चापि प्राणास्यायाम उच्यते।[6]

The regulated movement of prana is also called pranayama. It is confirmed that, the controlled movement of breathing can be an expansion (ayama) of prana.

---

1. Kathopanisad valli 4 mantra 2
2. Yoga sutra, sadhanapada . 49.
3. Naradiya mahapurana 1.33.118 page 89; Yoga doctrines in Mahapurana -s by G.K Pai.
4. Vayu purana 1.11.28b page 88 Yoga doctrines in Mahapurana -s by G.K Pai.
5. Linga mahapurana 1.8.46a page number 89; Yoga Doctrines in Mahapurana-s by G.K Pai.
6. Vayupurana 1.10.73a page 89; Yoga doctrines in Mahapurana-s by G.K Pai.

Some people interpret pranayama = prana+yama, control of prana. But it is not possible to control the prana which is all pervading, without control of the mind and its fluctuations, it is not possible to control over prana. For that reason, Prana + Ayama, expansion of prana is the correct explanation.

Prana has inherent quality of moving. When Prana remains still, then one gets control over them.

| | | | | | |
|---|---|---|---|---|---|
| | | | Prana | Pranayama | Pratyaraha |
| Breathe | Mind | expansion | Apana | state | control |
| Control | control | of prana | Udana | | of |
| | | | Samana | | chitta |
| | | | Vyana | | |

Shivasamhita names ten prana vayu-s, of them five main Prana-s known as - *prana, apana, samana, udana* and *vyana* and five subsidiary vayu-s *-naga, kurma, krkara, devadatta and dananjaya.*[1]

Some authors consider manas is equal to chitta. But Chitta is not confined to the mind alone different from Manas. Maharshi Patanjali used the different terms citta and manas in (a different yoga state) sadhana pada verse 33 and 35.

Siddha-siddhantapaddhati explains about Manas and Citta clearly

संकल्पः विकल्पः मूर्च्छा जडता मननमिति पञ्चगुणं मनः।[2]

मतिर्धृतिः स्मृतिस्त्यागः स्वीकार इति पञ्चगुणं चित्तम्।[3]

Manas has five qualities - Sankalpa, vikalpa, murcha, jadata and manana

Chitta also has five qualities those are - mati, druti, smruti, thyaga, swikara,

1. Shivasamhita patala 3.4
2. Siddasiddhanta paddhati 1.44
3. Siddasiddhanta paddhati 1.46

अथाकाशः अन्तःकरणमनोबुद्धिचित्ताहंकाराः। वायुः समानोदानव्यानापानाख्याः। वह्निः श्रोत्रत्वक्चक्षुर्जिह्वाघ्राणाः।[1] The akasa is the first principle; antahkarana (inner sense) manas (the mind that wills), buddhi (the intellect that ratiocinates), citta (the mind that inquires), and ahamkara (the self conscious mind) are the variants. Vayu is the first principle; samana, udana, vyana, apana,prana these are variants of vayu.[2]

Word Chitta comes from the root chit which means, to perceive, notice, to know, understand. Antahkarana is made up of Akasa has four varients- Manas, buddhi,chitta, and ahankara.

| | | | |
|---|---|---|---|
| Breathe | control of Manas | | |
| Control | Buddhi | Control over 5 Prana | Antahkarana |
| | Citta | Pratyahara | |
| | Ahankara | | Samadhi |

One can influence Manas and chitta by regulation on breath. These two influence buddhi and ahankara.

चले वाते चले चित्तं निश्चले निश्चलं भवेत्।[3] When pranavayu moves citta also moves. If pranavayu stands still, chitta also becomes still.

Manas is a Sanskrit word denotes the power 'to think'. It is the recording faculty, bound to the senses, the instinctive mind rules over the motor (karmendriya) and sensory (jnanendriya) organs. Manas is not only the source of thoughts. It is rather a receptacle of thoughts and emotions.

**सत्यासनजये बाह्यस्य वायोराचमनं श्वासः।**

**कौष्ठय्यस्य वायोर्निःसारणमभ्यासः।**

**बाह्याभ्यन्तरस्तम्भवृत्तिर्देशकालसंख्याभिः परिदृष्टो दीर्घसूक्ष्मः।**[4]

---

1. The yoga upanisad-s,Sri upanisd- Brahmayogin, edited by pandit A.Mahadev sastri.
2. Thrisikhibrahmanopanisad transalation T. Shrinivasa Ayyangar, revised edition G. Shrinivasa Murti page 90
3. Hathayogapradipika 2.2
4. Yogasutra sadanapada 51

When posture has been achieved the cessation of the movements of both inspiration, the drinking in external air, and expiration, the throwing out of the internal air, is the regulation of breath.

In the Bhagavadgita Krishna said that yogi conjoins Prana in to the Apana and Apana in to the Prana and then the cessations of the breath (prana) becomes complete. By this process, then yogi becomes pranayamaparayana. Here we can observe that Krishna noted about Yogi who is an expert in control of the prana.

अपाने जुह्वति प्राणं प्राणेऽपानं तथाऽपरे।
प्राणाऽपानगती रुद्ध्वा प्राणायामपरायणाः।[1]

Hathayogapradipika explained the importance of pranayama thus;

प्राणायामेन युक्तेन सर्वरोगक्षयो भवेत्।
अयुक्ताभ्यासयोगेन सर्वरोगसमुद्भवः।।[2]

Proper pranayama helps to eradicate diseases, but improper pranayama may lead to various diseases. Appropriate breathing techniques (pranayama) help physical, mental and spiritual growth. It helps to eradicate disease, facilitates to bring down stress level. By performing Pranayama one may become more conscious, can obtain indelible memory power, overall joy etc.

**Select Bibliography**


- Bhagavadgita; As it is; Translator- H.H. Prabhupada; Bhaktivedanta Book Trust; Mumbai, 2017
- Bibek Debroy and Dipavali Debroy. The Upanishads. Books for all, Delih, reprinted 2005.
- G.K.Pai Yoga Doctrines in Mahapurana-s, Bhandarkar oriental research institute, pune. 2007.
- Iyengar, B. K. S., Light on Pranayama, Harper Collins Publishers India, New Delhi, 1993.


---

1. Bhagavadgeeta chapter 4.39
2. Hathayogapradipika 1.1

- Nagendra, Dr H R., Pranayama-The Art and Science, Swami Vivekananda Yoga Prakashana, Bengalore, Reprint 2007.
- Pandit A.Mahadeva Sastri,editor, The upanisad-s, The Adyar Library and Research Centre, Madras. Reprint 1983.
- Rajvanshi, K Anil; https://www.huffingtonpost.in/dr-anil-k-rajvanshi/science-of-pranayam_b_7340474.html
- Renu Mahtani Dr., Power of Pranayama,Jaico Publishing House, thirteen impression 2018.
- Shiva Samhita; Editors and translators; Swami Maheshananda, Dr B R Sharma and other; Kaivalyadhama SMYM Samiti, Lonavla, Pune, 2009.
- Srinivasa Murti. G.The Yoga upanisad-s, Revised edition, The Adyar Library and Research Centre, Chennai. Reprint 2008.
- Swami Kuvalayananda, Pranayama, Kaivalyadama, Lonaval, eleventh edition 2010.


✦✦✦

 ISSN : 0975-1769

# महाभारत में कुन्ती का संदेश-मूल्यांकन

-डॉ० अनीता सेन गुप्ता

सहाचार्या, संस्कृत विभाग
ईश्वर शरण पी०जी० कॉलेज, इलाहाबाद

**[ महाभारतं समाजस्य दर्पणः विद्यते। तत्र एकैकमपि पात्रं महत्त्वपूर्णं विद्यते। अस्मिन् लेखे कुन्त्याः जीवनसन्देशः आधुनिकसमाजे कीदृशः उपयोगी विद्यते इति निरूपितम् अस्ति। ]**

कुन्ती का चरित्र भगवद्यान पर्व में मुखरित दृष्टिगत होता है। यहाँ वह आदर्श नारी, वात्सल्य की प्रतिमूर्ति एवं वीर क्षत्राणी के रूप में वर्णित हैं। सर्वप्रथम जब शांतिदूत श्रीकृष्ण हस्तिनापुर में माता कुन्ती का दर्शन करते हैं तब कुन्ती उन्हें देखकर रो पड़ती हैं तथा उनका वीरोचित अतिथि सत्कार करने के पश्चात् अपने पुत्रों को अकारण प्राप्त दुःख का स्मरण करती हैं। उनका विचार है कि वाल्यकाल से ही गुरूजनों का आदर करने वाले, परम स्नेही, सर्वत्र सम्माननीय तथा समदर्शी उनके पुत्र शत्रुओं की शठता के शिकार होकर राज्य से हाथ धो बैठे एवं वनवास को प्राप्त हुए। वे हर्ष एवं क्रोध को जीत चुके थे एवं ब्राह्मणों के हित साधक तथा सत्य वादी थे फिर भी शत्रुओं के अन्याय से अभिशप्त होकर प्रियजन एवं सुखभोग से वंचित होकर मुझे रोती बिलखती छोड़कर वन को चले गए। वनगमन के समय महात्मा पाण्डव मेरे हृदय को समूल साथ लेते गए। यद्यपि वेवनवास के योग्य कदापि नहीं थे फिर भी उन्हें यह कष्ट कैसे प्राप्त हुआ? बाल्यकाल में ही वे पिता से वियुक्त हो गए थे एवं मैंने ही उनके कोमल शरीर का पालन-पोषण किया था। पाण्डव ऐसे हिंसक पशुओं से युक्त उस जंगल में कैसे रहे? मेरे बालक बाल्यकाल से ही शंख, दुन्दुभी, मृदंग, तथा बांसुरी के गम्भीर शब्द, मधुर नाद तथा सुरीली ध्वनि से जगाए जाते थे। जब वे कोमल शय्या पर राजभवन में शयन करते थे तब हाथियों

की चिंग्घाड़ तथा घोड़ों की हिनहिनाहट से उनकी निद्रा भंग होती थी। शंख एवं भेरी की तुमुल ध्वनि तथा वेणु एवं वीणा के मधुर स्वर से उनका उद्बोधन किया जाता था। ब्राह्मण लोग स्वस्ति वाचन तथा शांतिपाठ से उनका समादर करते थे तथा ब्राह्मणों के कल्याणप्रद आशीर्वाद को सुनकर वे उठते थे। पूजित एवं पूजनीय पुरूष उनके गुण गा-गाकर अभिनन्दन किया करते थे तथा वे उठकर रत्न-वस्त्र एवं अलंकारों से ब्राह्मणों का सत्कार किया करते थे। वे ही पाण्डव उस विशाल वन में हिंसक जन्तुओं के क्रूर शब्दों को सुनकर सो भी नहीं पाते होंगे। जो भेरी एवं मुदंगा के नाद से, शंख एवं वेणु की ध्वनि से, स्त्रियों के मधुर गीतों से एवं सूत मागध तथा बन्दीजनों की स्तुति से जगते थे, वे ही जंगलों में हिंसक जन्तुओं के कठोर शब्द से किस प्रकार आराम पाते होंगे। जो लज्जाशील, सत्य को धारण करने वाले, जितेन्द्रिय तथा सभी प्राणियों पर दया करने वाले हैं जो काम एवं द्वेष को वश में करके सत्पुरूषों के मार्ग का अनुकरण करते हैं, जो अम्बरीश, मान्धाता, ययाति, नहुष, भरत, दिलीप एवं शिवि आदि प्राचीन राजर्षियों के सदाचार पालन रूप कठिन धर्म की धुरी को धारण करते हैं, जिनमें शील एवं सदाचार भरा पड़ा है, जो धर्मज्ञ सत्यप्रतिज्ञ और सर्वगुण सम्पन्न होने के कारण इस भूमण्डल के ही नहीं, तीनों लोकों के भी राजा हो सकते हैं, जिनका मन सदैव धर्म में ही लगा रहता है, जो धर्मज्ञान तथा सदाचार सभी दृष्टियों से समस्त कौरवों में श्रेष्ठ हैं, जिनकी अंगकान्ति शुद्ध जम्बूनद सुवर्ण के समान गौर है एवं जो देखने में सबों को प्रिय लगते हैं, वे महाबाहु युधिष्ठिर सम्प्रति कैसे हैं?[1]

हे मधुसूदन! दश हजार हाथियों के बल वाले, वायु के समान वेगवान्, भाईयों का प्रिय करने वाले, कीचक हिडिम्ब एवं बक आदि का वध करने वाले, पराक्रम बल एवं क्रोध में क्रमशः इन्द्र, वायु तथा महेश्वर से समानता रखने वाले, शत्रु संतापक, तेजयुक्त, अमित तेजस्वी एवं देखने में भयंकर मेरे द्वितीय पुत्र भीम का समाचार मुझे बताओ।[2]

हे कृष्ण! जो अर्जुन दो भुजाओं से युक्त होकर भी सहस्त्र भुजाधारी कार्तवीर्य अर्जुन के साथ प्रतिस्पर्धा रखने वाले, एक बार में पाँच सौ बाण छोड़ने वाले, सूर्य के समान तेजस्वी तथा इन्द्रिय संयम, क्षमा एवं पराक्रम में क्रमशः महर्षियों, पृथ्वी तथा इन्द्र से समानता रखने वाले तुम्हारे भाई एवं सखा की

1. महाभारत, भगवद्यानपर्व-10. 2-21
2. महाभारत, भगवद्यानपर्व -10. 22-28

वर्तमान स्थिति कैसी है? कौरवों का यह सम्पूर्ण साम्राज्य उसी के द्वारा फैलाया गया है, सभी पाण्डव उसके बाहुबल पर भरोसा रखते हैं, वह सम्पूर्ण रथियों में श्रेष्ठ, सत्यपराक्रमी, विनयशील तथा अजेय हैं।[1]

मेरा सर्वाधिक प्रियपुत्र सहदेव समस्त प्राणियों के प्रति दयालु, लज्जाशील, महान् अस्त्र वेत्त कोमल, सुकुमार एवं धार्मिक है। महान् धनुर्धर होने के कारण रणभूमि में शोभा पाने वाला, सभी भाइयों का सेवक, धर्म तथा अर्ध में विवेचन में कुशल, युवक, भाइयों में अनुरक्त युद्धों का नेता तथा सदैव मेरी सेवा में तत्पर रहने वाला माद्रीकुमार सहदेव कैसा है?[2]

हे श्रीकृष्ण! सुकुमार, युवक, शौर्यसम्पन्न, दर्शनीय, भाइयों का प्राणस्वरूप, युद्ध की विचित्र कला से संयुक्त, महान् धनुर्धर, महाबली एवं मेरे द्वारा पालित नकुल सकुशल तो हैं? क्या मैं सुख भोग के योग्य एवं दुःख भोगने के अयोग्य इस सुकुमार महारथी को फिर कभी देख सकूँगी? निमेषमात्र के लिए नकुल से अलग होने पर मैं अपना धैर्य खो बैठती थी, किन्तु निर्मम मैं लंबी अवधि तक भी उससे वियुक्त होकर जी रही हूँ।[3]

कुलीन अनुपम सुन्दरी तथा सर्वगुण सम्पन्न राजकुमारी द्रौपदी मुझे पुत्रों से भी अधिक प्रिय है। पुत्रलोक से पतिलोक को श्रेष्ठ मानते हुए वह पुत्रों को छोड़कर पतियों का अनुसरण करती है। उत्तम कुल में उत्पन्न तथा कल्याणमयी उस महारानी द्रौपदी का मैंने विविध उत्तम वस्तुओं से सम्मान किया है। महाधनुर्धर, शूरवीर, युद्ध कुशल एवं अग्नितुल्य पाँच पतियों से युक्त होकर भी वह दुःखभागिनी बन गई हैं। चौदह वर्षों तक अपने पुत्रों से वियुक्त द्रौपदी को मैं नहीं देख सकी हूँ। वह निश्चय ही अपने पुण्य कर्मों का अक्षय सुख नहीं प्राप्त कर सकी हैं। अपने पुत्रों से भी अधिक प्रिय उस द्रौपदी को भरी सभा में लाए जाने पर मुझे सर्वप्रथम महान् दुःख हुआ था। क्रोध एवं लोभ के वशीभूत पापी दुर्योधन ने रजस्वला और एकवस्त्रा उस द्रौपदी को भरी सभा में श्वसुर के समक्ष खड़ा कर दिया था जिसे सभी कुरूवंशियों ने देखा था। वहीं राजा धृतराष्ट्र, कृपाचार्य, सोमदत्त एवं अन्यान्य कौरववीर खेद से भरे बैठे थे। मैं तो विदुर को धन्यवाद देती हूँ जिन्होंने इस दुष्कर्म पर अपना विरोध प्रकट किया था। श्रीकृष्ण

---

1. महाभारत, भगवद्यानपर्व -10. 21-34
2. महाभारत, भगवद्यानपर्व -10. 35-38
3. महाभारत, भगवद्यानपर्व -10. 31-43

के आगमन से प्रसन्न एवं अपने दु:खों से कातर कुन्ती उनसे अपने सम्पूर्ण दु:खों का वर्णन करने लगी। उसने बड़े ही कातर स्वर में पाण्डवों के दु:ख, कौरवों के अन्याय तथा पाण्डवों की भावी रणनीति का बड़ा ही स्पष्ट चित्रण श्रीकृष्ण के समक्ष उपस्थापित किया।[1] तत्पश्चात् उन्होंने श्रीकृष्ण को युद्ध के लिए प्रेरित करते हुए पाण्डवों के पास भी यह सन्द्रह पहुँचाने का अनुरोध उनसे किया। अन्त में श्रीकृष्ण कुन्ती को भावी युद्ध एवं पाण्डवों की राज्य प्राप्ति का आश्वासन देकर दुर्योधन के घर प्रस्थित हुए।

श्रीकृष्ण के द्वारा कौरव सभा में शांति के प्रयास, दुर्योधन को समझाने एवं दुर्योधन के द्वारा शांति प्रस्ताव को अस्वीकार करने के बाद जब श्रीकृष्ण परावर्तित होने लगे तब उन्होंने अपनी पितृश्वसा कुन्ती से पाण्डवों को प्रेषित करने योग्य संदेश की आकांक्षा की। वीर क्षत्राणी कुन्ती ने श्रीकृष्ण कोपाण्डवों के लिए निम्नलिखित संदेश देने का अनुरोध करते हुए कहा–

हे केशव! तुम युधिष्ठिर से कहना कि तुम्हारे प्रजापालन रूपी धर्म की हानि हो रही है, अत: तुम धर्मपालन के अवसर को व्यर्थ मत करो। जिस प्रकार वेदार्थ का ज्ञन नहीं रखने वाले वेदपाठी की बुद्धि केवल मंत्र पाठ में ही व्यर्थ हो जाती है, उसी प्रकार तुम्हारी बुद्धि केवल शांति स्थापना में ही संलिप्त हो गई है। तुम ब्रह्मा के द्वारा क्षत्रियों के लिए स्थापित धर्म का पालन करो एवं बाहुबल से अपनी जीविका का निर्माण करो। क्षत्रिय तो युद्धरूपी कठोर कर्म के लिए रचे गये हैं तथा सदैव प्रजापालनरूपी धर्म में प्रवृत्त होते हैं। इस संबंध में इतिहास में अनेक उदाहरण दृष्टिगत होते हैं। एक बार कुबेर ने राजर्षि मुचुकुन्द पर प्रसन्न होकर उन्हें सम्पूर्ण पृथ्वी देने का प्रस्ताव रखा, जिसे राजर्षि ने यह कहते हुए अस्वीकार कर दिया कि मेरी इच्छा अपने बाहुबल से उपार्जित पृथ्वी के उपभोग की है। तत्पश्चात् मुचुकुन्द ने स्वबाहुबल से उपार्जित पृथ्वी का शासन किया।[2] प्रजा द्वारा उपार्जित धर्म का षष्ठां शस्वमेव धर्मपूर्वक शासन करने वाले राजा को प्राप्त होता है। जो राजा धर्म का पालन करता है वह नरकगामी होता है। राजा की दण्डनीति स्वधर्म के अनुसार प्रवृत्त होकर चारों वर्णो को नियंत्रित करती है। राजा ही सत्ययुग, द्वापर एवं नेत्र का स्रष्टा है तथा अपने सत्कर्मों से सत्युग के उपस्थापन के कारण उसे स्वर्गलोक की प्राप्ति होती है। द्वापर को स्थापित करने

1. महाभारत, भगवद्यानपर्व – अध्याय–10.44–54
2. मुचुकुन्दस्य राजर्षेरददात् पृथिवीमिमाम्।
पुरा वैश्रवण: प्रीतो न चासौ तो गृहीतवान्।। महाभारत, भगवद्यानपर्व –132.1

पर उसे पुण्य एवं पाप का मिश्रित फल प्राप्त होता है तथा कलियुग के उपस्थापन में राजा को अत्यन्त कष्ट भोगना पड़ता है। तुम्हारे पिता एवं पितामहों ने जिस धर्म का पालन किया है तुम भी उसी ओर देखो। तुम जिस धर्म का आश्रय लेना चाहते हो वह राजर्षियों का आचार अथवा राजधर्म नहीं है। जो सदैव दयाभाव से युक्त रहता है वह प्रजापालन जनित पुण्य फल को प्राप्त नहीं करता है। तुम जिस बुद्धि पर चल रहे हो उसके लिए तुम्हारे पितामह, पिता अथवा स्वयं मैंने भी कभी आशीर्वाद नहीं दिया था। मैं तो सदा यही कामना करती हूँ कि तुम्हें ओज, बल, यज्ञ, दान, तप, शौर्य एवं बुद्धि की प्राप्ति हो। देवता एवं पितर सदा अपने उपासकों एवं वंशजों से दान, स्वाध्याय, यज्ञ एवं प्रजापालन की अपेक्षा रखते हैं ब्राह्मण भिक्षावृत्ति से जीविका चलाए, क्षत्रिय बाहुबल से प्रजापालन करें, वैश्य धनोपार्जन करें एवं शूद्र इन तीनों वर्णों की सेवा करें यही धर्म है। अतः तुम्हें बाहुबल से प्रजापालन में तत्पर होना चाहिए। तुम्हारा पैतृक राज्य-भाग शत्रुओं के हाथ में पड़कर लुप्त हो गया है जिसे तुम साम, दण्ड एवं भेद से प्राप्त करो। इससे बड़ा दु:ख की बात क्या होगी कि तुम्हारे जैसे वीरों का प्रसव करने वाली मैं आज दूसरों के अन्न-पिण्ड पर जीवित हूँ। अतः तुमवीर बनकर युद्ध करो, कायर बनकर अपने पिता-पितामह की कीर्ति को नष्ट मत करो।[1]

तत्पश्चात् कुन्ती ने विदुलोपाख्यान का वर्णन करते हुए रणभूमि से भागकर आए हुए पुत्र को विदुला की फटकार एवं पुन: उसे युद्ध के लिए उत्साहित करने का प्राचीन इतिहास श्रीकृष्ण को सुनाया। इसी क्रम में विदुला द्वारा कार्य में सफलता प्राप्त करने तथा शत्रु वशीकरण में वर्णित उपायों का भी उल्लेख माताकुन्ती ने किया। इस उपाख्यान के माध्यम से एक तरफ कुन्ती ने पाण्डवों को युद्ध के लिए उकसाया वहीं दूसरी तरफ अपने पुत्रों को युद्ध में विजय के मंत्र का भी उपदेश दिया।[2] अंत में अपने पुत्रों को प्रदेय संदेश का वर्णन करते हुए कुन्ती ने श्रीकृष्ण से कहा-हे केशव! तुम अर्जुन से जाकर कहना कि उसके जन्म के समय यह भविष्यवाणी हुई थी कि वह भीमसेन के साथ युद्ध में आए सभी कौरवों को जीत लेगा। तेरा यह पुत्र भगवान् श्रीकृष्ण के साथ समस्त भूमण्डल को जीतकर अपना यश स्वर्गलोक तक फैलायेगा एवं अपने पैतृक राज्य का पुनरूद्धार करेगा। मेरी इच्छा है कि आकाशवाणी ने जैसा कहा था वैसा ही हो। तुम युद्ध के लिए सदैव उत्सुक भीमसेन से कहना कि क्षत्राणी

---

1. महाभारत, भगवद्यानपर्व -अध्याय-132.4-34
2. महाभारत, भगवद्यानपर्व -अध्याय-134-136

जिसके लिए पुत्र को जन्म देती है वह समय आ गया है। तुम महाराज पाण्डु का पुत्रवधू परम यशस्विनी द्रौपदी से कहना कि तू परम सौभाग्यशाली यशस्वी कुल में उत्पन्न हुई है एवं तुमने मेरे पुत्रों के साथ जो धर्मानुसार बर्ताव किया है वही तेरे लिए उचित है। तुम क्षत्रिय धर्म में तत्पर रहने वाले माद्रीकुमार नकुल एवं सहदेव से कहना कि तुम अपने प्राणों की बाजी लगाकर भी अपने पराक्रम से प्राप्त भोगों का ही उपभोग करो। पांचाल राजकुमारी द्रौपदी के राजसभा में हुए अपमान को कौन भुला सकता है। मुझे पाण्डवों के राज्य छिनने एवं वनवास को उतना दुःख नहीं है जितना अपनी प्रिय पुत्रवधू सुन्दरी द्रौपदी के अपमान का है। हे कृष्ण! तुम परम प्रतापी अर्जुन से कहना कि वह द्रौपदी के इच्छित पथ पर चले। भरी सभा में द्रौपदी का जो अपमान हुआ वह अर्जुन एवं भीम का ही अपमान था। मैं उसे पुनः पुनः याद दिला रही हूँ।[1]

इस प्रकार भगवद्यान पर्व में वर्णित कुन्ती चरित्र से उसकी विद्वता, राजनीतिज्ञता, वीरता, मातृत्व, पुत्रस्नेह एवं धर्मशीलता आदि चारित्रिक गुण प्रकट होते हैं जो अकस्मात् कुन्ती को अद्वितीय भारतीय नारी के उत्तम रूप में प्रतिष्ठापित करते हैं।

✦✦✦

1. महाभारत, भगवद्यानपर्व –अध्याय–136

 ISSN : 0975-1769

# योगसाधनायां गुरुवैशिष्ट्यमधिकारिस्वरूपञ्च

-मणिकान्त तिवारी

शोधच्छात्रः, केन्द्रीयसंस्कृतविश्वविद्यालयः, नवदेहली

**[ अस्मिन् लेखे योगसाधनायां गुरोः वैशिष्ट्यं, सद्गुरुलक्षणं, साधकलक्षणं, च निरूपिताः सन्ति। ]**

आध्यात्मजगति गुरुशिष्यसम्बन्धः एव सर्वोपरि वर्तते। गुरुशिष्यसाधुसम्बन्धेन विना पारमार्थिकमार्गे गतिः नैव सम्भाव्यते। लौकिकदृष्ट्यापिभारतीयसमाजे सामान्यतया जीवनस्य प्रारम्भकर्त्री माता एवादिगुरुः, तदनन्तरमन्याः आचार्याः ये किमपि शिक्षयन्ति तेऽपिगुरवः भवन्ति। यद्यपि सामान्यजीवनेप्रस्तुतस्वरूपविषये कापि समस्या नानुभवति, परन्तु यदाऽऽध्यात्मिकजीवने कस्त्वम्, कोऽहम्, कुत आयात इत्यात्मकाः प्रश्नाः मनसि उत्पद्यन्ते, तदा जिज्ञासावशाद् स्वस्तरादपि च प्राप्तसाधुवद्दृष्टजनानामनुकरण-मस्माभिः आरभ्यते। अत्र तेषां जनानां कृते मया न निगद्यते येषां मनसि आध्यात्मिकभावान् प्रति कोऽपि आदरो नैवास्ति, ये केवलंपदधनमानप्राप्तयेगुरुं प्रति व्रजन्ति। तैः ज्ञेयं यत् यावल्लक्ष्ये उदातत्वं नास्ति तावत् कथमुत्कृष्टस्य प्राप्तिस्सम्भविष्यति? अतः श्रेष्ठलक्ष्यं विधेयम्। अस्तु, उत्कृष्टान्तरिकलक्ष्यप्राप्तये गुरुतत्त्वज्ञानमावश्यकम् वर्तते अतः शास्त्रतर्करीत्या गुरुतत्त्वं निरुप्यते-ये शिष्यधनमपहृत्य भोगेषूपरमन्ति ते गुरवः, न, ते तु भोगिनः एव। ये धनमानलोकाचार्ये रतास्सन्ति ते गुरवः, न, ते तु सामान्यमनुष्याः एव। ये काव्यकलाविशारदाश्शास्त्रविज्ञाश्च ते गुरवः, न, ते त्वपि विद्वान्सः एव। ये शास्त्रविज्ञाः, धनमानाद्विरक्ताः, आध्यात्मजिज्ञासवश्च ते गुरवः, न, ते तु सुसाधकाः एव। के तर्हि गुरवः? ये ऊर्ध्वरेतसाः, ब्रह्मनिष्ठाः, अध्यात्मतत्त्वविज्ञाः, मानापमानयोस्समाः, करुणादिदिव्यगुणयुक्ताः, कामादिदोषरहिताः, योगतन्त्रमन्त्रादिविभिन्नमार्गविज्ञाश्च ते गुरवः। तदैवोच्यते –

**सिद्धं सत्सम्प्रदाये स्थिरधियमनघं श्रोत्रियं ब्रह्मनिष्ठं,**
**सत्त्वस्थं सत्यवाचं समयनियतया साधुवृत्त्या समेतम्।**
**दम्भासूयादिमुक्तं जितविषयगणं दीर्घबन्धुं दयालुं,**
**स्खालित्ये शासितारं स्वपरहितपरं देशिकं भुष्णुरीप्सेत्॥**[1]

1. आचार्यवेदान्तदेशिकः

अर्थात् सत्सम्प्रदायस्थम्, स्थिरबुद्धित्वम्, श्रोत्रियत्वम्, ब्रह्मनिष्ठत्वम्, सात्त्विकाचरणत्वम्, सत्ववक्तृत्वम्, शास्त्रसम्मतकार्यकरणत्वम्, दम्भादिदोषरहितत्वम्, मनसेन्द्रियनिग्रहत्वम्, सौहार्दम्, कारुण्यम्, दुष्टाचरणस्यानुशास्तृत्वम्, प्राणिमात्रहितरतञ्च गुणयुक्तः गुरुः सदा पूज्यो भवति। गीतायां[1] स्थितप्रज्ञरूपे गुरुस्वरूपस्य वर्णनं प्राप्यते यत् सर्वान् मनोगतान् कामान् प्रजहाति, आत्मनि एव आत्मना तुष्टः, दुःखेषु अनुद्विग्नः सुखेषु च आसक्तिरहितः रागभयक्रोधमुक्तः, सर्वावस्थायां शुभाशुभं प्रति नाभिनन्दति, नाद्वेष्टि सः स्थितप्रज्ञ इति उच्यते। तथा च सिद्धसिद्धान्तपद्धतौ पिण्डपदयोः समरसताप्रकरणे गुरुमहत्त्वविषये प्राप्यतेपरमपदमिति स्वसंवेद्यम् अत्यन्ताभासाभासकमयम् इति। उक्तञ्च तत्त्वसंहितायामपि आत्मैव गुरुः इति प्रतिपादनक्रमे आचार्यैः साधकानां कृते तुरीयातीतं ब्रह्मस्वरूपर्यन्तं मनोबुद्धिवागादीनां प्रवृत्तिसामर्थ्याभावत्वात् स्वसंवेद्यमेव परमं पदमिति द्योतितम्। अत एव नानाविधविचार-चातुर्यचर्चाविस्मयाङ्गत्वाद् गुरुचरणकृपातत्त्वमात्रेण निरुपाधिकत्त्वेन निर्णेतुं शक्यत्वात् स्वसंवेद्यमेव परमं पदम् प्रसिद्धमिति सिद्धान्तः।

गुरुः योगक्षेत्रे सत्पथप्रदर्शको भवति। गुरुशक्तिपातात् तत्क्षणादेव स्वसंवेद्य-साक्षात्कारः आत्मपरोक्षानुभूतिः समुत्पद्यते। ततो गुरुरेवात्र कारणमुच्यते। तस्माद्गुरु-कटाक्षपातात् स्वसंवेद्यतया च महासिद्धयोगिभिः स्वकीयं पिण्डं निरुत्थानानुभवनेन समरसं क्रियते इति सिद्धान्तः।[2]

**गुरुकृपाप्रसादादेव परमपदप्राप्तिरिति सिद्धान्तो दरीदृश्यते यथा।**
**गुरुदृक्पातनात्प्रायो दृढानां सत्यवादिनां सा स्थितिर्जायते॥**

**कथनाच्छक्तिपाताद्वा यद्वा पादावलोकनात्।**
**प्रसादात् स्वगुरोः सम्यक् प्राप्यते परमं पदम्॥**

अर्थात् क्वचित् गुरोः दर्शनात्, वदनात्, पादावलोकनात्, क्वचित्तु गुरोः सन्तुष्टत्वाच्च शिष्यः शक्तिपातरीत्या परमपदमवाप्यते। अत एव शिवेनोक्तम्-

**न गुरोरधिकं न गुरोरधिकं न गुरोरधिकं न गुरोरधिकम्।**
**शिवशासनतः शिवशासनतः शिवशासनतः शिवशासनतः॥**

**सद्गुरोर्लक्षणम्-** वाङ्मात्रेण, दृक्पातमात्रेण, सम्यगवलोकनेन वा तत्क्षणा-न्मुहुर्विश्रान्तियुक्तं करोतीति यः स सद्गुरुर्भवति। नो चेन्निजविश्रान्तिं विना पिण्डपदयोः व्यष्टिसमष्ट्योः समरसकरणं न भवतीति सिद्धान्तः। तस्मान्निजविश्रान्तिकारकः सद्गुरुरभिधीयते, नान्यः। करुणारूपीखड्गेन शिष्यस्य पाशाष्टकं घृणाशङ्कादिकं

1. भ.गी.अ., श्लो. स. 2-55-57
2. सि.प. पृ.स. 62-64

छिनत्ति, तेन शिष्यः दोषाणां नाशेन कृत्स्नानन्दं लभते। ईदृशानन्दजनको गुरुः एव सद्गुरुरिति कथ्यते। अत्र पाशाष्टकाणि सन्ति–

**घृणा शङ्का भयं लज्जा जुगुप्सा चेति पञ्चमी।**
**कुलं शीलं तथा जातिरष्टौ पाशाः प्रकीर्त्तिताः॥**[1]

**गुरुशब्दव्युत्पत्तिः**– 'गृणातीति गुरुः' अर्थात् सम्यक् चैतन्यविश्रान्तिमुपदिशति स गुरुः। विश्रान्तिशब्देन आत्मज्ञानं ग्राह्यम्, तेन परात्परं परमपदं प्रस्फुटति, तस्मात् तत्क्षणे एव स्वस्य साक्षात्कारो जायते। त्याज्यगुरुः कः? इति प्रश्ने सति आह[2]– ज्ञानहीनः, मिथ्यावादी, विडम्बकः, स्वात्मज्ञानानभिज्ञश्च गुरुः त्याज्यः। यथा शिला तर्त्तुमसमर्थत्वात् अन्यान् अपि निमज्जति। अतः यः स्वयं पारं याति सः एव अन्यानपि निस्तारयति। भवसागरतितीर्षुः सद्गुरोर्वक्त्रात् प्राप्तयथार्थज्ञानं विना स्वस्वरूपानुसन्धाने साफल्यं नार्हति। गुरुं विना बहुशास्त्रकोटिभिः यथार्थतत्त्वज्ञानाय कृतः प्रयत्नः व्यर्थो भवति। आत्मज्ञानं तर्कशब्दविज्ञानात्, आचारात्, वेदपाठनात्, वेदान्तश्रवणात्, तत्त्वमसीति वाक्यबोधात्, हंसोच्चारणात्, जीवब्रह्मैक्यज्ञानात्, ध्यानात्, जपात् वा न प्राप्यते। वस्तुतः पूर्वोक्तवर्णितसिद्धान्तामाचरणे अन्तःकरणशुद्धिः सम्पद्यते। इमानि कर्माणि आत्मज्ञानार्थं प्रथमसोपानरूपेण स्वीक्रियन्ते, ततः गुरुः पावनान्तःकरणे गुरुमन्त्रात्मकं शक्तिबीजं वपति। सद्गुरोः करुणां विना अखिलाः दुर्गमाः सिद्धयः असाध्याः, अत एव सर्वं विहाय गुरुः अवश्यं शुश्रूषव्यः।

**योगसिद्धौ गुरुमहत्ता–** गुरुमुखात् प्राप्तविद्या वीर्यवती भवति, तदभावे तु निष्क्रिया, फलहीना, दुःखदा च जायते। ये गुरुं सन्तुष्य यत्नेन विद्यामुपासते, तस्याः विद्यायाः फलमविलम्बेन प्राप्यते। यतो हि आध्यात्मिकक्षेत्रे गुरुरेव मातृपितृदेवरूपेण आमनन्ति। गुरोरनुग्रहादेव निर्मलान्तःकरणवन्तः परमलक्ष्यं प्राप्नुवन्ति। अत एव मनसा वचसा कर्मणा पूर्णरूपेण गुरुः सेवनीयः। सम्प्रति गुरुपूजाविधिः कथ्यते– गुरोः प्रदक्षिणात्रयं कृत्वा वामहस्तेन दक्षिणपादम्, दक्षिणहस्तेन वामपादं संस्पृश्य अष्टाङ्गेन नमस्कारः कुर्यात्। श्रद्धावन्तः सिद्धिमाप्नुवन्ति, न तु गुरुविहीनाः। अपि च लोकसङ्गयुक्तः, अविश्वासिनः, गुरुपूजाविहीनः, बहुगुरूपासकाः, मिथ्यावादिनः, निष्ठुरभाषिणः, गुरुरुष्टजनाः कदापि सिद्धिं नार्हति। गुरुवक्तृसमुद्भवयोगतन्त्रादिविद्यायां सन्देहस्य लेशोऽपि स्थितिर्न सम्भवति। शब्दज्ञानात्प्रक्रियायां भेदत्वं वर्तते, तस्य भेदस्य निवृत्तिर्गुरुकृपां विना सम्भवन्नास्ति। गुरुशक्तिः कीदृशी वर्तते? गुरुशक्तिस्साक्षात्पर- मेश्वरीशक्तिरेवास्ति। तस्य प्राप्तिरपि नैकजन्मनां पुण्यानां प्रभावादेव भवति। आदिशङ्कराचार्यैरुक्तम्–

1. कुलार्णवतन्त्रे प्रथमोल्लासे
2. सि.प.पृ.स. 70–71, 77–80

**दुर्लभं त्रयमेवेतद्देवानामनुग्रहम्।**
**मनुष्यत्वं मुमुक्षत्वं महापुरुषसंश्रयः।।**[1]

यथा तु मुण्डकोपनिषद्यपि– स यो ह वै तत्परमं ब्रह्मवेद ब्रह्मैव भवति, नास्याब्रह्मवित्कुले भवति[2]। तरति शोकं तरति पाप्मानं गुहाग्रन्थिभ्यो विमुक्तोऽमृतो भवति। इदृशी साक्षाद्ब्रह्मणश्शक्तिः अधिकारिगुणा-नामाधिक्ये एव प्राप्यते। कस्तर्हि अधिकारी? साधनचतुष्टय सम्पन्नोऽधिकारी। यमनियमपरिपालकोऽधिकारी। एका शङ्कात्र समुद्भवति–गुरुप्राप्तये सन्नद्धेयमुतान्तःकरणशुद्धिविषयककार्याणां कृते प्रयतितव्यम्?

योग्यतानुसारमेव मार्गदर्शकानां प्राप्तिरिश्वरेच्छानुसारं स्वयमेव भवति। अत्र विशिष्टप्रयत्नस्य महत्त्वं नास्ति, यतोह्यधिकारात् पूर्वं ज्ञानप्राप्तेऽपि तस्य संरक्षणं समुचितरीत्या नैव सम्पद्यते, गुरोपदिष्टभावानामवबोधनमपि नैव जायते। अवबोधनेऽपि तज्ज्ञानं प्रयोगकरणाय न भवति। अतः अधिकारिगुणानां प्राप्तये, शास्त्राध्ययनपूर्वक-मुपासनादिकार्ये च कालव्ययः एव श्रेयस्करः। तपोयज्ञदानादिनाऽन्तःकरणं प्रशुद्ध्यति। अन्तःकरणशुद्धत्वे सति विवेकवैराग्यादिदिव्यगुणानामुत्पतिर्जायते। तस्मादधिकारत्वं लभते। यत्राध्यात्मिकाधिकारत्वं वर्तते तत्र गुरुप्राप्तिस्सुनिश्चिता। गुरोः महत्त्वं प्रदर्शयन् आदिशङ्कराचार्यैरुक्तम् यत् यस्य मौनत्वेऽपि, दर्शनेनैव सर्वविधाध्यात्मिकसंशयाः छिद्यन्तेऽसौ गुरुरिति–

**चित्रं वटतरोर्मूले वृद्धाः शिष्या गुरुर्युवा।**
**गुरोस्तु मौनं व्याख्यानं शिष्यास्तु छिन्नसंशयाः।।**[3]

सम्प्रतिप्रमातायाः स्वरूपं प्रस्तूयते यतोहि अनधिकारी कदापि परमलक्ष्यं नैवाप्यते। अस्तु, प्रायस्सर्वत्रैव निश्चितलक्ष्यप्राप्तये निश्चितगुणसमवायानामुपस्थिति-रत्यन्तमपेक्ष्यते। निश्चितगुणसमवायानामुपस्थितिर्वर्तते यस्मिन् सोऽधिकारी, निश्चितगुण-समवायवानधिकारीति। येषु गुणाः न सन्ति परञ्च ते गुणानिच्छन्ति तेषामपि ग्रहणं गुणसमवायेन ज्ञेयम्, यतोहि प्रेच्छाऽपि गुण एवेति। विभिन्नक्षेत्रेषु विभिन्नगुणानां न्यूनाधिक्यरूपेण महत्त्वं वर्तते। यथा श्रमिककार्ये देहव्यापाराधिक्यत्त्वात् शारीरिक-सामर्थ्यस्य आधिक्येन एवञ्च वैचारिककार्यन्यूनत्वाद् बौद्धिकसामर्थ्यन्यूनेनापि कार्यं प्रचलति। परञ्चापरपक्षे शास्त्राभ्यासे श्रमिकाद्विपरीतं तर्कप्रधानप्रवृत्तिना निष्कर्षप्राप्ति-स्सम्भवति। अर्थात् क्षेत्रभेदेनाधिकारीय गुणेष्वपि भेदाः भवन्ति। बहुवारं लक्ष्यैकत्वेऽपि

1. वि.चू. श्लो.स. 3
2. मु.उ. म.स. 9
3. द.मू.स्त्रो. श्लो.स. 12

मार्गविभेदत्वाद् गुणेष्वान्तर्यंदृश्यते। यथा श्रीपुष्पदन्तविरचितशिवमहिम्नस्त्रोत्रे लक्ष्यैकत्व-विषये प्राप्यते–

**त्रयी सांख्यं योगः पशुपतिमतं वैष्णवमिति,**
**प्रभिन्ने प्रस्थाने परमिदमदः पथ्यमिति च।**
**रुचीनां वैचित्र्यादृजुकुटिल नानापथजुषां,**
**नृणामेको गम्यस्त्वमसि पयसामर्णव इव॥[1]**

अतः पथभेदेनापि अवलम्बकेषु गुणान्तर्यं ज्ञेयम्। संस्काररुचिपरिस्थित्यादि-प्रभावादियं स्थितिर्जायते।योगक्षेत्रे ये के गुणाः साधनानि च सन्ति येषामभावे लक्ष्यप्राप्तिर्नैव सम्भाव्यते इति मनसि निधाय विभिन्नाचार्याणां मतानि प्रस्तूयन्ते-योगदर्शने अष्टाङ्गयोगप्रदर्शनक्रमे प्रारम्भिकाङ्गद्वयस्य यमनियमस्योल्लेखनं योगविषयकाधिकार-जागरणार्थमेव वर्तते। अहिंसासत्यास्तेयब्रह्मचर्यापरिग्रहाः यमाः[2]। पञ्चप्रकारकेषु यमेषु अहिंसा नाम सर्वथा सर्वदा सर्वभूतानामनभिद्रोहः। सत्यं यथार्थवाङ्मनसे। स्तेयमशास्त्र-पूर्वकं द्रव्याणां परतः स्वीकरणम्। तत्प्रतिषेधः पुनरस्पृहारूपमस्तेयमिति। ब्रह्मचर्यं गुप्तेन्द्रियस्य उपस्थस्य संयमः। विषयाणामर्जनरक्षणक्षयसङ्गहिंसादोषदर्शनादस्वीकरणम-परिग्रह इत्येते यमाः। शौचसंतोषतपः स्वाध्यायेश्वरप्रणिधानानि नियमाः[3]। तत्र शौचं मृज्जालादिजनितं मेध्याभ्यवहरणादि च बाह्यम्। आभ्यान्तरे चित्तमलानामाक्षालनम्। संतोषः संनिहितसाधनादधिकस्यानुपादित्सा। तपो द्वन्द्वसहनम्। स्वाध्यायो मोक्षशास्त्राणा-मध्ययनं प्रणवजपो वा। ईश्वरप्रणिधानं तस्मिन्परमगुरौ सर्वकर्मार्पणम्। योगरसायनग्रन्थे स्वामिब्रह्मानन्दैरुक्तम्–

**प्रथमं विषयत्यागो, द्वितीयमनकूलता।**
**तृतीयं गुरुसंयोगश्चतुर्थं चेशचिन्तनम्॥[4]**

सर्वप्रथमं विषयस्य त्यागः अर्थात् शमदमपरिपालनम्। शमो नाम मनोनिग्रहः, दमो नामेन्द्रियनिग्रहणम्। शमदमपरिपालने हेतुर्वर्तते बहिर्मुखी चेतनाया अन्तर्मुखीकरणम्। द्वितीयं वर्तते योगविषयकानुकूल्यम्। अत्रानुकूल्येन सर्वतोभावेन योगविषयकानि नेतिधौत्यादि साधनानि, दुग्धघृतादि भोज्यानि, शुद्धवातावरणस्थानादीनि च ग्रहीतव्यानि। तृतीयं वर्तते गुरुसंयोगः, अत्र गुरुशब्देन सिद्धपरम्परया दीक्षितो वेदान्तयोगतन्त्रमार्ग-त्रयैकीकृत्य स्वस्वरुपानुसंधाने कृतभूरिपरिश्रमेणात्मतत्त्वविज्ञो ज्ञेयः। चतुर्थमीशचिन्तनम्–

---

1. श्रीपुष्पदन्तविरचिते शि.स्त्रो. –श्लो.स. 7
2. यो.द. – साधनपादे सू.स. 30
3. यो.द. – साधनपादे सू.स. 32
4. यो.रसा. – श्लोक स. 13

यथा तु योगदर्शने ईश्वरप्रणिधानाद्वा इति सूत्ररूपे ईशचिन्तनं प्रदर्शितम् सूत्रकारैः महर्षिपतञ्जलिभिः। अस्यैव व्यासभाष्ये प्रणिधानाद्भक्तिविशेषादावर्जित ईश्वरस्तमनु-गृह्णात्यभिध्यानमात्रेण। तदभिध्यानमात्रादपि योगिन आसन्नतरः समाधिलाभः समाधिफलञ्च भवतीति। कोऽयमीश्वरो नामेतिक्लेशकर्मविपाकाशयैरपरामृष्टः पुरुषविशेष ईश्वरः[1]। तत्र निरतिशयं सर्वज्ञबीजम्[2]। पूर्वेषामपि गुरुः कालेनानवच्छेदात्[3]। तस्य वाचकः प्रणवः[4]। तज्जपस्तदर्थभावनम्[5]। ततःप्रत्यक्चेतनाधि-गमोऽप्यन्तरायाऽभावश्चये[6] तावदन्तराया व्याधिप्रभृतयस्ते तावदीश्वप्रणिधानान्न भवन्ति। स्वरूपदर्शनमप्यनेन भवति। शिवसंहितायां पञ्चमपटले चतुर्विधसाधकानां वर्णनं सम्प्राप्यते।

यथा तु-

**चतुर्धा साधको ज्ञेयो मृदुमध्याधिमात्रकाः।**
**अधिमात्रतमः श्रेष्ठो भवाब्धौ लङ्घनक्षमः।।**[7]

**1. मृदुसाधकलक्षणम्**–मन्दोत्साही, सम्मूढः, रोगग्रस्तः, गुरुदूषकः, लोभी, पापमतिः, बह्वाशी, वनिताश्रयः, चपलः, कातरः, पराधीनः, अतिनिष्ठुरः, मन्दाचारः, मन्दवीर्यकः मानवो मृदुसाधको भवति। प्रस्तुतमृदुसाधकलक्षणक्रमे तमोगुणविशिष्ट-किञ्चिद्रजोगुणान्वितानां जनानां कथनं वर्तते। प्रायः अस्मिन्युगे प्रस्तुतगुणान्वितानां बाहुल्यं परिदृश्यते। कारणन्त्वत्र प्रारब्धपुरस्सरमाधुनिकाहारव्यवहारविचारादिक्रमे भौतिकभावानां बाहुल्यं मन्ये।

**द्वादशाब्दे भवेत्सिद्धिरेतस्य यत्नतः परम्।**
**मन्त्रयोगाधिकारी स ज्ञातव्यो गुरुणा ध्रुवम्।।**[8]

इत्याकारकसाधकान् सिद्धिः गुरुनियोगे द्वादशाब्दप्रयत्नपुरस्सरमभ्यासात्भवति। अत्र प्रस्तुतकाले न्यूनाधिक्यं गुरुकृपाप्रारब्धादिप्रभावात्भवितुं शक्यते। चतुर्विधयोगे मन्त्रयोगसंज्ञके गुरुकृपावशा-देतस्याधिकारत्वं ज्ञेयमिति। मन्त्रयोगे परम्परया दीक्षितो गुरुणा संप्राप्तमन्त्रस्य श्वासप्रश्वासचक्राव-लोकनमन्त्रश्रवणपूर्वकं विधिः संज्ञेया। अस्तु, चतुर्विधयोगो वर्तते–

---

1. यो.सू. 1-24
2. यो.सू. 1-25
3. यो.सू. 1-26
4. यो.सू. 1-27
5. यो.सू. 1-28
6. यो.सू. 1-29
7. शि.सं. पञ्चमपटलस्य श्लो. स. 15
8. शि.सं. पञ्चमपटलस्यश्लो. स. 16-18

**मन्त्रयोगो हठश्चैव लययोगस्तृतीयकः।**
**चतुर्थो राजयोगः स्यात्स द्विधाभावविवर्जितः॥**[1]

मन्त्र-हठ-लय-राजेत्यात्मको योगो चतुर्विधः। राजयोग एव लक्ष्यमस्मिन्नेव योगस्य पूर्णत्वं द्वैताभावत्वं संप्राप्यते। सर्वं खल्विदं ब्रह्मेत्यात्मकानुभूतिः संजायते।

**2. मध्यमसाधकलक्षणम्–** समबुद्धिः, क्षमायुक्तः, पुण्याकाङ्क्षी, प्रियम्वदः, सर्वकार्येषु सामान्यः मध्यमसाधको भवति।[2] प्रस्तुतमध्यमसाधकलक्षणक्रमे रजोविशिष्ट-किञ्चिद्सत्त्वगुणान्वितानां वर्णनं वर्तते। जपाद्यभ्यासप्रभावादेव मृदुसाधकानां स्तरोत्थानादयं मध्यमस्तरः संजायते। प्रायः साधकान् पूर्वजन्मनि सुकृतानां प्रभावाद् स्वभाविकोऽयं स्तरः संप्राप्यते। एषां स्तरीकानां कृते लययोगस्योपदेशः गुरुभिः दीयते। लययोगेन प्रतिप्रसवो मुख्यार्थः, परञ्चात्र निश्चितकेन्द्रमधिकृत्य मनःप्राणानां लयो ज्ञेयः। अन्तःकरणशुद्धिरभावे लययोगस्य परिकल्पनाऽप्यसम्भवम्। मन्त्रहठलययोगेषु कदाचिदपीत्थन्नास्ति यत् एते सर्वे पृथकाः, अपि तु एते सर्वे राजयोगसिद्धर्थं प्रतिस्तरे सहायकाः। यदि तु साधको मध्यमस्तरीयः लययोगाधिकारी वर्तते तर्ह्यपि मन्त्रयोगस्य तस्मिन्जीवने महत्त्वमस्तेवापितु पूर्वादधिकं महत्त्वं वर्तते। लययोगस्य साधनाक्रमे लयप्राप्त्यर्थं हठविशिष्टमन्त्रयोगस्य प्रयोगोऽपेक्ष्यते। हठाभावे प्राणानां स्थैर्यत्वं एवञ्च मन्त्राभावे चित्तस्यशुद्धिः संभवन्नास्ति, तथा हठमन्त्रे विना लयप्राप्तिरसंभवेति।

**3. अधिमात्रसाधकलक्षणम्–** स्थिरबुद्धिः, लययुक्तः, स्वाधीनः, वीर्ययुक्तः, दयायुक्तः, क्षमावान्, सत्यवान्, शूरः, वयस्थः, श्रद्धावान्, गुरूपदाब्जपूजकः, योगाभ्यासरतश्च अधिमात्रसाधको भवति। अधिमात्रसाधकलक्षणक्रमे जपाधिक्यत्वाद् लयविषयिका बुद्धिः परिपूर्यते। अस्मिन् स्तरे साधके रजोविशिष्टसत्त्वाधिक्यं परिदृश्यते। बुद्धेः स्थैर्यत्वं वर्धनत्वात् लयः सञ्जायते। गुरोः निर्देशे योगाभ्यासाचरणात्वात् साधके मन्त्रलयपूर्वकः साङ्गहठयोगविषयिका योग्यता सञ्जायते।

**एतस्य सिद्धिः षड्वर्षे भवेदभ्यासयोगतः।**
**एतस्मै दीयते धीरो हठयोगश्च साङ्गतः॥**[3]

इत्याकारकसाधकान् सिद्धिः षड्वर्षकीय नैर्न्तर्यगुर्वाज्ञापूर्वकाभ्यासेन भवति। एषां साधकानां कृते गुरुभिः साङ्गहठयोगो दीयते। अत्राङ्गेन सप्तसाधनानां ग्रहणमपेक्ष्यते। तान्यङ्गानि सन्ति षट्कर्माणि, आसनानि, मुद्राः, प्रत्याहाराः, प्राणायामाः, ध्यानम्, समाधिः।

1. शि.सं. पञ्चमपटलस्य श्लो. स. 14
2. शि.सं. पञ्चमपटलस्य श्लो. स. 19
3. शि.सं. पञ्चमपटलस्य श्लो. स. 20-22

**षट्कर्मणा शोधनञ्च आसनेन भवेद्दृढम्।**
**मुद्रया स्थिरता चैव प्रत्याहारेण धीरता।।**

**प्राणायामाल्लाघवञ्च ध्यानात्प्रत्यक्षमात्मनि।**
**समाधिना च निर्लिप्तं मुक्तिरेव न संशयः।।**[1]

4. अधिमात्रतमसाधकलक्षणम्—महावीर्यान्वितः, उत्साही, मनोज्ञः, शौर्यवान्, शास्त्रज्ञः, अभ्यासशीलः, मोहरहितः, निराकुल, नवयौवनसम्पन्नः, मिताहारी, जितेन्द्रियः, निर्भयः, शुचियुक्तः, दक्षः, दाता सर्वजनाश्रयः, स्थितप्रज्ञः, क्षमाशीलः, सुशीलः, धर्मचारी, गुप्तचेष्टः, प्रियंवदः, शास्त्रे विश्वाससम्पन्नः, देवतागुरुपूजकः, जनसङ्गविरक्तः, महाव्याधिरहितः, अधिमात्रव्रतज्ञः, सर्वयोगसाधको अधिमात्रसाधको भवति।[2] प्रस्तुताधि-मात्रतमसाधकलक्षणक्रमे सत्त्वविशिष्टकिञ्चिद्रजोगुणान्वितानां जनानां वर्णनं वर्तते। प्रोक्तगुणधारिसाधके अन्तर्मुखताये पर्याप्तकारणानि भवन्ति। एतस्य साधकः सर्वविध-योगस्याधिकारी भवति। गुरुकृपाप्रभावादस्य लक्ष्यप्राप्तिः त्रिषु सम्वत्सरेषु भवत्येव यदि काले न्यूनाधिक्यं भवति तर्हि त्वत्र प्रारब्धादिपूर्वोक्तहेतुः मन्येत्। हठयोगप्रदीपिकायां षट्सन्मित्राणि वर्णितानि सन्ति। तानि मित्राणि गुणरुपे वर्तते यस्मिन् स अधिकारीति। आचार्यैरुक्तं यथा-

**उत्साहात् साहसाद्धैर्यात्तत्त्वज्ञानाच्चनिश्चयात्।**
**जनसंगपरित्यागात्षड्भिर्योगः प्रसिद्धयति।।**[3]

उत्साहः, साहसम्, धैर्यम्, तत्त्वज्ञानम्, निश्चयः, जनसंगपरित्यागः एतेः गुणाः वर्तन्ते यस्मिन् स योगस्योत्तमोधिकारीति।

प्रस्तुतेषु मतेषु केन्द्ररूपे योगदर्शनोक्त यमनियमावेव सम्प्राप्येते। स्वस्वरूपानु-संधानेत्यात्मकं लक्ष्यमभिधेय यमनियमयोः परिपालनेन स्वयमेव विभिन्नगुणानामत्पत्तिः जायते। अतो निष्कर्षरूपेणायं वक्तुं पार्यते यत् सैव योगस्याधिकारिविशेषो वर्तते य केवलं मोक्षमभिलक्ष्य यमनियमौ परिपाल्येते एवञ्च गुरोः आश्रयमङ्गीकृत्य परमलक्ष्यं प्रति गम्यते। गुरुशिष्ययोः परस्परसाधुसम्बन्धः शास्त्रोक्तपरमलक्ष्यं प्रति कारणमित्यलम्।

## सहायकग्रन्थसूची

1. पातञ्जलयोगदर्शन– पतञ्जलिः– चौखम्बासंस्कृतप्रकाशनम्, वाराणसी– वि. सं. 2067

---

1. घे.सं. प्रथमोपदेशे श्लो. स. 10-11
2. शि.सं. पञ्चमपटलस्य श्लो. स. 23-27
3. ह.प्र. प्रथमोपदेशे श्लो. सं. 16

2. हठयोगप्रदीपिका- स्वात्मारामः- गोरक्षनाथमन्दिरः गोरखपुरम्- वि.सं. 2058

3. गोरक्षसंहिता- श्रीगोरक्षनाथः- गोरक्षनाथमन्दिरः, गोरखपुरम्- वि.सं. 2058

4. घेरण्डसंहिता, हिन्दी व्याख्या- श्री घेरण्डः, डॉ. राघवेन्द्रशर्मराघवः- चौखम्बासंस्कृतप्रतिष्ठानम्, देहली- 2009.

5. पातञ्जलयोगदर्शनम् – पतञ्जलिः- चौखम्बासंस्कृतप्रकाशनम्, वाराणसी.- वि.स. 2067

6. योगरसायनम्- स्वामिब्रह्मानन्दः- पांडुरंगजावप्रकाशनम्, मुम्बई

7. शिवसंहिता, हिन्दीव्याख्या- डॉ. राघवेन्द्रशर्मराघवः- चौखम्बासंस्कृत- प्रतिष्ठानम्, देहली-2011

8. शैवोपनिषदः- महादेवशास्त्री- ओरियन्टलबुकसेन्टर देहली- 2008 ई.

9. सिद्धसिद्धान्तपद्धतिः- श्रीगोरक्षनाथः, स्वामिद्वारिकादासशास्त्री-चौखम्बा-विद्याभवनम् वाराणसी- 2006 ई.

10. 108 उपनिषद् साधना खण्ड, रामशर्मा आचार्य, शांति कुंज हरिद्वार, 2005 ई.

11. Anatomy of Hathyoga & Coulter H.David & MLBD New Delhi-2007

12. Light on Yoga & Iyengar B.K.S & Harper Collins Publisher London. 1996.

✦✦✦

 ISSN : 0975-1769

# समसामयिकशिक्षातन्त्रे श्रीमद्भगवद्गीतायाः उपयोगिता

**-खुशबू शुक्ला**
शोधच्छात्रा, संस्कृत-प्राच्यविद्याध्ययनसंस्थानम्
जवाहरलालनेहरूविश्वविद्यालयः, नवदेहली

**[ भगवद्गीता सर्वविषयाणां सारः विद्यते। आधुनिकशिक्षाक्षेत्रे भगवद्गीतायाः अपेक्षा अधिका विद्यते। छात्रव्यवहारे शिक्षणे च कियान् उपयोगः वर्तते भगवद्गीतायाः इति अस्मिन् लेखे उपवर्णितः। ]**

संस्कृतवाङ्मये श्रीमद्भगवद्गीता रत्नप्रभा इव वर्तते। ज्ञानकर्मयोगमाध्यमेन गीता यावदाध्यात्मिकं ज्ञानं प्रददाति तावदेव ग्रन्थेऽस्मिन् लौकिकज्ञानमपि प्रपूरितमस्ति। यथा आध्यात्मिकक्षेत्रे गीतायाः स्थानं महदस्ति तथैव लौकिकसमस्यानां निवारणेऽपि गीता संजीवनीवत् दृश्यते। सूक्ष्मदृष्ट्या ग्रन्थस्यास्य निरीक्षणेन प्रतीयते यत् गीतायां बहुविधलौकिकविषयाः प्रतिपादितास्सन्ति यथा– पर्यावरणचिन्तनम्, भक्तिचिन्तनम्, कर्मनीतिः, युद्धनीतिरित्यादयः। एतेष्वेव एकः विषयः शिक्षणनीतिरपि विद्यते। आधुनिके समाजे शिक्षा धनप्रधाना अस्ति न तु ज्ञानप्रधाना। बाल्यकालादेव छात्राणां मनस्सु स्थाप्यते यत् सा शिक्षा एव सफलीभूता यया आजीविका लभ्यते। कदाचित् अस्माकं संस्कृतशिक्षणप्रक्रियायामेव उक्तं यत्–**'सा विद्या या विमुक्तये'**[1] किन्तु साम्प्रतं स्थितिरियं नास्ति। येन केन प्रकारेण अस्माकमुद्देश्यं धनप्राप्तिरेव। अतो हेतोः अधिकाधिकं धनं प्राप्तुकामा छात्रा असामाजिककार्ये शीघ्रमेव संलग्ना भवन्ति। यतोहि साम्प्रतं शिक्षातन्त्रे नैतिकमूल्यानामभावः वर्तते। अतः एता एव समस्या अवलोक्य यदि गीतायाः परिशीलनं कुर्मः तर्हि अत्र बहुविधाः शिक्षातन्त्रसम्बन्धिनः तादृशाः प्रसंगाः उपलब्धास्सन्ति। येषामनुप्रयोगः समसामयिकशिक्षातन्त्रे कर्तुं शक्यते। अथ च यैः सम्भवतः सकारात्मकपरिणामा अपि भवितुं शक्यन्ते। अतः गीतायाः उपयोगः वर्तमानशिक्षातन्त्रे कथं कर्तुं शक्यत इति विषयं स्वीकृत्य गीताया एव केचन सिद्धान्ताः शोधपत्रेऽस्मिन् बिन्दुवाराः प्रस्तूयन्ते।

**1. ज्ञानम्** - यदि शिक्षातन्त्रस्य चर्चां कुर्मस्तर्हि प्रप्रथमं ज्ञानमिति विषय एव

---

1. श्रीविष्णुपुराणम्– 1/19/41

मनसि आगच्छति। आधुनिकसन्दर्भे ज्ञानमिति पाठ्यक्रमं वक्तुं शक्यत अस्माभिः। तदनु कीदृशं ज्ञानं शिक्षापद्धतौ भवेत्, ज्ञानस्य प्रयोजनं किम्, ज्ञानस्य कति प्रकाराः इत्यादयः प्रश्नाः बुद्धावापतन्ति। एतान् सर्वान् विषयान् गीतायां सुष्ठुतया कृष्णः प्रतिपादयति। यद्यपि कृष्णस्तु सम्पूर्णगीतायां अर्जुनाय ज्ञानमेव दत्तवान् तथापि सूक्ष्मदृष्ट्या पश्यामस्तर्हि अष्टादशषु अध्यायेषु न केवलं ज्ञानमपितु नैकाः विषयाः प्रतिपादितास्सन्ति। अत्र ज्ञानशब्दः ज्ञानयोग इति नाम्ना अपि बहुधा प्रयुक्तोऽस्ति। गीतायाः नवमेऽध्याये ज्ञानस्य महत्त्वं प्रतिपादयन् तात्पर्यबोधिन्यां ज्ञानं कीदृशं भवतीत्यस्मिन् विषये उक्तं यत् या विद्या अहङ्कारं नाशयित्वा आत्मतत्त्वं प्रकाशयतीति तदेव विज्ञानसहितं ज्ञानमुच्यते।[1] शाङ्करभाष्ये सर्वविषयाः येन ज्ञायन्ते तदेव ज्ञानमुच्यते– **'ज्ञानं ज्ञायते अनेन इति सर्वविषयम् अविशेषेण उच्यते'** अनेन प्रकारेण तात्पर्यबोधिन्यामपि सम्पूर्णानां पदार्थानां बोध एव ज्ञानम्– **'ज्ञानं साधारणः सर्वपदार्थविषयको बोधः'**।[2] पुनश्च गीतायां ज्ञानस्य प्रकारत्रयमुल्लिखितमस्ति। ज्ञायतेऽनेनेति ज्ञानं साधारणं सत्त्वादिगुणभेदेन सात्त्विकं राजसं तामसमिति त्रिधा विभज्यते।[3] यज्ज्ञानं विभक्तेष्वपि आत्मैकत्वं प्रकाशयति तत् सात्त्विकमुच्यते–

**सर्वभूतेषु येनैकं भावमव्ययमीक्षत।**
**अविभक्तं विभक्तेषु तज्ज्ञानं विद्धि सात्त्विकम्॥**[4]

वस्तुतः अत्र तात्पर्यमस्ति यत् सर्वेषु भूतेषु ऐक्यभावं यत् बोधयति तदेव ज्ञानं कथ्यते यथा ईशावास्योपनिषद्यपि उक्तम्।[5] येनाऽऽत्मनामनेकत्वं पश्यति तद्राजसं तथा कार्ये देहे प्रतिमादौ वा सक्तं एष देह एवात्मा, पाषाणादिरेवेश्वर इति निश्चययुक्तमहेतुकं ज्ञानं तामसमित्युच्यते।[6] एतेषु सात्त्विकं ज्ञानं मोक्षाय राजसं तु स्वर्गाद्यभ्युदयाय तथा तामसं केवलं मूढव्यवहारगोचरं जन्ममरणदुःखाय एव भवति। सात्त्विकज्ञानमेव परमं ज्ञानं वर्तते यतोहि अहङ्कारनाशेन ऐक्यभानानन्तरं ज्ञानप्रक्रियायै पुनः स्थानं न अवशिष्टं भवति। अतः त्रिष्वेव ज्ञानेषु सात्त्विकं ज्ञानमुत्तममिति।

1. श्रीमद्भगवद्गीता– 9/2 (यद्वा सर्वा विद्याः शास्त्रजन्याः सम्यगहङ्कारं वर्धयित्वाऽऽत्मतत्त्वं तिरोहितं कुर्वन्ति। इयं तु 'स आत्मा तत्त्वमसि' इति वाक्यश्रवणमात्रेण संजाता सत्यनात्मन्यहङ्कारं नाशयित्वा सर्वसंसारधर्मनिर्मुक्तमात्मतत्त्वं राजयाति प्रकाशयतीति... तात्पर्यबोधिनी, 489)
2. शाङ्करभाष्यम्, गीतातात्पर्यबोधिनी– 18/18
3. गीता– 18/19
4. तत्रैव –18/20
5. यस्तु सर्वाणि भूतान्यात्मन्येवानुपश्यति, सर्वभूतेषु चात्मानं ततो न विजुगुप्सते। ईशावास्योपनिषद्–6
6. गीता– 18/21, 22

आधुनिकशिक्षातन्त्रेऽपि छात्राणां मनोभ्य: अहंकारमपवारयितुं सात्त्विकज्ञानस्य अपेक्षा अनुभूयते। पुनश्च यद्यस्माकं ज्ञानं सात्त्विकं भविष्यति तर्हि करणीयानि कार्याणि अर्थात् कर्म तथा कर्ता अपि तदनुसारमनायासेनैव सात्त्विकं भविष्यति। न्यायदर्शनेऽपि उक्तं यत् ज्ञानानुसारेणैव इच्छा तथा प्रयत्न: (कर्म) भवति– **'यद्विषयकं ज्ञानं तद्विषयिणी इच्छा तद्विषयकं प्रयत्नम्'**। अत: एतत्तु प्रसिद्धमेवास्ति यदस्माकं कर्मण: व्यवहारस्य वा मूलं ज्ञानमेव भवति। यादृशं ज्ञानं दीयते समसामयिक-शिक्षाप्रणाल्यां तस्य परिणाम: छात्राणां कर्मरूपेण वयं द्रष्टुं शक्नुम:। तेषां व्यवहारे लोकहितं, वृद्धोपसेवा, पर्यावरणचिन्तनं, प्रकृतिप्रेम आदिक्रियानामभाव: दरीदृश्यते। अस्य कारणमस्माकं आधुनिकं ज्ञानतन्त्रम्, अत्र नास्ति कश्चन् संदेह:। अत: अस्मिन् विषयेऽपि यदि वयं सूक्ष्मतया गीताया: ज्ञानप्रक्रियामवलोकयाम: तर्हि संभवत: एतां स्थितिं निराकर्तुमर्हाम:। ऐक्यभावकारकं तथा कर्मण: मूलं ज्ञानमित्यनुसारेण गीतायां ज्ञानस्य अर्थद्वयं निश्चेतुं शक्यते। प्रथमं तु मानसे ऐक्यभावस्य सम्पूर्णता द्वितीयं तु तेन भावेन स्वभावस्य व्यवहारस्य वा परिवर्तनम्। अनेन प्रकारेण सात्त्विकज्ञानं कर्मातिरिक्तं अस्माकं कर्तृत्वं करणत्वञ्चापि परिवर्तयति।[1] वस्तुत: एषा एका श्रृङ्खला दीयते गीतायां यस्य मूलं ज्ञानमिति, पुन: ज्ञानानुसारेणैव अग्रे सर्वविधव्यवहाराणां परिवर्तनं भवति। अत: गीता प्रतिपादयति यत् ज्ञानमेव प्रथमतया प्रमुखतया च विचारयेत्।

सात्त्विकज्ञानस्य प्रयोजनं लोकहितं वर्तते। यतोहि येन सात्त्विकं ज्ञानं लभते स: सर्वदा लोकहिताय एव कर्माणि करोति। उक्तं हि चतुर्थाध्याये–

**एवं ज्ञात्वा कृतं कर्म पूर्वैरपि मुमुक्षभि:।**
**कुरु कर्मैव तस्मात्त्वं पूर्वै: पूर्वतरं कृतम्॥**[2]

अत्र कर्म इत्यस्य तात्पर्यं लोकहितार्थं कृतं कर्म वर्तते।[3] लोककल्याणाय यज्ज्ञानं प्रवर्तते, तदेव ज्ञानं सात्त्विकमुच्यते। वस्तुत: अस्मात् श्लोकात्पूर्वमुक्तं कृष्णेन यत् 'मम कर्मफले ईच्छा नास्ति तथा कर्माण्यपि मां न स्पृशन्ति' इदमस्ति मम स्वरूपम्। अत: मम एतादृशं स्वरूपं य: जानाति स: कर्मभि: न बध्यते।[4] अत्र 'जानाति' पदं प्रयुक्तम्, गीतारहस्ये अस्य अर्थ: कृतो यत् **'जानाति तदनुसारं च व्यवहरतीति'**[5]। पुन: कीदृशं व्यवहरति, अस्यैव प्रत्यक्षोदाहरणेन उपर्युक्तश्लोके

1. श्रीमद्भगवद्गीता– 18/18
2. तत्रैव– 4/15
3. पूर्वैरपि जनकादिभिर्लोकहितार्थं कर्म कृतं भवति यस्मात्......। तात्पर्यबोधिनी - 4/15
4. गीता– 4/14
5. जानता है शब्द से यहाँ 'जानकर तदनुसार बर्तने लगता है' ऐसा अर्थ विवक्षित है। गीतारहस्य– 4/14, पृ० 94

उल्लिखितं यत् ज्ञानानन्तरं ज्ञात्वा वा लोकहिताय समाजकल्याणाय च कर्म (व्यवहार:) करणीयम्। यथा अस्माकं मुमुक्षिभि: ज्ञानवृद्धै: पूर्वजै: जनकादिभिर्कृतम्। अत: अस्माकं ज्ञानस्य प्रयोजनं लोकहितं भवेदिति प्रतिपादयति गीता। वर्तमानकाले छात्रेषु मानवेषु च एषा प्रवृत्तिर्न दृश्यते। अस्य प्रमुखकारणं अस्माकं शिक्षापद्धतिरेव। आधुनिकं समाजमुचितदिशं नेतुं शिक्षातन्त्रे गीताया: ज्ञानस्य धारणा विधीयतामिति।

**2. व्यवहार:**- यथा अस्माकं ज्ञानं भवति तथैव व्यवहारोऽपि भवति उक्तं हि तर्कसङ्ग्रहे **"सर्वव्यवहारहेतुर्बुद्धिर्ज्ञानम्"**[1]। अत एव अस्मिन् शोधपत्रेऽपि प्रथमं ज्ञानं विचारितमनुज्ञानं व्यवहार: यतोहि ज्ञानमेव अस्माकं व्यवहारस्य हेतु: वर्तते। अनुभूयते यत् यादृशी शिक्षा दीयते विद्यालयेषु तादृश एव व्यवहार: दृश्यते छात्रेषु। अस्माकं ज्ञानस्य प्रयोजनं यदा लोकहितं भविष्यति तर्हि छात्राणां व्यवहारोऽपि तामेव दिशमनुगच्छति। वार्तेयं गीतायामुच्यते यत् विद्वज्जनानां कर्मव्यवहार: निष्कामभावेन लोकसंग्रहाय एव भवेत्–

**कुर्याद्विद्वांस्तथाऽसक्तश्चिकीर्षुलोकसंग्रहम्।**[2]

भगवता श्रीकृष्णेन अर्जुनं प्रति उक्तं यत् मया त्वया चापि लोकहितार्थमेव व्यवहार: कर्तव्य:।[3] गीतायां व्यवहारविषये पाश्चात्यदार्शनिक: अल्बर्टमहोदयोऽपि वदति यत् "The Bhagavad & Gita has a profound influence on the spirit of mankind by its devotion to God which is manifested by actions".[4] यद्यपि अत्र कृष्ण: गुरु: अर्जुनश्च शिष्य: तथापि कृष्णेन उच्यते यत् मया अर्थात् गुरुणा अपि लोकसङ्ग्रहाय कार्यं करणीयम्। अर्थात् गुरोर्व्यवहारोऽपि तथैव स्यात् यथा तस्य वचनेऽस्ति। यत्किञ्चित् ज्ञानं वयं दद्म: छात्रेभ्य:, तस्य अनुवृत्तिरस्माकं व्यवहारेऽपि भवेत् नोचेत् समाजस्य उपहतिर्भविष्यति।[5] पुनश्च य: व्यवहार: ज्येष्ठानां श्रेष्ठानां गुरुणां भवति शिष्या अपि तस्यैव अनुवर्तनं कुवन्ति।

**यत् यदाचरति श्रेष्ठ: तत् तदेवेतरो जन:।**
**स यत् प्रमाणं कुरुते लोकस्तदनुवर्तते।।**[6]

---

1. तर्कसङ्ग्रह: - बुद्धिलक्षणम्
2. श्रीमद्भगवद्गीता - 3/25
3. यत एषाऽनर्थपरम्परापत्तिस्तत: कृतकृत्यस्याऽपि मम तव चाऽप्यात्मविदोऽन्यस्य च लोकहितार्थं कर्म कर्तव्यमेवेति सिद्धम्। गीतातात्पर्यबोधिनी– 3/25
4. www.speakingtree.in
5. उत्सीदेयुरिमे लोका न कुर्यां कर्म चेदहम्
   शङ्करस्य च कर्ता स्यामुपहन्यामिमा: प्रजा:– 3/24
6. श्रीमद्भगवद्गीता 3/21

अतः अस्माकं शिक्षायाः प्रयोजनं लोकहितं तु भवेत् किन्तु अनेन सह अस्माकं व्यवहारेऽपि लोकहितानि कर्माण्येव भवेयुरित्यस्यापि प्रतिपादनं गीतायां परिलक्ष्यते। गीतायाः सिद्धान्तोऽयं शिक्षातन्त्रे छात्राणां 'आचारनिर्माणः' इत्यस्मिन्विषये बहुलाभप्रदः भवितुं शक्नोति। यतोहि समसामयिककाले छलछद्मभ्रष्टाचारयुक्तसमाजे यूनां व्यवहारः न लिप्येत इत्यस्य कृते अस्याम् दिशि गीताज्ञानानुप्रयोगस्य शिक्षातन्त्रे महती आवश्यकता अनुभूयते।

**3. शिक्षणशैली–** श्रीमद्भगवद्गीतायां कृष्णेन प्रमुखतया यया शैल्या अर्जुनः उपदिश्यते सा शैली वर्तते संवादशैली। गीताया आरम्भतः अन्तपर्यन्तं कृष्ण–अर्जुनसंवादः प्रचलति–

**अध्येष्यते च य इमं धर्म्यं संवादमावयोः।**[1]

गुरुः यत्किमपि पाठयति तस्य अवगमनं छात्राणां मनस्सु भवति न वा, इदं ज्ञातुं संवादशैली उत्कृष्टा शैली वर्तते। शैक्षणिकं वातावरणं रोचकं पाठ्यक्रमश्च आनन्दवर्धकः स्यादित्यस्य कृते गीतायामुपदिष्टा संवादशैली उपयुक्ता वर्तते। आधुनिकं शिक्षणपद्धतौ अपि गुरुछात्रयोः संवादः अतीव महत्वपूर्णं स्वीक्रियते। अनेन प्रकारेणैव गीतायां सर्वत्र प्रश्नोत्तरमाध्यमेन ज्ञानं प्रदीयते। प्रश्नोत्तरशैली अपि एका रीतिः वर्तते यया रीत्या ज्ञानस्य आदान–प्रदानं सहजतया भवति। वयं द्रष्टुं शक्नुमः यत् अर्जुनः यन्न जानाति साक्षात् तस्य मनसि संशयः भवति तदा अर्जुनः प्रश्नं पृच्छति यथा–

**किं तद्ब्रह्म किमध्यात्मं किं कर्म पुरुषोत्तम।**
**अधिभूतं च किं प्रोक्तमधिदैवं किमुच्यते।।**[2]

एतस्यानन्तरमेव कृष्णः अर्जुनस्य जिज्ञासाशमनं कर्तुं शक्तवान्। यतोहि यावत्पर्यन्तं छात्राः प्रश्नान् न करिष्यन्ति। तावत् शिक्षकेन तेषां जिज्ञासाशान्त्यै किमपि न कर्तुं शक्यते। अतः बालशिक्षातः उच्चशिक्षापर्यन्तं अस्माकं शिक्षणशैल्यां प्रश्नोत्तरशैली निश्चयेन भवितव्या। पुनश्च प्रश्नाः कथं करणीयाः इत्यस्यापि प्रशिक्षणं प्राथमिकशिक्षायां दातव्यम्। प्रश्ननिर्माणाय करणाय च छात्राणां व्यक्तित्वविकासः भवेदित्यस्यापि प्रतिपादनं करोति गीता। यदा अर्जुनः शोकसन्तप्तो भूत्वा तूष्णीमतिष्ठत् तदा कृष्णेन तादृशः उपदेशः प्रदत्तः अर्जुनाय यत् पुनः तस्मिन् जिज्ञासाभावः उत्पन्नः।

**एवमुक्त्वा हृषीकेशं गुडाकेशः परंतपः।**
**न योत्स्य इति गोविन्दमुक्त्वा तूष्णीं बभूव ह।।**[3]

1. तत्रैव– 18/70
2. तत्रैव– 8/1
3. तत्रैव – 2/9

अथ च अत्र केवलं इदमेव न प्रस्तुतं यत् प्रश्नः करणीयः अपितु यः प्रश्नः अस्ति तस्य निराकरणमपि कथं सम्यग्तया करणीयमित्यपि प्रतिपादितम्। अतः संशयनिराकरणपद्धतिरपि एका शैली इव उपलक्ष्यते अत्र। द्वितीयाध्याये (1-8) यदा अर्जुनस्य चित्ते नैकाः संशयाः आगताः तदा भगवता कृष्णेन **'गतासूनगतासूंश्च नाऽनुशोचन्ति पण्डिताः'**[1] इत्यादीभिः उक्तीभिः कौन्तेयस्य संशयनिराकरणं कृतम्। अतः अस्याः पद्धतेरपि उपयोगिता आधुनिकशिक्षणशैल्यां भवितुं शक्नोति। पुनश्च सम्पूर्णगीता पद्यरूपा वर्तते। अस्याः काव्यात्मिका शैली अपि बहु उपकारिकी भवितुमर्हति। यतोहि पाठ्यक्रमस्मरणाय कण्ठस्थीकरणाय च पद्यात्मिका शैली एव उपयुक्ता भवति। वर्तमानसमये छात्राणां स्मरणशक्तिः क्षीणा जायमाना अस्ति। अतः एतां समस्यां निराकर्तुं गीतायाः पद्यरूपा शैली उपयुक्ता प्रतीयते।

**4. छात्र-अवधारणा-** वस्तुतः वयं श्रीमद्भगवद्गीतायामर्जुनं छात्ररूपेण अवलोकितुं शक्नुमः यतोहि शोकसन्तप्तः कातरः अर्जुनः विनम्रभावं श्रीकृष्णस्य पुरतः प्रदर्शयति। भगवता कृष्णेन यत्किमपि शिक्षितं तत्सर्वमपि अर्जुनः छात्रवत् सौम्यभावेन गृहीतवान्। यदि सः भगवतः उपदेशे श्रद्धां न अकरिष्यत् तर्हि सः जयं न अप्राप्स्यत्। अतः अत्र अर्जुनः छात्ररूपेण दृश्यते। यथा अर्जुनस्य कृष्णे पूर्णश्रद्धा आसीत् तथैव छात्राणामपि शिक्षके श्रद्धा भवेत्। यदि श्रद्धा भविष्यति तर्हि एव ज्ञानं लप्स्यत इति गीतायाः सन्देशः–

**श्रद्धावाँल्लभते ज्ञानं तत्परः संयतेन्द्रियः।**
**ज्ञानं लब्ध्वा परां शान्तिमचिरेणाधिगच्छति।।**[2]

छात्रैः सेवया प्रणिपातेन च ज्ञानार्जनाय उपगुरु गन्तव्यम्।[3] साम्प्रतं वयं पश्यामः छात्रेषु श्रद्धाभावः नास्ति। अतः यः ज्ञानं प्राप्तुकामः तस्य प्रप्रथमं गुरौ श्रद्धा आवश्यिकी। श्वेताश्वतरोपनिषदि गुरोर्महत्त्वमेवं प्रतिपादितम्– **"यस्य देवे परा भक्तिः यथा देवे तथा गुरौ"**।[4] यस्य छात्रस्य गुरौ श्रद्धा न भवति तर्हि तेन पठिताः अर्थाः प्रकाशिताः न भवन्ति। गीता अपि उपनिषदां सारः अतः भावोऽयं अत्रापि परिलक्ष्यते।

पुनश्च छात्रे तत्परता भवेत्। छात्रव्यवहारे अयं बिन्दुरपि महत्त्वपूर्णः वर्तते यत् छात्राः निष्क्रियाः न भवेयुः। ते कार्यकरणे अध्ययने च सर्वदा सक्रियाः भवेयुः। संभवतः उपर्युक्तश्लोके 'तत्परः' इति पदस्य आशयः अयमेव। तदनु

---

1. तत्रैव - 2/11
2. श्रीमद्भगवद्गीता– 4/39
3. तद्विद्धि प्रणिपातेन परिप्रश्नेन सेवया– 4/34
4. श्वेताश्वतरोपनिषद्– 6/23

उच्यते इन्द्रियनिग्रहः। ज्ञानप्राप्तुं छात्रैः स्वेन्द्रियाणामुपरि नियन्त्रणं कर्तव्यम्। यः इन्द्रियाणां दमनं करोति सः जितेन्द्रियः कथ्यते **"संयतानि विषयेभ्यो निवर्तितानीन्द्रियाणि स जितेन्द्रियः"**[1]। जितेन्द्रिये एव ज्ञानप्रापनाय अधिकारित्वं वर्तते इति गीतायाः संदेशः। वस्तुतः आधुनिककालेऽपि अस्माभिरवलोक्यते यत् बहूनि साधनानि तादृशानि सन्ति यानि अध्ययनरतछात्राणामिन्द्रियं कृष्णन्ति यथा आधुनिकसमये 'स्मार्टफोन' इत्यस्य प्रयोगः वरीवर्ति सर्वत्र। एतस्य अतिप्रयोगेन Nomo phobia, Phantom, Anñiety, Depression[2] इत्याद्यः मानसिकसमस्याः जायमानास्सन्ति, याभिः ज्ञानप्राप्तौ बाधा उत्पद्यते। यद्यपि वर्तमानसमाजे तु इन्द्रियनिग्रहः सर्वेषां कृते आवश्यकः तथापि छात्रजीवने अस्य महती आवश्यकता दृश्यते। यतोहि छात्रा एव राष्ट्रस्य कर्णधारः। यदि तैः अनुचिता दिक् गमिष्यते तर्हि राष्ट्रोऽपि तां दिशमेव अनुवर्तते।

वयं गीतां पश्यामः तर्हि तत्र अर्जुनः सर्वत्र जिज्ञासां प्रदर्शयति। यथा कोऽहम्, कुतो आगतः इत्यादय प्रश्नाः तेन चिन्तिताः। तथैव छात्रेष्वपि जिज्ञासाभावः आवश्यकः। वस्तुतः भावस्यास्य बाल्यकालादारभ्य छात्रमनसि विकासः कारणीयः **'तद्विद्धि प्रणिपातेन परिप्रश्नेन सेवया'**[3] अत्र 'परिप्रश्नः' इति शब्दः जिज्ञासाभावमेव सूचयति। गीतायां जिज्ञासाभावस्य अपरमुदाहरणम्–

> **अपरं भवतो जन्म परं जन्म विवस्वतः।**
> **कथमेतद्विजानीयां त्वमादौ प्रोक्तवानिति।।**[4]

अतः सर्वदा छात्राणां मनस्सु जिज्ञासा भवेदित्यपि अवबोधयति गीता। समसामयिकशिक्षातन्त्रे गीतायाः सन्देशोऽयं अतीव प्रासंगिकः वर्तते। समस्यानां निराकरणेऽपि छात्रस्य महती इच्छा स्यात्। स्वतर्कसंगतबुद्ध्या तेन समस्यानां समाधानमन्वेषणीयमित्यस्यापि उदाहरणानि बहुधा दृश्यन्ते श्रीमद्भगवद्गीतायाम्।

---

1. गूढार्थदीपिका– 4/39
2. Nomo phobia is a mental disorder; it is a result of the development of new technologies.
   Phantom vibration syndrome or phantom ringing is the perception that one's mobile Phone is vibrating or ringing when it is not ringing.
   Anxiety disorders are a group of mental disorders characterized by feelings of anxiety and fear. (www-wikipedia-org)
3. तत्रैव - 4/34
4. तत्रैव– 4/4

**ज्यायसी चेत् कर्मणस्ते मता बुद्धिर्जनार्दन।**
**तत्किं कर्मणि घोरे मां नियोजयसि केशव।।**[1]

अत्र अर्जुनः तर्कसंगतबुद्ध्या अन्तर्द्वन्द्वं प्रस्तूय निराकरणं प्राप्तवान्। वस्तुतः वर्तमानशिक्षापद्धतौ बिन्दुरयं उच्चशिक्षायाः दृष्ट्या महत्त्वपूर्णः प्रतीयते। यतोहि शोधक्षेत्रे समस्यानां निराकरणमेव शोधस्य प्रयोजनं भवति। अतः यदि प्रसंगदृष्ट्या पश्यामः तर्हि गीतायां सम्यग्तया उपस्थापितं यत् छात्रजीवनं व्यवहारो वा कथं भवेदिति।

**5. शिक्षक-अवधारणा–** गीतायां श्रीकृष्णेन उच्यते यत् ज्ञानीजनाः तत्त्वदर्शिनश्चौव ज्ञानं प्रदातुं समर्थाः भवन्ति। अत्र ज्ञानी इत्यस्य तात्पर्यं वर्तते यः पदवाक्यप्रमाणज्ञः अर्थात् शास्त्रजन्यज्ञानसम्पत्तिमान् अस्ति। पुनश्च सः तत्त्वदर्शी अपि भवेत्। वस्तुतः गीतायां तु अस्यार्थः ब्रह्मसाक्षात्कारिजनः इति विधीयते किन्तु आधुनिकसन्दर्भे विषयस्य याथातथ्यज्ञानं तथा स्वविषयसिद्धिर्स्यात् शिक्षकस्य इदं ग्रहीतुं शक्नुमः।

**उपदेक्ष्यन्ति ते ज्ञानं ज्ञानिनस्तत्त्वदर्शिनः।**[2]

एतादृशाः ये गुरवः विधीयन्ते तैरेव आचार्यैः उपदिष्टं ज्ञानं फलितं भवति। मुण्डकोपनिषदि अपि उक्तम्– **"तद्विज्ञानार्थं स गुरुमेवाभिगच्छेत्समित्पाणिः श्रोत्रियं ब्रह्मनिष्ठम्"**[3]। अतः शिक्षकः शास्त्रज्ञः तत्त्वज्ञश्च भवेत् इत्युपदिशति गीता।[4]

शिक्षकाय आवश्यकमस्ति यत् सः छात्राणां मनोविज्ञानमपि जानीयात्। यथा कृष्णः प्रत्यवसरमवगच्छति यत् साम्प्रतम् अर्जुनस्य मनोदशा का? अतः कया रीत्या तस्मै ज्ञानं दातव्यमिति यथा प्रथमेऽध्याये अर्जुनः विषादग्रस्तः आसीत् तदा लौकिकोदाहरणैः सरलरीत्या च कृष्णेन ज्ञानस्य प्रतिपादनं कृतम्। पुनः यदा अर्जुनस्य मनोस्थितिः सुदृढा जाता तदा अभ्यर्जुनम् एकादशाध्याये विश्वरूपस्य दर्शनं कारयित्वा ब्रह्मज्ञानं प्रदीयते –

**दर्शयामास पार्थाय परमं रूपमैश्वर्यम्।**[5]

तथैव छात्रस्य कार्यक्षमताज्ञानमपि ज्ञातव्यं शिक्षकेन यतोहि सर्वे छात्राः

1. श्रीमद्भगवद्गीता– 3/1
2. तत्रैव– 4/34
3. मुण्डकोपनिषद्– 1/2/12
4. तस्माच्छास्त्रज्ञं तत्त्वज्ञं च गुरुमाश्रयेदिति सिद्धम्। गीतातात्पर्यबोधिनी– 4/34
5. श्रीमद्भवद्गीता– 11/9

समानाः न भवन्ति। अतः यथा तेषां सामर्थ्यं तथैव ज्ञानं बोधनीयम्। शिक्षकस्य पार्श्वे सर्वदा विकल्पः भवितव्यः इत्यस्य उचितमुदाहरणं दृश्यते द्वादशेऽध्याये। विराटरूपदर्शनान्तरं वासुदेवः कौन्तेयं ब्रवीति यत् विश्वरूपे मय्येव चित्तमाधत्स्व, यदि चित्तसमाधाने असमर्थः तर्हि पूर्वं अभ्यासयोगेन मनः दृढतरं कुरु, यदि अस्मिन्कर्मण्यपि असमर्थः तर्हि वैदिकं लौकिकञ्च सर्वाणि कर्माणि स्वार्थाय न अपितु मदर्थमेव कुरु, पुनश्च यदि भवाननुपपन्नः तर्हि कृतानां कर्माणां यानि फलानि तान्यपि परित्यजेत् इति।[1] अत्र कृष्णः स्वशिष्यस्य कार्यक्षमतानुसारेण तस्मै विकल्पं प्रददाति। येन सः सहजरीत्या स्वकर्म कुर्यात् इति। आधुनिकशिक्षातन्त्रेऽपि शिक्षकेन एतादृशः व्यवह्रियेत।

पुनश्च छात्रेभ्यः आदेशः न दातव्यः अपितु तैः सह मित्रवद्व्यवहारः करणीयः। गीतायां सम्पूर्णज्ञानस्य प्रत्यक्षाप्रत्यक्षरीत्या उपदेशानन्तरं वासुदेवः धनञ्जयमुक्तवान् यत् साम्प्रतं भवतः सम्मुखं ज्ञानस्य सर्वे मार्गाः ज्ञापिताः मया। इदानीं त्वं चिन्तय यत् त्वया किं करणीयम्। अस्मिन् विषये अत्र ममादेशः न, अत्र भवान् स्वतन्त्रः –

**इति ते ज्ञानमाख्यातं गुह्याद्गुह्यतरं मया**
**विमृश्यैतदशेषेण यथेच्छसि तथा कुरु॥**[2]

अतः गीता एतदपि शिक्षयति यत् शिक्षकछात्रयोः व्यवहारः मित्रवत् भवेत्। वस्तुतः परम्परेयं तु वैदिककालादेव **'सह नाववतु सहनौ भुनक्तु'**[3] इत्यस्मिन् रूपे प्राप्यते। गीतायां तु केवलं तस्य भावस्यैव विस्तारः विहितः।

**6. ज्ञानप्राप्तिसाधनम्** – यः कश्चनपि ज्ञानं प्राप्तुमिच्छति चेत् तर्हि तस्मै गीतायां कानिचन साधनानि प्रदत्तानि सन्ति। अत्र ज्ञानप्राप्तौ एका युक्तिः दीयते **युक्ताहारः**। युक्ताहारस्य[4] आशयः न तु अधिकभोजनं न तु अल्पभोजनम्। छात्रजीवने युक्ताहार एव करणीयः तदैव ज्ञानं फलितं भवति। छात्रेण अत्यधिकं भोजनं न कर्तव्यं यतोहि तृष्णया अधिकभोजनात्परं अजीर्णदोषेण बहव्यः व्याधयः शरीरं पीडयन्ति। येन पुनः अध्ययने मनः तत्परं न भवतीति आशयः। अस्मात् कारणात् 'अल्पाहारः' विद्यार्थिनां पञ्चलक्षणे एकमस्तीति सुभाषितमपि प्रसिद्धम् – **"अल्पाहारी गृहत्यागी विद्यार्थी पञ्च लक्षणम्"**। अनेन प्रकारेण भोजनं न करणीयमथवा

---

1. तत्रैव – 12/ 8–11
2. तत्रैव – 18 / 63
3. शान्तिपाठ – कठोपनिषद्
4. 'यद्भुक्तं सञ्जीर्यति शरीरस्य च कार्यक्षमतां सम्पादयति तदात्मसम्मितमन्नमेव युक्ताहारः'। गूढार्थदीपिका 6–16

अत्यल्पकरणीयम् एतदपिनास्ति। यतोहि अत्यल्पत्वकारणात् शरीरे पोषणाभावः भवति। पोषणाभावेन अस्माकं शारीरिकी मानसिकी च कार्यक्षमता न्यूना भवति। येन ज्ञानप्राप्तौ बाधा उत्पन्ना भवति। यथा शतपथब्राह्मणेऽपि उक्तम्–

**यदु ह वा आत्मसंमितमन्नं तदवति तन्न हिनस्ति**
**यद्भूयो हिनस्ति तद्यत्कथनीयो न तदवति।**[1]

गूढार्थदीपिकायाम् अस्मिन् विषये उक्तं यत्– अर्धमशनस्य सव्यञ्जनस्य तृतीयमुदकस्य तु, वायोः संचरणार्थं तु चतुर्थमवशेषयेत्।[2] पुनश्च समयेन शयनं तथा समयेन जागरणमपि ज्ञानप्राप्तौ सहायकं भवति। एषा प्रक्रिया गीतायां **'युक्तस्वप्नावबोधः'** कथ्यते। छात्रजीवने एतदतिमहत्त्वपूर्णं साधनं विद्यते शिक्षायाः। इदानीं छात्रेषु अवसादः बहुधा दृश्यते येन तेषां शिक्षा अवरुद्धा भवति। तत्र बहुमहत्त्वपूर्णं कारणमस्ति जागरणशयनयोः प्रक्रिया। अत एव गीतायां अर्जुनं प्रति कृष्णः उक्तवान् यत्–

**न चातिस्वप्नशीलस्य जाग्रतो नैव चार्जुन।**[3]

अर्थात् न तु अत्यधिकं शयनं करणीयं न तु अधिकं जागरणमेव। द्वयोः उचिता स्थितिः यत्र भविष्यति तत्रैव ज्ञानमार्गः सरलः भविष्यति। सम्भवतः अत्र उपस्थापितं कारणद्वयं ज्ञानप्राप्तौ अतीवमहत्त्वपूर्णम्। अतो हेतोः गीतायाः षष्ठाध्याये पुनः वदति वासुदेवः -

**युक्ताहारविहारस्य युक्तचेष्टस्य कर्मसु**
**युक्तस्वप्नावबोधस्य योगो भवति दुःखहा।**[4]

अतः शिक्षणतन्त्रस्य दायित्वं केवलं पाठ्यक्रमनिर्माणः नियुक्तिः प्रकाशनादिर्न अपितु छात्राणां शारीरिकमानसिकविकासाय तेषां स्वास्थ्यशिक्षा अपि अवधातव्या। गीतायाः बिन्दुरयं समसामयिकशैक्षणिकस्तरे छात्राणां मानसिक-शारीरिकदृष्ट्या च स्वास्थ्याय ज्ञानग्रहणाय च अतीव प्रासंगिकः।

**उपसंहारः** - अनेन प्रकारेण वयं पश्यामः यत् गीतायाः नैकाः पक्षास्सन्ति, ये वर्तमानशिक्षातन्त्रे प्रासंगिकाः उपयोगिनश्च भवितुं शक्नुवन्ति। अस्माकं शिक्षाप्रणाल्यां गीता प्रारम्भिकस्तरादेव भवितव्या इति वर्तमानस्य आवश्यकता। यथा प्राथमिकशिक्षायां बालानां ज्ञानाय आधुनिकविषयाः वर्तन्ते तथैव गीता अपि भवेत्। यतोहि गीता धर्मग्रन्थः मात्रमेव न अपितु तत्र समाजशास्त्रं, पर्यावरणविज्ञानं, दर्शनं, प्रबन्धनशास्त्रं,

---

1. शतपथ ब्राह्मण– 9/2/1/2
2. गूढार्थदीपिका– 6/17
3. गीता– 6/16
4. श्रीमद्भगवद्गीता– 6/17

शिक्षणशास्त्रं तथा विज्ञानसदृशाः नैकाः विषयाः वर्तन्ते। येषामवबोधः छात्रेभ्यः प्राथमिकशिक्षाया आरभ्य एव कारणीयः। पाश्चात्यविद्वाँसोऽपि धर्मग्रन्थरूपे नापितु विज्ञानरूपे गीतां स्वीकृतवन्तः। अस्मिन् विषये आइन्स्टाईनमहोदस्य वक्तव्यमपि अस्ति यत्–'When I read the Bhagavad & Gita and reflect about how God created this universe everything else seems so superfluous'.[1] पुनश्च गीता न केवलं धर्मविशेषस्य ग्रन्थः अपितु अस्यां प्रतिपादिताः विषयाः सर्वेभ्यः उपयोगिनस्सन्ति। वस्तुतः गीता जीवमात्रस्य कल्याणाय उपलब्धः महत्वपूर्णग्रन्थः वर्तते। गीतायाः महत्त्वम् अनेन प्रतिपाद्यते यत् वैज्ञानिकः राबर्टओपेनहाइमरमहोदयः स्वकोशे गीतां स्थापयति स्म। यदा तेन 'Nuclear bomb' इत्यस्य परीक्षणं कृतमासीत् तत्क्षणे तस्मिन्नेव स्थले च तेन गीतायाः एकादशाध्यायस्य द्वादशः श्लोकः **'दिवि सूर्यसहस्त्रस्य भवेद्युगपदुत्थिता, यदि भाः सदृशी सा स्याद्भा-सस्तस्य महात्मनः'** इति उच्चारितः।[2]

अतः अस्माकं जीवने प्रतिक्षणं गीताया सिद्धान्तानामेव अनुप्रयोगः दृश्यते। गीतायां प्रतिपादितानि शास्त्राणि अनुकरणीयानि सन्ति। तानि तथैव प्रासङ्गिकानि वर्तन्ते यथा आधुनिकविज्ञानम्। केवलं अस्माभिः दृष्टिः परिवर्तनीया। यदि वयं गीतायाः सूक्ष्मदृष्ट्या विश्लेषणं कुर्मः तर्हि तस्यां केवलमाध्यात्मं नापितु नैकाः विषयाः द्रष्टुमर्हामः। तेषु विषयेषु एकं शिक्षणशास्त्रमपि वर्तते। अतः गीतायां विश्लेषितं शिक्षणशास्त्रं समसामयिकशिक्षातन्त्रे अनेकाभिः दृष्टिभिः प्रासंगिकं उपयोगि च भवितुं शक्नोति।

## सन्दर्भग्रन्थसूची

ईशादि नौ उपनिषद्, गीता प्रेस : गोरखपुर, सं. 2068.

अन्नम्भट्टः, तर्कसङ्ग्रहः,

तिलक, लोकमान्य बाल गंगाधर, गीता रहस्य–भाग 2 (श्रीमद्भगवद्गीता), दिल्ली : जेड एक्स पब्लिकेशन्स, 2016.

विष्णुपुराणम् (समीक्षितावृत्तिः) प्रथमो भागः, सं. मधुसूदनः पाठकः, प्राच्यविद्यामन्दिरम्, वि.सं. 2055

1. www.Variedessays.blogspot.in
2. तत्रैव– 11/12

श्रीवाजसनेयी-माध्यन्दिन-शतपथब्राह्मणम् (श्रीभाष्यकार-सायणाचार्यविरचितवेदार्थ-प्रकाशाख्यभाष्यसमेतम्) प्रथमो भागः,नवदेहली : राष्ट्रीयसंस्कृतसंस्थानम्, 2002.

श्रीमद्भगवद्गीता, गीता प्रेस : गोरखपुर, सं.

श्रीमद्भगवद्गीता (श्रीमत्परमहंसपरिव्राजकाचार्यपूज्यपादश्रीशङ्करानन्दसरस्वतीविरचितया गीतातात्पर्यबोधिन्या यतिवरश्रीभोलेबाबाविरचितेन तदनुवादेन च समलङ्कृतः), दिल्ली : भारतीय बुक कार्पोरेशन, 2005.

श्रीमद्भगवद्गीता (श्रीमधुसूदनसरस्वतीकृत-गूढार्थदीपिकाव्याख्योपेता, समीक्षात्मक-भूमिका-प्रतिभाख्यहिन्दीभाष्यानुवाद-विमर्शाख्यव्याख्यात्मकटिप्पणी-विविधानु-क्रमणिकायुता) भाग– 2, सं.– मदनमोहन अग्रवाल, दिल्ली : चौखम्बा संस्कृत प्रतिष्ठान, 2010.

Sharma, Adarsh, Personality in bhagavagita (In the Perspective of Philosophy, Psychology, Education, Administration and Management), Sonepat : Adarsh Publication, 2004.

www.wikipedia.org

www.speakingtree.in

www.Variedessays.blogspot.in

✦✦✦

 ISSN : 0975-1769

# संस्कृतसाहित्ये हिमालयस्य सांस्कृतिकस्वरूपम्

-रिगज़िन यंगडोल
शोधच्छात्रा, संस्कृतप्राच्यविद्याध्ययनसंस्थानम्
जवाहरलालनेहरूविश्वविद्यालयः नई दिल्ली

**[ संस्कृतसाहित्ये हिमालयस्य वर्णनम् असकृत् उपलभ्यते। अस्मिन् शोधलेखे सांस्कृतिकदृष्ट्या हिमालयस्य कीदृशं स्वरूपं विद्यते इति उपवर्णितः अस्ति। ]**

**सारांश**

भारतीयसभ्यतायां संस्कृतभाषायाः साहित्यस्य च विशिष्टपरम्परा वर्तते, यस्याः प्रतिष्ठा सामाजिकसांस्कृतिकधार्मिकपक्षेष्वपि दृग्गोचरी भवति। नदीवनसरोवर-पर्वतादिभिः सह मानवसभ्यतायाः संस्कृत्याश्च सम्बन्धः आदिकालतः वर्तते। भारतीयसंस्कृत्याम् हिमालयः रक्षकरूपेण अभिहितः। हिमालयस्य अङ्केऽव भारतीयसभ्यता-संस्कृति-आध्यात्मञ्चादीनां बीजं सन्निहितोऽस्ति। देवभूमि-हिमालयस्य बहुषु आश्रमेषु तपोवनेषु च ऋषिभिर्कृततपमाध्यमेन भारतीयसंस्कृतिः सुसमृद्धा सुसमपन्ना च जाता। भारतीयसमाजाय अयम् अलौकिकप्रेरणायाः धार्मिकतायाः आध्यात्मिकतायाश्च केन्द्रम्। भारतीयसंस्कृत्याः प्रादुर्भावे, तस्याः विकासे च हिमालयसंस्कृत्याः विशिष्टं महत्त्वं वर्तते। एकस्मिन् पक्षे एषा प्राकृतिकसौन्दर्ये जनमानसं प्रभावयति, अपरपक्षे ज्ञानतपाध्यात्मिकवैभवेष्वपि स्वकीया विशिष्टता उपस्थापयति। हिमालयः भारतस्य भौगोलिकविस्तारं रेखाङ्कितं कुर्वन् सति सांस्कृतिकबोधमपि परिभाषयति। भारतस्य सांस्कृतिकजीवनदर्शनं उपस्थापयितुं हिमालयस्य अपूर्वा महत्ता। गगनचुम्बितोतुङ्गशृङ्गहिमालयोऽयं सृष्ट्याः उच्चतायाः विशालतायाश्च द्योतकः। अत एषः मानवस्य अहङ्कारदर्पयोः खण्डकः। अतः हिमालयः भारतस्य आध्यात्मिक-भौतिक-सांस्कृतिकप्रगत्याः प्रकाशस्तम्भ इति।

**बीजशब्दाः**

हिमालयः, संस्कृतिः, देवभूमिः, सभ्यता, आध्यात्मिकता, प्राकृतिकसौन्दर्यम्, भारतवर्षम्।

भारतीयसभ्यतायां संस्कृतभाषायाः साहित्यस्य च विशिष्टपरम्परा वर्तते, यस्याः प्रतिष्ठा सामाजिक-सांस्कृतिक-धार्मिकपक्षेष्वपि दृग्गोचरी भवतिं नदीवनसरोवर-पर्वतादिभिः सह मानवसभ्यतायाः संस्कृत्याश्च सम्बन्धः आदिकालतः वर्तते। संस्कृतसाहित्ये हिमालयः न केवलं पर्वतरूपेण, अपितु सामाजिकसांस्कृतिकेतिहासिक-धार्मिकस्थलरूपेण प्रस्तूयते, यः गङ्गायमुनासरस्वत्यादीनां नदीनाम् उद्गमस्थलं, वैदिकदेवकिन्नरयक्षसिद्धयादिदेवानाम् क्रीड़ाक्षेत्रं, शिवपार्वत्योः निवासभूमिः, नरनारायण्योः तपः स्थलीः प्रकृत्याःपुण्यस्थलञ्चास्ति। वैदिकसाहित्यं विश्वसाहित्ये प्राचीनतमः विद्यते। वेदादेव सृष्टिरुत्पत्तिः, तत्सम्बन्धीः समस्यानां समाधानञ्च सम्भवति। हिमालयस्य उत्पत्तिर्विषयक ज्ञानमपि वेदात् सम्प्राप्यते। वैदिकसाहित्ये 'हिमालयं' 'हिमवान्', 'हिमवतः', 'हिमवन्तः'[1] इत्यादि-शब्दैः इङ्गितमस्ति। 'हिमवन्तः' इति शब्दं अथर्ववेदे पर्वतानां उपाधिरूपेण वर्णितम्[2]। अथर्ववेदे उल्लिखितं यत् हिमालयप्रादुर्भूतनदीनां जलं हृदयरोगनिमित्तं अत्यन्तोपयोगी भवति।[3] हिमालयशब्दस्य व्युत्पत्तिः 'हन' धातोः मकप्रत्यये सति निष्पन्ना भवति, यस्यार्थः शीतलवस्त्वाकाश-वाष्पश्च।[4] वाचस्पत्ये हिमालयः 'भारतवर्षस्य सीमापर्वतः' इति उद्घोषितः।[5] शब्दकल्पद्रुमे हिमालयाय नगपतिमेनाधवउमागुरुश्चादि-पर्यायशब्दानां प्रयोगं जातम्। सम्पूर्णसंस्कृत-वाङ्मये हिमालयस्य बहुविधरूपाणां दर्शनं प्राप्यते। संस्कृतसाहित्ये हिमालयः जड़चेतनयोरुभयोरपि रूपयोः चित्रं प्रस्तौभि। जड़रूपं नगाधिराजादि[6] उपाधिभिः, तथा च चेतनरूपं राजारूपेण विभूषितः।[7]

भारतीयसंस्कृत्याम् हिमालयः रक्षकरूपेण अभिहितः। हिमालयस्य अङ्केऽव भारतीयसभ्यता-संस्कृति-आध्यात्मञ्चादीनां बीजं सन्निहितोऽस्ति। देवभूमि-हिमालयस्य

---

1. यस्येमे हिमवन्तो महित्वा यस्या समुद्रं रसया सहाहुः।
   यस्येमाः प्रदिशो यस्य बाहू कस्मै देवाय हविषा विधेम॥ ऋग्वेदः 10.121.4
2. गिरियस्ते पर्वता हिमवन्तोरणयं ते पृथिवी स्योनमस्तु।
   वभ्रुं कृष्णं रोहिणी विश्वरूपां ध्रुवां भूमिं पृथिवीमिन्द्रगुप्ताम्।
   अजीतोहतोअक्षतोध्यष्ठज्ञं पृथिवीहम्॥ *अथर्ववेदः 12.1.11*
3. हिमवतः प्रस्रवन्ति सिन्धौ समह सङ्गमः।
   आपो ह मह्यं तद् देवर्ददन् हृद्द्योतभेषजम्॥ *अथर्ववेदः 6.24.1*
4. उणादि० 1.146
5. वाचस्पत्यम्, पृष्ठ 5428
6. अस्त्युत्तरस्यां दिशि देवात्मा हिमालयो नाम नगाधिराजः।
   पूर्वापरौ तोयनिधि विगाह्य स्थितः पृथिव्या इव मानदण्डः॥ *कुमारसम्भवम्, 1.1*
7. अथ पर्वतराजोऽसौ हिमवान् ध्यानकोविदः।
   दुहितुर्देवदेवेन ज्ञात्वा तदभिमन्त्रितम्॥ *ब्रह्मपुराणम् 36.2*

बहुषु आश्रमेषु तपोवनेषु च ऋषिभिर्कृततपमाध्यमेन भारतीयसंस्कृतिः सुसमृद्धा सुसम्पन्ना च जाता। हिमालयोऽयं वाल्मीकिरामायणे ऋषीणां तपोभूमिः, जलस्रोत-जलप्रवाह-कन्दरादिप्राकृतिकस्रोतैर्युक्तो विदितः।[1] महाभारतेऽप्ययम् ऋषीणां तपस्थली, तथा च तीर्थस्थलरूपेण प्रस्तुतः।[2] हिमालयस्य उपत्यका अपि पवित्रभूमिरिति संज्ञया अभिहिताः, याः भारतीयजनमानसे स्वदेशप्रेम-त्याग-धार्मिकता-अहिंसा-बन्धुत्वादीनाञ्च सन्देशं प्रददति। स्कन्दपुराणस्य केदारखण्डे हिमालयभूमिं स्वर्गभूमिरिति कथिता।[3] विष्णुपुराणे भारतवर्षस्य भारतीयसंस्कृतेश्च परिभाषणे हिमालयस्य महत्त्वं प्रस्तूयते।[4]

संस्कृतसाहित्ये हिमालयस्य सांस्कृतिकरूपस्य वर्णनं प्रायः कविभिः कृतम्। कुमारसम्भवे कालिदासेन देवात्मा इति संज्ञया हिमालयस्य महत्ता प्रतिपादिता।[5] अभिज्ञानशाकुन्तलेऽयं हिमपुरुषरूपेण कल्पितः यत्र हिमिति प्रदेशस्य राजा तथाश्च पार्वत्याः पितुरस्ति।[6] भारतस्य पश्चिमोत्तरीय-उत्तरीय-उत्तरपूर्वीयाश्च सीमाः हिमालयस्य विविधश्रृङ्खलाभिः विनिर्मिते सदि देशस्य सभ्यता संस्कृतिः जीवनास्तित्वञ्च चिरकालपर्यन्तं बाह्याक्रान्तादिभिः सुरक्षितमभूत्। एतदतिरिक्तं हिमालयस्य प्रभावो प्रारम्भत एव भारतीयमानसे साहित्ये दृश्यते। भारतीयसमाजाय अयम् अलौकिकप्रेरणायाः धार्मिकतायाः आध्यात्मिकतायाश्च केन्द्रम्। कालिदासस्य रचनासु हिमालयस्य प्राकृतिकसौन्दर्यवर्णनेन सह अस्य समाजिकरीतीणां परम्पराणाञ्च वर्णनं प्राप्यते।[7] हिमालयस्य सहृदया, उदारता, रत्नानां बाहुल्यं, शरणागतप्रकृतिरेतस्य रचनासु दृग्गोचरी भवति। रघुवंशे इन्दुमतीस्वयंवरसम्बन्धे भारतस्य चतुर्दिग्जनपदानां, तेषां शासकानां,

---

1. वाल्मीकिरामायणम्, 1.42.3, 1.48.33, 4.11.12-13
2. महाभारतम्, 12.314.23-24
3. गंगाद्वारोत्तरं विप्र स्वर्गभूमिः स्मृताबुधैः। अन्यत्र पृथिवी प्रोक्ता गंगाद्वारोत्तरं बिना। इदमेव महाभाग स्वर्गद्वारं स्मृतं बुधैः। यस्य दर्शनमात्रेण विमुक्तो भवबंधनैः॥ स्कन्दपुराणम्, केदारखण्डः, 106.4
4. उत्तरं यत् समुद्रस्य हिमाद्रिश्चैव दक्षिणम्।
   वर्षं तत् भारतं नाम भारती यत्र संततिः॥ विष्णुपुराणम्, 2.3.1
5. अस्त्युत्तरस्यां दिशि देवात्मा हिमालयो नाम नगाधिराजः।
   पूर्वापरौ तोयनिधि विगाह्य स्थितः पथिव्या इव मानदण्डः॥ कुमारसम्भवम्, 1.1
6. कार्या सैकतलीनहंसमिथुना स्रोतोवहामालिनी पादास्तामथितो निषण्णहरिणा गौरागुरोः।
   शाखालम्बितवल्कलस्य च तरोर्निर्मातुमिच्छाम्यधः शृङ्गे कृष्णमृगस्य वामनयनं
   कण्डूयमानां मृगीम्॥ अभिज्ञानशाकुन्तलम्, 6.17
7. अयाचितारं न हि देवदेबमद्रिः सुतां ग्राहयितुं शशाक।
   अभ्यर्थनाभङ्गयेन साधुमाध्यस्थ्यमिष्टेऽप्यवलम्बतेऽर्थे॥ कुमारसम्भवम्, 1.52

राज्यनाञ्च विशिष्टनैसर्गिकी-सुषमा तथा च हिमालयसौन्दर्यं विशदरूपेण प्रस्तुतम्।[1] सांस्कृतिकैकतायाः निर्माणे हिमालयस्य प्रमुखभूमिका। हिमालये संस्थितानां विविध तीर्थानां यात्राः भाषागतभिन्नत्वे सत्यपि मानवान् एकसूत्रे बध्नाति, मानवीयमूल्यान्, साम्प्रदायिकसौहार्दं शान्तिमुन्नतिञ्च स्थापयति।

भारतीयसंस्कृत्याः प्रादुर्भावे, तस्याः विकासे च हिमालयसंस्कृत्याः विशिष्टं महत्त्वं वर्तते। एकस्मिन् पक्षे एषा प्राकृतिसौन्दर्ये जनमानसं प्रभावयति, अपरपक्षे ज्ञानतपाध्यात्मिकवैभवेष्वपि स्वकीया विशिष्टता उपस्थापयति। कालिदास-भास-भारवीत्यादिकवयः, हिमालयीक्षेत्रस्य संस्कृतकवयश्च अस्य प्राकृतिकसौन्दर्यस्य निरूपणं कुर्वन् साहित्यिक-सांस्कृतिकपक्षौ विशेषरूपेण उल्लेखितवन्तः। हिमालयीक्षेत्रहिमाचलस्य संस्कृतरचनासु संस्कृतिरक्षकरूपेण हिमालयस्य प्रस्तुतिः। हिमाचलस्य काव्यकारः पण्डितदुर्गादत्तशास्त्रिण विरचिते 'मधुवर्षणम्' इत्यस्मिन् काव्ये हिमालयः भारतस्य प्रहरीरूपेण प्रदर्शितः।[2] रचनाकारकेशवशर्मणः सुनृता-गीतिकाव्ये हिमालयः 'एशियाद्वीपस्य संस्कृतेः विधाता' इति संज्ञया अभिहितः। यथा कालिदासस्य अभिज्ञानशाकुन्तले हिमालयीवनस्पतयः सचेतनप्रकृतिरूपे चित्रिताः, तथैव हिमालयीक्षेत्रस्य रचनाकाराः सुरजमुखीबुरांशशीरादयः हिमालयस्य प्राकृतिकसम्पत्तिं प्रतीकरूपेण प्रस्तूयन्ते।

वस्तुतः प्रतीकाः वर्णितविषयस्य प्रभावं वर्धयन्ति। प्रतीकस्रोतांसि प्राकृतिक-पदार्थाः, पौराणिकाख्यानानि, ऐतिहासिकघटनाः, राजनैतिकतथ्यादयः भवितुमर्हन्ति। अत एव रचनाकारैः अलङ्कार-रचनार्थं प्रायः प्रकृत्याः उपमानानि गृहीतानि।

हिमालयः भारतस्य भौगोलिकविस्तारं रेखाङ्कितं कुर्वन् सति सांस्कृतिकबोध मपि परिभाषयति। भारतस्य सांस्कृतिकजीवनदर्शनं उपस्थापयितुं हिमालयस्य अपूर्वा महत्ता। गगनचुम्बितोतुङ्गशृङ्गहिमालयोऽयं सृष्ट्याः उच्चतायाः विशालतायाश्च द्योतकः। अत एषः मानवस्य अहङ्कारदर्पयोः खण्डकः। मानवीयसंवेदनानां अभिव्यक्तौ कालिदासविरचितमेघदूते आनन्दप्रतीकरूपेण प्रस्तुतः हिमालयः।[3] प्राकृतिकस्रोतागारे हिमालये नदी-जलप्रपात-जलाशय-कन्दरादीनाम् प्राप्तिर्भवति। हिमालयोद्भवा नदी पुराणेषु 'हिमवत्पादनिः सृताः' इति कथिता। गङ्गा-सरस्वती-शतुद्री-चन्द्रभागा-यमुना-सरयू-वितस्ता-विपाशा-देविका-लाोहित्यादयः नद्यः हिमालसयात् प्रभवन्ति।[4] पुराणानुसारं हिमालयोद्भवाः नद्यः महावेगवत्यः भवन्ति, तथा च तासां जलानि

---

1. रघुवंशम्, 4.71-75, 77
2. मधुवर्षणम्, तृतीयसर्गः
3. मेघदूतम्, 52-55
4. वपायुपुराणम्, 45.94.96, ब्रह्मपुराणम्, 27.25-27, मार्कण्डेयपुराणम्, 57.16-18

वैदूर्यमणिसमस्वच्छानि मधुराणि च भवन्ति। मार्कण्डेयपुराणे नदीनां वर्णनं सर्वपापहारिणीरूपेण प्राप्यते।[1] महाभारते हिमालयप्रवाहितनद्यः जलानां मधुरताकारणात् विश्वस्य मातेत संज्ञिताः।[2] अतः प्राकृतिकस्रोतानां महत्तां परोपकारस्य चोल्लेखं कुर्वन् मत्स्यपुराणे हिमालयस्य शतशः सुष्ठु जलप्रपातानां वर्णनं प्राप्यते।[3]

एतदतिरिक्तं हिमालयः विविधरत्नानां भण्डागारोऽपि वर्तते। कविभिरपि हिमालयः नानारत्नपरिपूर्णः कथितः। हिमालयस्यांशः कैलाशः कुबेरनगरीरूपेण सुविख्यातः। महाकविकालिदासानुसारं हिमालयोऽयम् अनन्तरत्नानाम् उत्पादकोऽस्ति येन हिमस्यातिशयतापि तस्य सौभाग्यं न नश्यति। कुमारसम्भवेऽप्युल्लिखतं यत् हिमालये गैरिकसिन्दूरादिधातूनां मिश्रितशैलः प्राप्यते यस्य प्रयोग अप्सराणां प्रसाधननिमित्तं भवति। विविधधातूनां प्राप्तिस्थलभूतत्वात् कालिदासेन हिमालयः 'धातुताम्रधरः' इति संज्ञया अभिहितः।[4] किरातार्जुनीयेऽपि हिमालये प्राप्तानाम् अनेकविधरत्नानामुल्लेखः संप्राप्यते। ब्रह्मपुराणे हिमालयसन्दर्भे 'हिमवन्तं रत्नमयं' इति प्राप्यते। महाभारतस्य गङ्गावतरणप्रसङ्गे हिमालयशिखरेषु विविधरत्नधातूनां दर्शनं भवति। अत एव बहुविध रत्नैः परिपूर्णोऽयं हिमालयः भारतसमृद्धौ सहायकः।

**निष्कर्षः**

संस्कृतसाहित्ये हिमालयः भौतिकस्वायत्ततापेक्षया देवतारूपेण, एवञ्च प्रकृत्याः अलङ्काररूपेण प्रस्तुतः। हिमालयस्य श्रृङ्क्षलासु, सरितानां सङ्गमेषु ऋषीणां मेधा प्रेरणां प्राप्ता। अतः संस्कृतसाहित्ये 'वसुधैवकुटुम्बकम्' इत्यादि-सद्भावानां प्रस्तावकरूपेण हिमालयः वर्णितः। हिमालयः भारतीयजीवनदर्शने मानवीयमूल्यानां मानदण्ड इव उपस्थापितः। जड्चेतनयोरुभयोरपि रूपयोः मानवीयमूल्यानाम् उच्चादर्शाणाञ्च प्रतीतिः सम्यकतया जायते। स्वविशालता-दिव्यता-भव्यतादिकारणत्वादयं मानवजीवनदर्शने प्रेरणायाः स्रोतः। नदी-रत्न-जलाशय-औषधादीनां सन्धात्री एषा पवित्रदेवभूमिः भारतीयसंस्कृत्याः मूलं संधारयति। भारतस्य भौगोलिकविस्तारस्य सीमानिर्धारके हिमालये भारतीयसांस्कृतिकगहनतायाः दिग्गदर्शनमपि भवति। हिमालये

---

1. विश्वस्य मातरः सर्वाः सर्वपापहराः स्मृताः।
   अन्याः सहस्रशश्चोक्ताः क्षुद्रनद्यो द्विजोत्तम्॥ मार्कण्डेयपुराणम्, 57. 31
2. विश्वस्य मातरः सर्वाः सर्वाश्चैव महाफलाः।
   तथा नद्यस्त्वप्रकाशाः शतशोऽथ सहस्रशः॥ महाभारतम्, भीष्मपर्वः 9.37
3. महाप्रपातसंपातप्रपातादिगताम्बुभिः।
   वायुनीतैः सदातृप्तिकृतिदेशं क्वचित्क्वचित्॥ मत्स्यपुराणम्, 117.17
4. कुमारसम्भवम्, 6.51

प्रादुर्भताः नद्यस्सर्वतृप्तिकराः, औषधयश्चारोग्यकराः। अतः हिमालयः भारतस्य आध्यात्मिक-भौतिक-सांस्कृतिकप्रगत्याः प्रकशस्तम्भ इति।

## सन्दर्भग्रन्थसूचिः

*अथर्ववेद का सुबोधभाष्य.* दामोदरसातवलेकरः. पारडी*:* स्वाध्यायमण्डलम्, 1938.

अग्रवाल, वासुदेवशरणः. *मार्कण्डेयपुराण का सांस्कृतिक अध्ययन.* इलाहाबादः हिन्दुस्तानी अकेडमी, 1961.

*अभिज्ञानशाकुन्तलम्,* (अनु०) बाबूराम त्रिपाठी. आगराः रतनप्रकाशनम्, 1989.

*ऋग्वेद संहिता,* पूनाः वैदिक संशोधन मंडल, 1972.

*ऋतुसंहार.* कालिदासः. (व्या०) रांगेयराघवः. दिल्लीः आत्माराम एण्ड संस, 1973.

*कालिदास ग्रन्थावली.* (व्या०) पण्डित रामतेजशास्त्री. (सं०) ब्रह्मानन्द त्रिपाठी, वाराणसीः चौखम्बासुरभारतीप्रकाशनम्, 2014.

*किरातार्जुनीयम्.* भारवि. (व्या०) बदरीनारायण मिश्र. वाराणसीः चौखम्बा-सुरभारतीप्रकाशनम्, 2012.

*कुमारसम्भवम्.* कालिदासः. (व्या०) कृष्णमणि त्रिपाठी. वाराणसीः चौखम्बासुरभारतीप्रकाशनम्, 2011.

कुमार, कृष्ण. *प्राचीन भारत का भौगोलिक परिवेश.* हरिद्वारः मयंक प्रकाशनम्, 2004.

काण्डपाल, भवानीदत्तः. *कुमाऊँनी का संस्कृतमूलक व्याकरण, भाषा विज्ञान एवं साहित्य.* हरिद्वारः उत्तराखण्ड संस्कृत अकादमी, 2007.

चातक, गोविन्दः. *भारतीय लोकसंस्कृति का सन्दर्भ, मध्य हिमालय.* नई दिल्लीः तक्षशिलाप्रकाशनम्, 1990.

*मेघदूतम्.* कालिदासः. (व्या०) दयाशंकरशास्त्री. वाराणसीः चौखम्बासुरभारती-प्रकाशनम्, 2014.

✦✦✦

संस्कृत-विमर्शः 2020 ( अङ्कः 18 ) ISSN : 0975-1769

# जानकीहरणजानकीजीवनमहाकाव्ययोः राजनीतिविज्ञानम्

-डॉ. बुल्टी दासः
अगरतला, त्रिपुरा

**[ अस्मिन् लेखे जानकीहरणजानकीजीवनमहाकव्ययोः उपवर्णिताः राजनीतिविज्ञानविषयाः निरुपिताः। तत्र राजधर्मः करनीतिः, राष्ट्रशासनम् इत्यादिविषयाणां तुलनात्मकरूपेण विचारः कृतः अस्ति। ]**

**कूटशब्दाः**- राजनीतिः, अर्थनीतिः, राजधर्मः, सार्वभौमत्वं, राष्ट्रतत्वम्, सामन्ततन्त्रं, मन्त्रीपरिषदः, दूतः, सभा, सभासदः, करनिर्धारणनीतिः, राष्ट्रशासनकर्तृत्व-मुत्तराधिकारसूत्रेण प्रजाकर्तृक निर्वाचनमुखेन वा राज्याभषेकः, दिग्विजययात्रा, विचरव्यवस्थ, युद्धं विश्वशान्तिश्च, शिक्षानतः, आजीविका, षाड्गुण्यमपायचतुष्टय, राजमण्डलं, कल्यानमूलकराष्ट्रशासनं, राजनैतिकमैत्री, आपत्प्रतिकारोपायचिन्तनम्।

**शोधसारः** - जानकीहरणजानकीजीवनमहाकाव्ययोः राजनीतिविज्ञानम् इति गवेषणानिबंधे उभयत्रमहाकाव्यद्वयगतायाः राजनैतिकावस्थायाः स्वातन्त्रेण व्यष्टिरूपेण तुलनात्मकविचारेण च सम्पादिता अस्माभिः। अत्र दण्डनीतेस्तथ अखिलराजधर्ममूलत्वेन अर्थनीतेरपि परिचयः आलोच्यमहाकाव्यद्वयगतोपादानानि संकलय्य उपपादयितुं प्रयत्नः कृतः। पर्यालोचनस्य समग्रस्य स्पष्टीकरणार्थं याथातथ्येन च समुपस्थापनार्थं प्राचीनराजनीतिशास्त्राणि अनुगमकतयानुसृतानि पर्यवेक्षतानि च। सम्भवतः ख्रीष्टिय-षष्ठशतके आविर्भूतस्य कविकुमारदासस्य जानकीहरणमहाकाव्ये तथा अर्वाचीने पण्डितप्रवराभिराजराजेन्द्रमिश्रस्य जानकीजीवन-महाकाव्ये च प्राक्तनकविनाट्यकाराणां कालिदास-भट्टीभाषादीनां काव्यनाट्येषु राजनैतिकवैशिष्ठानां प्रभावे अपि निवेदितो अस्माभिः। प्राचीननवीनयोः महाकाव्ययोः चित्रितस्य राजनैतिकधर्मस्य मानदण्डः आधुनके अपि राष्ट्रशासने अनुसरणयोग्यतामार्हतीत्यवधेयम्।

**शोधः ( मुख्यांशः )** अस्मदनुसन्धेयमहाकाव्यद्वयस्थं राजनीतिविषयोपस्थापनम् अभिप्रेतम्। राजनीतिसम्बन्धिनो विषया वैदिकसंहिता सुब्राह्मणेषु राजधर्म-विषयकशास्त्रेषु च सादरं समुपवर्णिता उपलभ्यन्ते। तेषां सर्वतः समाकलनेन एकत्रनिबन्धनम् अस्माकमिष्टम्। परन्तु आकारगतपरिमाणतया विषयगत-वैचित्र्यबाहुल्यात् च सांप्रतं

सातिशयसंक्षेपेण राष्ट्रविषयकं तत्त्वं किञ्चिन्मात्रमेव समुद्धृत्य उदाहरणरूपेण उपस्थापयामः। वैदिककाले तदुत्तरकाले च राजतन्त्रं राष्ट्रनीतौ सर्वोपरि स्वमहिम्ना विराजते स्म। अतः राष्ट्रे राज्ये वा राज्याभिषिक्तः राजा वा श्रद्धया च गृहीतः आसीत्। ततस्तु राज्यस्तुतिः राजस्तुतिर्वा साकूतमुल्लिखितं वेदेषु। उत्तरकाले काव्यजगति नाट्यजगति च लौकिक-संस्कृतवाङ्मये राजतन्त्रस्यैव विजयगीतिडिण्डिमः श्रूयते। विशेषतस्तु 'गद्यपद्य-मयी राजस्तुतिः काव्यस्य विशिष्टरूपमाधाय विरूदसंज्ञया प्रथिता दृश्यते।[1]

ऋग्वेदसंहितायां दशममण्डले 173-संख्यके सूक्ते च मन्त्रषट्के राजस्तुति-विधीयते।[2] अविचलितस्वतन्त्रप्रभुसत्तायां प्रतिष्ठितः प्रजाहितैषी राजा प्रजानाम् अभिमततमरूपेण वर्णितः उपलभ्यते। अथर्ववेदसंहितायामपि राज्याभिवर्धनं राजकर्तृकं शत्रुघातनं शत्रुसम्मोहनं च सम्यक् वर्णित मास्ते।[3] स्वराज्यच्युतस्य राज्ञः पुनःस्थापनं, प्रजाकर्तृकं राज्ञः वरणं राज्ञः राज्यलाभः तस्य च राजकृत्या-नुष्ठानम् इत्येते विषयाः ऋग्वेदीयमन्त्रषट्के उपनिबद्धा वर्तन्ते। अपि च अथर्ववेदे एकस्मिन् सूक्ते राजसूययागेन राज्याभिषेकवर्णनं तथा सेनानिरीक्षणं, सेनासंयोजनं, संग्रामविजयादिवर्णनमपि सहृदयानां प्रीतिजननाय समुपन्यस्तं उपलभ्यते।[4] ऐतरेयब्राह्मणे 33-39-संख्यकेषु अध्यायेषु राजसूययागे राज्ञः राज्याभिषेकवर्णनं तस्य प्रजापालनं राज्यसंरक्षणं प्रजाकल्याणाय राज्यस्य समृद्धिसाधनं तत्र तत्र वर्णितं विद्यते। राज्यस्य कल्याणाय ब्राह्मणपुरोहितस्य संस्थापनम् अपि चत्वारिंशेऽध्याये समुपन्यस्तं दृश्यते। 38-तमे अध्याये द्वितीयेखण्डे राज्यात् प्रभृति साम्राज्यं यावत् भूखण्डानां परिणतिवैचित्र्यात् अधिकारवैचित्र्यात् उच्चावचपदभाजां विविधत्वं नामतः उल्लिख्य प्रदर्शितम्। अतः राजानोऽपि उत्कृष्टापकृष्टपदाधिकारितया भोज-स्वराट्-विराट्-परमेष्टि-राजेत्यादिभिः संज्ञाभिः संज्ञिता भवन्ति।[5]

एवमेव अखिलवैदिकसंहितासम्बद्धेषु ब्राह्मणेषु राजतन्त्रसंश्लिष्टाः केचन यागाः प्रसिद्धाः सन्ति। ते हि विशिष्टयागाः राजसूय-वाजपेय-अश्वमेध-विश्वजिदित्यादि-नाम्ना प्रसिद्धिम् आप्नुवन्ति। एतेषां यागानामनुष्ठानेन क्रमेण 'राजसूयेन राजा' भवति, वाजपेयेन सम्राट् भवति, अश्वमेधेन सार्वभौमः भवति, विश्वजिता च विश्वाधिपतिर्भवति। एतेषामनुष्ठानेन तारतम्येन राष्ट्राधिकारलाभादपि तेषु अनुष्ठानेषु

1. साहित्यदर्पणः 6/313
2. ऋग्वेदसंहिता, 10/173,174, पृ. 760-761
3. अथर्ववेदसंहिता, 1/6/1-2; 3/1/1-5
4. अथर्ववेदसंहिता, 4/7/1; 6/11/1; 6/13/1
5. ऐतरेयब्राह्मणम् 38/3 पृ. 933-934

एव अभिषिक्तानां अधिपानां स्वराज्यं प्रति स्वप्रजापुञ्जं प्रति च संरक्षणाभ्युदयादिकर्तव्य-पालनशपथस्यापि ग्रहणम् अवश्यं कर्तव्यमिति विहितं दृश्यते। राजनीतिविधायकमालोचनं मनुप्रभृतिविरचितेषु विंशतिसंख्यापरिमितेषु स्मृतिशास्त्रेषु अपि समुपलभ्यते। विशेषतः मनुसंहितायाः सप्तमाध्याये तथा याज्ञवल्क्यस्मृतौ आचाराध्याये राजधर्मप्रकरणे सविस्तारं वर्णितमस्ति। प्रख्यातेषु राजनीतिशास्त्रेषु वृहस्पति-शुक्राचार्य-कामन्दक-कौटिल्य-प्रमुखविरचितेषु वैशद्येन प्राक्तनाचार्यमतोपन्यासपूर्वकं सुनिबद्धं राष्ट्रतत्त्वं समुपलभ्यते।

महापुराणेषु उपपुराणेषु च राजनीतिशास्त्रमधिकृत्य विमर्शः सविशदम् अस्माभिः उपलभ्यते। तेषां संग्रहेण आलोचनमपि बृहदायतनं स्यात्। महाभारते आर्षमहाकाव्ये विशेषतः शान्तिपर्वणि राजनीतेः अर्थनीतेश्च द्वयोरेव सुविस्तृतमालोचनम् अस्माकं दृष्टिपथं अवतरति। रामायणे अपि तथैव। अतः जानकीहरणमहाकाव्ये जानकी-जीवनमहाकाव्ये च राजधर्मविवरणस्य उपस्थितिः अवश्यमेव सम्भावनापक्षं न परिहरति। कोशलाधिपतेः दशरथस्य पुत्रः रामचन्द्रः राज्याभिषेकव्याघातात् प्रत्यवायवशात् निर्वासितोऽभूत्। तदनन्तरं रावणवधादिकर्म परिसमाप्य अयोध्यां प्रत्यागत्य राज्ये राजरूपेण अभिषिक्तः बभूव। तत्र च बालिवधेन किष्किन्धाराज्ये सुग्रीवस्य अभिषेचन, तथा च रावणवघात् अनन्तरं विभीषणस्य राज्याभिषेकः तत्र तत्र प्रदर्शितः। यथा कोशलदेशाधिपतिः आदौ पिता दशरथ पश्चाच्च पुत्र रामचन्द्रः एवं मिथिलाधिपति जानकीजनकः राजर्षिजनकश्च महाकाव्यद्वये सार्वभौमनरपतिरूपेण यथाशास्त्रमभिषिच्य स्थापितः। वशिष्ठेन शतानन्देन च ऋषिणा पृथक् पृथक् सर्वेषां दशरथ-रामचन्द्र-राजर्षिजनक-बालि-सुग्रीव-रावण-विभीषणेति राज्याधिपानां सामान्यविशेषतश्च राज्याभिषेकपूर्वकं राज्याधिकारं प्राप्य राजधर्मपालनप्रक्रिया समासता व्यसतो वा समुल्लिखिता प्राप्यते। एतेषां राज्ञां राजनैतिकव्यवहारा आलोच्यमहाकाव्यद्वयतः समुदाहृत्य समीक्षणम् इष्टम्। विंशतिसर्गात्मके जानकीहरणमहाकाव्ये प्रायेण सर्वत्र, एवं एकविंशतिसर्गात्मके जानकीजीवने च तत्र तत्र प्रासंगिकतया वर्णिता उपात्ता च राजनीतिः कदाचित् ऋजुणा मार्गेण क्वचित् च कुटिलगत्या घटनाचक्रान्तर्वर्तितया प्रवहति स्म इति उपलब्धुं शक्नुमः वयम्। अस्मिन् क्षणे ग्रन्थ-गौरवभिया सविस्तरं सोदाहरणं च तत् राष्ट्रतत्त्वस्वरूपं वर्णयितुं प्रेरणाविमुखा वयमिति सर्वं सहृदयविदुषां करूणार्द्रचित्तानां स्नेहदृष्टिं अस्मान् प्रति अपेक्षामहे।

वाल्मीकीयरामायणं कुमारदासीयजानकीहरणम् अभिराजराजेन्द्रमिश्रप्रणीत-जानकीजीवनं च त्रिवेणीसंगमरूपं महातीर्थस्थानमिति प्रतिभाति अस्माकं चित्तदर्पणे। वाल्मीकीयरामायणतः प्रेरणाप्रस्रवणधारा कविवरस्य कुमारदासस्य अभिराजराजेन्द्र-मिश्रस्य च हृदयबुद्धिकन्दरमवगाह्य शाखाद्वयेन विभज्य कालव्यवधानेन जानकीहरणं जानकीजीवनञ्चेति नाम्ना प्रख्यातेन महाकाव्यद्वायरूपेण विवर्तितं विपरिणतं च परिलक्ष्यते। महाकाव्यद्वये चेतनास्रोतसा बहुनि सामाजिको-पादानानि तरंगभंगलीलया

लिलायितानि समुपलभ्यन्ते। तेषु उपादानबहुलेषु राष्ट्रतत्त्वचिन्तनं पर्यवेक्षणविषयतया साम्प्रतम् अस्माकम् ईप्सिततमम्। राष्ट्रतत्त्वे राजनीतिविषयः राजधर्मो वा प्रधानतया प्रतिपाद्यः उपलभ्यते। आलोच्यमहाकाव्यद्वयेविदेह-कौशल-लङ्काराज्यभूमिश्चेति राज्यत्रयं मुख्यतया राजनीतितत्त्वसमीक्षणे समुपस्थितं भवति। गौणतया च मुख्यवृत्तान्तसम्बद्धतया किष्किन्धाऋष्यमूकप्रसङ्गोऽपि उपेक्षितुं न शक्यते। राष्ट्रतत्त्वे भूमण्डलगतस्य विशिष्टभूखण्डस्य जनसमाजस्य प्रभूत्वस्य च सम्बन्धः संयुक्तः समुपलभ्यते। राष्ट्रशासनतन्त्रस्य सार्वभौमस्वातन्त्र्यम् अर्थात् एकातपत्रप्रभूत्वम् ईप्सितमेव। कदाचित् कुत्रचित् च एतद् तथा न भवति। सामन्तनृपादीनां सार्वभौमराजादधीनत्वात् तेषां सार्वभौमस्वातन्त्र्यं न भवितुम् अर्हति। वाल्मीकीयरामायणे आलोच्यमहाकाव्यद्वयेऽपि समाजतन्त्रस्य गणतान्त्रिकस्य प्रजातन्त्रस्य वा प्रवर्तनं प्रचलनं वा दृष्टिपथं नावतरति। राष्ट्रपरिपालकरूपेण शासनव्यवस्थायाः प्रवर्तकरूपेण उत्तराधिकारबलेन अथवा प्रजागणद्वारा निर्वाचमुखेन यो भवति राज्यशासकः स एव राजा इति अभिधीयते राजनीतिशास्त्रेषु। अत्र राज्ञः राज्यप्रशासनं निर्धारितनीतिवलेनैव प्रचलति स्म। स एव राजधर्मः इति पारिभाषिकशब्देन परिचीयते।

जानकीहरणमहाकाव्ये जानकीजीवनमहाकाव्ये च राष्ट्रतत्त्वसमीक्षणं कार्यमस्माकम्। कालक्रमानुरोधेन पूर्वभावित्वात् जानकीहरणस्य राजनीतितत्त्वपर्यवेक्षणम् आदौ निष्पाद्यम्। रघूणाम् अन्वये वर्तमानस्य अजनन्दनदशरथस्य[1] समृद्धायाम् अयोध्यानगर्यां[2] प्रजाशासनचरितचित्रणं रम्यं बुद्धिवेद्यञ्चेति वर्णितं कविना। कौशलराज्यस्य राजधानी अयोध्यानगरी। तत्राभिषिक्तः राजा दशरथः। स हि शास्त्रानुगामी इन्द्रियजयी[3] प्रजाहितव्रती विजीगिषुश्चेति।[4] स हि नीत्यनुसारतः निर्धारितेभ्य आयस्थानेभ्यः करादानेन जातिवर्णनिर्विशेषं प्रजानां दुःखहर्ता गुरुवशिष्ठेन सह तथा अष्टसंख्यकोपेतमन्त्रिमण्डलीतोऽपि मन्त्रणापूर्वकं राज्यशासनकार्यनिर्वाहकर्ता परराज्यविजयेन प्रभूतधनरत्नसंग्रहकारी स्वप्रजानां हितकारीति प्रतीयते।[5] मृगयाव्यसन्यप्यसौ राजा दशरथः दिग्विजययात्रायां[6] समधिकः समुत्सुकः आसीत्। तत एव कोशलराष्ट्रस्य प्राच्यां दक्षिणस्यां च दिशि नृपतेस्तस्य दिग्विजययात्रा प्रारब्धा। चतुर्दिगन्तेषु तस्य विजयघोषः समजनि। विजितनृपतिभ्यः अपरिमेयसम्पदमाहत्य राज्ञः दशरथस्य अयोध्यायां

1. जानकीहरणम्, 1/12-13
2. तत्रैव, 1/10-11
3. तत्रैव, 1/14
4. तत्रैव, 1/16-25।
5. तत्रैव, 1/45-72।
6. तत्रैव, 1/16-25।

प्रत्यावर्तनं राजमहिम्नः प्रद्योतकम्।[1] एतेन परराज्याधिकारेण राज्यसीमाविवर्धनं धनरत्नादिवैभवसंग्रहणं च राजचक्रवर्तिहेतुकम् इति। राजनीतिशस्त्रे विजिगीषु नृपतेः तथा सामान्यतः द्वादशात्मकराजमण्डलस्य विषयः उपपादितो दृश्यते। यागाद्यनुष्ठानं राजकर्तव्यं भवति प्रजाहिताय। राज्यशासननैपुण्ये अस्त्रविद्यया सह शास्त्रविद्यायाः अपि अभ्यासः कर्तव्यः। अतः चतुर्थसर्गे रामं प्रति राजकर्तव्यतोपदेशकुशल-राजनीतिज्ञानस्य परिचायकः। राज्ञः दशरथस्य चतुर्थसर्गे युद्धविषयमाश्रित्य औचित्यानोचित्यविचारः उत्थापितः। तत्रविश्वशान्तिप्रयोजनहेतुकं युद्धमपि अनिवार्यं भवति क्वचित् कदाचित् चेति सिद्धान्तः उपलभ्यते।[2] पञ्चमसर्गे राक्षसैः सह रामस्य युद्धं वर्णितम्। तत्र राजनीतिशास्त्रोक्तं युद्धकौशलं प्रतिविम्बितं दृश्यते।अपि च धनुर्धारिण श्रीरामचन्द्रस्य धनुर्विद्यायाः युद्धक्षेत्रे शत्रुवधे प्रयोगकौशलमपि प्रदर्शितमास्ते। अत्र वैशम्पायनविरचिते नीतिशास्त्रे नीतिप्रकाशिकायां द्वितीयाध्याये धनुर्वेदविद्याविषयकं तत्त्वविवरणम् अवधेयम्।[3] जानकीहरणस्य षष्ठसर्गे नीतिशास्त्रसम्मतकरादानव्यवस्थायाः[4] संकेतः उपलभ्यते। तत्रैव वृद्धावस्थायां राजभृत्यानां भरणपोषणकर्तव्यतोपेशः समुपलभ्यते। दरिद्रान् प्रति औदार्यं भरणपोषणव्यवस्थाकरणमपिराज्ञः कर्तव्यम् इत्यप्यनुशासनमुपलभ्यते। शत्रूणामपि स्त्रियः प्रति रक्षाभारवहनं राज्ञः कर्तव्यपक्षे औचित्येन वर्तते इत्यपि समुल्लिखितम्। नवमसर्गे क्षत्रियनृपतीनां धनुर्विद्याभ्यासपरिचयः उपलभ्यते। दशमसर्गे राज्ञः दशरथस्य राज्यशासननीतिः वर्णिता। तत्र विजयाभिलाषः राजनीतेरङ्गमिति प्रतीयते। शत्रुमित्रोदासीनसम्बद्धराजमण्डलस्य उल्लेखः दशमे सर्गे एव सम्प्राप्यते। साम-दान-भेद-दण्डचतुष्टयस्य सुविहितप्रयोगः राजनीतेरङ्गम्। एतत्प्रसङ्गेनषाड्-गुण्यनीतिरपि उपयुज्यते। आदर्शराजनीतिविषयकमन्त्रणा-पूर्वकराजनीतेः प्रयोगः साफल्यप्रदायको भवति।

चतुर्थसर्गे श्रीरामचन्द्रस्य ताडकादिराक्षसवधकार्यं नीतिमूलकं क्षात्रशौर्यविज्ञापकं सर्वजनहितकरञ्चेति प्रतीयते। पितुः सकाशात् विश्वामित्रसान्निध्यतश्च अस्त्रशस्त्रादि-विषयकं राज्यशासनविषयकञ्च अनुशासनं तेनाधिगतम्।

उत्तरकाले सुग्रीवादिभिः सह मैत्रीबन्धनं किष्किन्धाधिपतेः वानरराजस्य बालिनः हननं श्रीरामचन्द्रस्य राजनीतिज्ञानस्य परिचायकम्। चतुर्दशसर्गे नीतिज्ञवानरप्रधानैः सह सीतान्वेषणविषयकम् आलोचनं रामचन्द्रस्य राजनैतिकप्रज्ञासूचकमेव। पञ्चदशसर्गे लङ्काप्रवेशनिमित्तं साम-दान-भेद-दण्डरूपात्मकस्य उपायचतुष्टयस्य प्रयोगनीतिः

---

1. जानकीहरणम्, 1/90।
2. तत्रैव, 10, 4/67-69।
3. नीतिशास्त्रम्।
4. जानकीहरणम्, 6/39।

राजनीतिरेव अङ्गभूता। ततश्च लङ्काधिपतिना रावणेन सह युद्धप्रसङ्गे आदौ दूतसंप्रेषणं पश्चाच्च युद्धोद्यमः। युद्धविजयश्च अभिज्ञराजनीतितत्त्वज्ञस्य युद्धविशारदस्य च नीतिनैपुण्यपरिचायकः इति प्रतिभाति। पञ्चदशसर्गे एव दूतरूपेण प्रेषितस्य अङ्गदस्य रावणराजसभायां राजनैतिकं भाषणं रावणमातामहस्य नीतिज्ञमाल्यवतः सामद्युपाय-चतुष्टयमूलकं षाडगुण्यप्रयोगमूलकं भाषणं च अभिज्ञराजनीतिविज्ञानस्य परिचायकम् एवेति प्रतीयते। सप्तदशसर्गे औचित्येन राजनीतौ प्रवर्तमानस्य रामस्य परिचयः उपलभ्यते। प्रसङ्गेन अनेन रामस्य उन्नतराज्यप्रशासनपरिचयस्य उपलब्धिरपि पञ्चदशसर्गे वर्णिता अस्ति।

लङ्काधिपतिरावणस्य सभाभवने सभासदाम् उपस्थितिः आलोचनं तथा रणनीतिकौशलमपि सर्वमेव राजनीतिविषयकमेवेति। अष्टादशसर्गे लङ्काकायुद्धं वर्णितम्। तत्रैव अखण्डवीरता राजनैतिकव्यवहारकुशलता च वर्णिता अस्ति। तत्रैव च सर्गे आपदां प्रतीकारस्य च प्रसङ्गः उत्थापितः। एकोनविंशसर्गे रावणबधानन्तरं रामकर्तृक-सुग्रीवस्य राज्याभिषेकः वर्णितः। तदनन्तरं विंशतितमे सर्गे श्रीरामचन्द्रस्य अयोध्या-प्रत्यावर्तनं तस्य राज्याभिषेकश्चेति महाकाव्यस्य समाप्ति समुद्घोषयति। एवं विंशतिसर्गात्मकस्य जानकीहरणमहाकाव्यस्य संक्षेपतः राजनैतिकशास्त्रानुसारतः राजनैतिकतत्त्वसमीक्षणे अस्माकं प्रयत्नः प्रद्रशितः।[1]

### जानकीजीवनम्-

एकविंशतिसर्गात्मकं जानकीजीवनं नाम महाकाव्यं विरचितं कविना अभिराज-राजेन्द्रमिश्रेण। महाकाव्येऽस्मिन् राजनैतिकोपादानानुसन्धानमस्माकमभिप्रेतम्। राज्यशासन-तन्त्रविषयकमालोचनमत्र मुख्योद्देश्यतया वर्तते। राज्यभूमिः प्रजासमूहः राज्यप्रशासनकर्ता च परस्परं सम्बन्धविशेषेण सम्बद्धा भवन्ति। नियन्तुः शासकस्य अभावात् कस्मिन्नपि भू-खण्डे वसतां जनानां भोगः न सम्भवति। परस्परसंघर्षेण बलवता दुर्वलस्य समुत्पीडनं भवत्येव। अतः समुत्पीडिताः जनाः वास्तुच्युताः सन्तः सपशुद्रव्यसञ्चयमपि बलवत् पीडकहस्ते निक्षिप्य कदाचित् प्राणानोऽपि परित्यज्यन्ति कदाचिच्च जीवन्तोऽपि इतस्ततः भयात् परिभ्रमन्तः क्लेशसन्ततिमनुभवन्ति। अतः हेतोः विशिष्टभू- खण्डवर्तिनां सर्वेषां जनानां रक्षणविधानाय कस्यचित् अस्य भू-खण्डस्य प्रजाजनस्य च नेतृरूपेण पालकः आवश्यको भवति। अतः प्रजानां कल्यानहेतोः निर्दिष्टभू-खण्डस्य भूपालस्य च सुतरामेव आवश्यकतास्ति। अत्रैव राज्यशासकस्य राज्ञः समुत्पत्तिः उपलभ्यते। राजा च राष्ट्रपालकः दण्डसहायेन शिष्टप्रतिपालनं दुष्टदमनं च विदधाति।[2]

---

1. तत्रैव 6, 15, 17,18, 19, 20/53-55।
2. मनुसंहिता, 7/1-3, 13-15।

जानकीजीवनमहाकाव्ये प्रथमसर्गे विदेहराज्यस्य राजधानी मिथिलेति नाम्ना प्रख्याता आविर्भवति। तत्रविदेहाधिपतिः निमिनन्दनः सीरध्वजः[1] (राजर्षिजनकः) समागतां दैवीम् आपदं प्रतिकर्तुम् उद्वेगाकुलः समुपलभ्यते। दुःखसहस्राणां भुञ्जानानां प्रजानां जीवनयन्त्रणाम् असहमानः शोकदीर्णहृदयः राजर्षिजनकः प्रधानामात्येन सह मन्त्रणापूर्वकं गौतमपुत्रस्य गुरुशतानन्दस्य तपोवनं गतः। गुरोः शतानन्दस्य उपदेशेन आपत्प्रतीकाराय यज्ञमियेष विदेहराजः सीरध्वजः। यज्ञप्रसङ्गेन हलकर्षणमुखेन सीतायाः उपलम्भः। अतः विदेहराज्यं तस्य राजधानी मिथिला मिथलाराज्यस्य प्रजाजनाः विदेहराजः राजर्षिजनकः प्रधानामात्यः राजपुरोहितः गौतमपुत्रः गुरुशतानन्दः इत्येति विषयाः परस्परं राजनैतिकेन सम्पर्केण राज्यशासनसूत्रेण च प्रजारक्षणविधानसम्बन्धेन च समुपस्थापिता। चतुर्थसर्गे कोशलराज्यस्य राजधानी अयोध्येति विश्रुता लोके इति समुपवर्णिता। तत्र कोशलराजः अजन्दनदशरथः तस्य प्रधानामात्यः सुमन्त्रश्च निरन्तरं राज्यस्य प्रजानां च मङ्गलार्थिनौ। एताभ्यां सह गुरुमहर्षिवशिष्ठः अपि राज्यमङ्गलव्रत नित्यदीक्षितो दृश्यते। अत्र राजामात्यपुरोहितरूपसम्बन्ध-विशिष्टाराजनैतिकसम्बन्धस्य बलवती चित्ररेखा अस्माकं दर्शनमथमवतरति। सप्तमसर्गे मिथिलायां स्वयम्बरमहोत्सवे रामकर्तृकहरधनुभङ्गः क्षत्रियराजपुत्रस्य धनुर्विद्यापाटवं सूचयति। पुनरपिनवमसर्गे अयोध्यापुर्याः वैभवातिशयपरिचयः वर्णितो दृश्यते। दशमसर्गे राज्ञः दशरथस्य रामचन्द्रमधिकृत्य राज्याभिषेकचिन्ता समुदिता।[2] दशमे च सर्गे राज्याभिषेके अन्तरायः समुद्गतः। फलतः ससीतालक्ष्मणरामचन्द्रस्य वनवासयात्रा परिलक्ष्यते। एकादशे च सर्गे जानकीहरणं, द्वादशे च अशोकवने सीतायाः अवस्थानम्। त्रयोदशे सर्गे सीतानुसन्धाने रामस्य ऋष्यमूकपर्वते गमनं, सुग्रीवेण सह मैत्रीस्थापनं ततः वालिबधः ततः सीतान्वेषणे सुग्रीवकर्तृकवानरसैन्यसम्प्रेषणम्, हनुमता च अशोकवाटिकायां सीतादर्शनम् इत्येवं वृत्तान्तजातं समुपलभ्यते। चतुर्दशसर्गे वानरसैन्यैः सह रामस्य लङ्काप्रवेशः ततश्च लङ्कायुद्धं रावणविनाशश्च संभृत्यः। ततश्च पञ्चदशसर्गे रावणबधादन्तरं आर्यधर्मस्य पुनः प्रतिष्ठा, विभीषणस्य च राज्याभिषेकश्च सम्पादितः श्रीरामचन्द्रेण। राज्याभिषेकसमकालञ्च विभीषणः श्रीरामचन्द्रस्य सचिवरूपेण नियुक्तः अभूत् इत्यपि वार्ता एकविंशतितमे सर्गे उपलभ्यते। पञ्चदशसर्गे एव सीतायाः अग्निपरीक्षा दृश्यते। षोडशसर्गे धर्मानुसारतः विभीषणं प्रति लङ्काशासनस्य उपदेशः श्रीरामचन्द्रेण। ततः श्रीरामचन्द्रस्य सीतया लक्ष्मणेन च सह अयोध्यायां प्रत्यावर्तनम्। ततश्च राज्याभिषेकः रामस्य अत्रैव सर्गे वर्णितः दृश्यते। राजनैतिकदृष्ट्या प्रथमसर्गे चतुर्थसर्गे नवमसर्गे अष्टादशसर्गे एकोनविंशतितमे सर्गे च कोशलाधिपतेः दशरथस्य शासनतन्त्रस्य

---

1. जानकीजीवनम्, 4/41
2. तत्रैव, 10/10-11।

शिष्टपरिचयः उपलभ्यते। राज्ञः दशथस्य आसन् अष्टसङ्ख्यका मन्त्रिणः मन्त्रणाकार्येषु सातिशयं निपुणाः। पुरोहितानां मध्ये महर्षिगुरुवशिष्ठः आसीत् प्रधानतमः। सुमन्त्रः आसीत् राज्ञः दशरथस्य प्रधानमन्त्री, सर्वविधराजकार्येषु नितरां निष्णातः। प्रजापालनं राज्यस्य अन्तर्वहिसुरक्षाव्यवस्थासम्पादनं च उक्तानाम् अमात्यानां गुरुवशिष्ठप्रमुखानां च मन्त्रानुसारतः सुसिद्धं भवतिस्म। दैवी मानुषी च आपत्प्रतीकारः अमात्यानां ऋत्विजानां च साहाय्येन अपाकृतं समुपलभ्यते। अतः नृपतेः दशरथस्य आदर्शराज्यशासनपद्धतिः[1] प्रजानां हिताय सुखाय च निरन्तरं जागरूका आसीत् इति प्रतीयते। विदेहराजस्य सीरध्वजस्य राज्यमपि प्रजानां शान्तिसुखसम्पत्तये एव कल्पते स्म। सर्वापदां प्रतीकारे प्रधानामात्यस्य अन्येषां च धी-सचिवानां कर्मसचीवानां तथा प्रधानपुरोहितस्य गौतमपुत्रस्य गुरुशतानन्दस्य साहाय्यं सातिशयं हितकरम् अभवत् इत्युपलभ्यते। राजर्षिजनकस्य रामसीतयोः विवाहबन्धनेन राज्ञा दशरथेन सह सम्बन्धस्थापनं राजनैतिकप्रज्ञायाः एव परिचयं सूचयति। प्रजानाम् आपत्प्रतीकारे समुत्कण्ठा उपयुक्तोद्यमश्च लोकतन्त्रस्य प्रतिनिधिरूपेण विदेहाधिपतेः न केवलं प्रशासनपटुत्वम् अपि तु प्रजाकल्याणव्रतित्वमपि विज्ञापयति।[2] अतः राजर्षिजनकस्य राजचरित्रमहिमा समुज्ज्वलेति प्रतिभाति। श्रीरामचन्द्रस्यापि राज्यशासनकौशलः प्रकर्षस्य चरमकोटिमधिरोहति। तस्य सुशासनफलं प्रजानां शान्तिसुखदायकमित्येवं चित्रं कविना आलिखितं प्रतीयते जानकीजीवनमहाकाव्यस्य विंशतितमे सर्गे। तत्रैव सर्गे अश्वमेध-यज्ञानुष्ठानप्रसङ्गात् श्रीरामस्य विजिगीषा स्पष्टतः प्रतिभाति। अनुष्ठानेन अनेनय ज्ञफलरूपेण यज्ञफलभोक्ता यजमानः श्रीरामचन्द्रः कुलाधिराजपदे राजचक्रवर्तिपदे वा अभिषिक्तोऽभूत्। अश्वमेधयागे आमन्त्रिताः अभूत् भारतवर्षस्य अन्तर्वर्तिनस्तथा वहिर्वर्तिनश्च राजानः। अयमपि शिष्टाचारः राजनैतिकप्रज्ञापरिचायकः प्रतिभाति। अश्वमेधयागद्वारेण स्वाधीननृपतीणामपि अधीनतापाशेन सामन्तिकीकरणं तेभ्यश्च धनरत्नादिबहुमूल्यद्रव्याणाम् आहरणं राज्ञः श्रीरामचन्द्रस्य स्वराजपदमर्यादावि- बृद्धिकरं कोशसञ्चयोन्नयनसम्पादकं च भवतः तथैव प्रजानां हिताय आहृतानां धनानां विनियोगः प्राचीनभारतीयार्यराजनैतिकसंस्कृतेः महिमानमेव द्योतयति। एकविंशतितमे सर्गे पुनरपि अयोध्यावर्णनप्रसङ्गेन कोशलराज्यस्य सुशासनस्य तत्फलतस्य प्रजानां सुसमृद्धेः वर्णनं समुपलभ्यते।[3] तत्रैव कोशलाधिपतेः दशरथस्य रामचन्द्रस्य वा अष्टसङ्ख्यकानाम् अमात्यानां वर्णनं समुपलभ्यते। अत्रैव च सर्गे ऋत्विजानामपि अष्टसङ्ख्यकानां समुल्लेखः दृश्यते। अयमपि रामराज्यकालीनराजनैतिकव्यवस्थापरिचायक एव। अष्टादशसर्गे सीताविषयकजनापवादप्रसङ्गेन लोकतन्त्राधिपतेः प्रजानुरञ्जकस्य

1. तत्रैव, 10, 15, 21, 18, 20/1-5, 21/154-160,163,166।
2. जानकीजीवनम्, प्रथमसर्गः।
3. जानकीजीवनम्, 21/7-40, अयोध्यावर्णनम्। 21/149, कोशलजनपदवर्णम्।

श्रीरामचन्द्रस्य जनमतं प्रति सम्मानपुरस्कृतम् आस्थाप्रदर्शनं गणतान्त्रिकमूल्यवोधस्य परिचायकमिति प्रतीयते। रामराज्यस्य महिमा लोकतन्त्ररूपेण कियान् आसीत् तस्योपलब्धि एक विंशतितमसर्गस्य अन्तभागे गुरुवशिष्ठेन अभिभाषिता।

Yoga balances abnormal secretions of insulin in blood. It lowers the high level, and increases if it is low. The level of **Fasting Blood Sugar** was found to decrease by 10-5mg/100ml after yoga practice of three months, in an experiment by Dr. K.N. Udupa. All these subjects had very high level of fasting sugar originally, above the normal range. In another experiment, half of the subjects showed decreased level of fasting sugar, while some people showed increase in it.

The **cholesterol** is also balanced by yoga practices. If originally high, the cholesterol level gets lowered down, but increases if it is initially low. Cholesterol is a compound, associated with fat, but chemically different from it. This compound is found in all body tissues and its normal range is 180 to 200 mg %. After three months of Yoga practices, including sarvangasana, matsyasana, and halasana, the subjects showed remarkable decrease in cholestrol level from 196.9 to 104.5% mg.

## Breath Rate

The breath rate is normally 16 breaths per minute in resting position. The practice of routine of Hatha yoga for six months lowered the breath rate from 16.8 breaths to 13.4, in an experiment, conducted by Dr. Udupa. The shirshasana and mayurasana increased it. The practice of Surya-namaskar for three months increased breath rate of some people, but it remeined static for some subjects. The lowest breath rate was recorded in shavasana, even below the normal range. In ardhamatsyendrasana and vipreetakarani the trained group showed 18-16 breaths per minute, whereas it increased to 30-32 in the untrained group. Even the respiratory amplitude and breath holding time of yoga group was more than that of untrained group.

## Endocrine responses

The practice of yoga stimulates and tones up the endocrine glands and nervous system. Some of Asanas increase local blood circulation in the region of endocrine glands and nerve plexuses. The sarvangasana increases blood circulation in the regions of thyroid and vishuddha chakra. There is contraction of lunbo-sacral musculature and increased blood flow

in the plexuses of manipuara, in bhungasana. In mayurasana, pressure on elbows increases blood flow in navel region. Certain types of Pranayamas are also useful to stimulate and tone up endocirne glands and nervous system.

The pituitary, thyroid, pancreas and adrenal glands play an important role in maintaining sound health. Their under or over activity results in several diseases. The yoga practice balances their secretions and thus promotes health. The pair of adrenal glands, above each kidney, consists of two developmentally and functionally different glands, named adrenal medulla and adrenal cortex. The secretions of adrenal medulla tend to increase blood pressure, stimulate nervous system, increase heat and elevate the level of blood sugar. The adrenal cortex produces a variety of hormones, chemically classified as steroids. They elevate blood sugar, level of resistance to various stresses e.g. bleeding, high altitude, temperature extremes, infections and prevent allergic responses by reducing the secretion of histamine.

Thus we see how the yoga practices influence the body and promote man's helath. As is clear from the above account, some of them lower breath rate, blood pressure, and heart beat, while some other practices increase them. So one should carefully choose the right type of yoga asansas and pranayamas, as per the requirement of body, and in proper supervison of an experienced and trained yoga teacher. Indiscriminately performed yoga can even be harmful and can generate diseases.[1]

## Meditation

Recently discussed benefits are also derived from meditation. In an experiment over 12 subjects, the EMG of both the quadriceps of legs was recorded ZERO during most of meditative state. This shows relaxation in the muscles. But, surprisingly, the subjects were alert and had the capacity to respond, if required. However, there was no interaction with the environment in the state of deep meditation.

The blood flow increased during meditation, as compared with premeditative period. In shavasana, the finger temperatures increased by one and half/3c. One can feel the sensation of flow of the blood in the body. The finger pulse volume rises during meditation and it returns to its original level afer meditation. It is very interesting to note that there was

---

1. देखा देखी साधै योग, छीजै काया बाढै रोग। योगपरम्परातः

little decrease in blood flow in those subjects, who did not meditate, but relaxed with closed eyes, while sitting in the chair.

The blood pressure rises in meditation, if it is originally low. But if one is suffering from high B.P., then it was seen going down in meditation. Some B.P. patients stopped the regular practice of meditation after four weeks, and their B.P. returned to initial hypertensive levels. The heart beat was seen decreased by 5 beats per minute during meditation, but it returned to average value of pre-meditative period after session of meditation. Similarly, the rate and amplitude of respiration was found to decrease in mediation, and returned to premeditative period after meditation.

**Brain Activity: EEG**

The practice of meditation influences the brain activity as shown in the EEG test. The EEG records Alpha (which is associated with restful non-problem solving mental state with closed eyes). The Theta waves appear only in transition between waking state and sleeping state. The Delta waves are associated with deep sleep and the beta waves with a person's active attention to the outside world. All these types of waves show positive records/changes in EEG by meditation, With practice, a person goes into deep meditation, soon after he starts it. In deep samadhi, he does not respond to external stimuli like strong light, loud sound, hot touch, and the EEG pattern also does not change. The Yoga-nidra (Yogic sleep) is also very beneficial and responds positively to EEG. The Person remains alert but relaxed, and Delta waves appear on EEG. In a session at the Menninger Foundation, Swami Ram produced delta waves during a 25 minutes period of YOGA NIDRA. Throughout this period, the remained conscious of surroundings and happenings in the experimental room, and recalled all sounds, statements made in the room after he got up. Swami Ram could do this by telling his mind not to respond to any thing, but to record everything and to remain in a state of deep tranquility. Thus a Yogi, expert in meditation can show mixture of state of waking with sleep state, along with environmental awarencess. How this sleep state, along with environmental awareness. How this phenomenon takes place is still to be explored by scientists.

**Mantrajapa:**

Repetition of sacred mantra also tranquilises the mind, decreases excitement and normalizes blood pressure. In fact, Mantra therapy is closely

associated with the process of auto suggestion, mentioned in psychology. In auto suggestion, a patient is given constant suggstions, while in Mantra therapy, constant repetition of mantra or letters penetrates the conscious mind and the sound waves of mantra enter the subconscious mind, thus helping the sadhaka to reach a state of tranquillity by removing his mental tensions, cultivating his inner latent will-power to resist against diseases and solve his problems.

This state of tranquillity achieved by mantra japa can be equated with the state of meditation. The mantra therapy is also accedpted by ayurveda as a means to cure diseases[1]. We know that there are people, who can treat various diseases e.g. the poisons of snake bite, dog bite or stings of scorpio by chanting specific mantras.

Thus, we see the practice of Shatkarmas, Asanas, Pranayama, Meditation, mantra-japa and Yoganidra have positive effects on blood circulation, blood composition, breath rate, brain waves, heart rate and functions of endocrine glands. All this results in sound body and peaceful mind and thus holistic_health is promoted by Yoga. It removes the abnowmalities in the body. So a careful selection of suitable Asanas, Pranyam and Shatkarma should be made under the guidance of an expert Yoga teacher. Such a teacher knows the dos and don'ts, which is very mportant aspect of Yoga, because the negligence of the rules of yogic practices can result in very dangerous diseases. An experienced and expert teacher learns them from his GURU by tradition, but the yoga books do not mention them. If practised properly, yoga puts an end to all miseries and confers healthy body and peaceful mind, as claimed in Shrimad-bhagavadgita[2].

## Crime Prevention:

The mind-set of yoga sadhakas changes as they advance in the path of yoga. The practice of Yamas, Niyamas, and Pratyahar increases one's ability to control one's mind and senses. Human beings are naturally prone to anger, greed, corruption, & sensual-pleasures. Man in an ease-loving creature and wants all excellent thing and positions without putting hard labour. This tendency of work-shirking and disire to achieve

---

1. तयोः साधनानि मन्त्रौषधिमणिमंगलबल्युपहारहोमनियमव्रतप्रायश्चित्तोपवासस्वस्त्ययन-प्रणिपातगमनादीनि- चरकसंहिता, निदानस्थान 7.18
2. तं विद्याद् दुःखसंयोगवियोगं योगसंज्ञितम्।- श्रीमद्भगवद्गीता. 6.23

excellence easily leads to corruption, bribery, theft, murder, road-rage, rape etc. The practice of Ahimsa, Satya, and Asteya, train and condition the mind by transforming the negative thoughts into positive ones e.g. anger is transformed into forgiveness, greed in daan etc. This will surely lower the graph of social and economic crimes. The Yoga practitioner will nver grab other's belongings. A sadhaka of Brahmcharya will never indulge in sexual crimes. A practitioner of Aparigrha, and santosh will never accumulate wealth or other things beyond his needs/requirements. He will not shun hard word, as he is accustomed to Asana and Tapaha. The practice of Dhyana gives tolerance and mental power to understand others' point of view. Most of the quarrels and crimes are results of misunderstanding among people.

**Conclusion:**

Such a trained mind and body of people is the best development of Human Resources of any country. So the Yoga training shoud be compulsorily included in Education System at the school, college and university levels. It will help impart value-added education along with physical and mental health irrespective of caste, creed, or religion. As a result, it will lower the graph of social crimes and establish swarajya of Mahatma Gandhi.

✦✦✦

संस्कृत-विमर्शः 2020 ( अङ्कः 18 ) ISSN : 0975-1769

# गृह्यसूत्रेषु पञ्चमहायज्ञविमर्शः

## ( वैज्ञानिकदृष्ट्यालोचनमेकम् )

**-रमाशङ्करमिश्रः**
शोधच्छात्रः, वेदविभागः
श्री ला.ब.शा.राष्ट्रियसंस्कृतविश्वविद्यालयः, नवदेहली

**[ अस्मिन् लेखे पञ्चमहायज्ञानां वैज्ञानिकदृष्ट्या विचारः कृतः अस्ति। तत्र यज्ञस्य अर्थः, यज्ञस्य वैशिष्ट्यम्, तद्भेदांश्च उपवर्णिताः सन्ति। ]**

योजनार्थकस्य यज्धातोर्निष्पन्नस्य यज्ञशब्दस्यार्थन्तु आत्मना परमात्मनर्मेलनमिति (Communions Between Self with the Supreme Soul)। तर्हि एतेन एतत्प्रमीयते यन्मोक्षोसाधनोपायं हि यज्ञकर्म। वस्तुगत्या यज्ञकर्मो हि संकीर्णस्वार्थपरित्यागद्वारेण आत्मनः सर्वेषाञ्च कल्याणार्थं स्वतस्फूर्तनिवेदनद्वारेण च आत्मोपलब्धेः मोक्षसहायकं वा। खल्विदं प्रचोदयति धर्माचरणाय यज्ञकर्म।

**"यज्ञो वै श्रेष्ठतमं कर्म"**[1]। नित्यनैमित्तिककाम्यभेदेनेदं यज्ञकर्म तु त्रिधा विभक्तम्। गार्हस्थाश्रम एव इतराणां ब्रह्मचर्याद्याश्रमाणां पोषकः। यथा प्राणाख्यवायोराश्रयेण जीविताः भवन्ति सर्वे प्राणिनः तद्वद्गृहमाश्रित्य हि सर्वं आश्रमाः वर्तन्ते इति मनुमतम्-

> **यथा वायुं समाश्रित्य वर्तन्ते सर्वजन्तवः।**
> **तथा गृहस्थमाश्रित्य वर्तन्ते सर्व आश्रमाः॥**[2]

अध्यापनाध्यानमाध्यमेन ज्ञानविस्तरेण अन्नादिभोजनद्वारेण च इतराणामश्रमत्रयणां जैविकाङ्क्षापरिपूरणलयम् एव ज्येष्ठाश्रमोऽयं गार्ह्यस्थाश्रमः। अस्मिन् गार्ह्यस्थाश्रमे एव उद्वहनादनन्तरं वैवाहिकेऽग्नौ यथाविधि गृह्यकर्म, यत् खलु नित्यकर्मतयाख्यातम्, एव आचरणीयं येन याजको भवति ऋद्धः मोक्षमार्गानुसारी च। यानि खलु मोक्षफलप्रसिविनि गार्हपत्यग्नौ सम्पादयितव्यानि नित्यकर्म्माणि (Protocol) एवोपदिष्टानि शास्त्रेषु तेषु अन्यतममिदं महायज्ञञ्चकम्। जन्मन एव पञ्चकर्मास्माकम्

---

1. शतपथब्राह्मणम्, 102 पृष्ठम्।
2. मनुस्मृति. 1/40

आणृण्यम् (Fivefold Debts) परिलक्ष्यते प्रकृतिपुरुषादिभ्यः ततः तेभ्यः सहसम्पर्कणात्मनिवेदनार्थमेव पञ्चमहायज्ञं (Five old sacrifice) नित्यमाचरणीय-मस्माभिः।

ततः सांसारिकाः वयं प्रत्यहं पाकाश्रयेण शौचाश्रयेण वा तनोः परिपोषणं कुर्म्मः। ततः महायज्ञपञ्चकानामाचरणद्वारेणैव भूतहिंसाजनितपापभाजः ततोः आपतति ब्रह्मयोग्यता। शतपथब्राह्मणे एव पञ्चमहायज्ञानां नामानि तथा स्वरूपाणि एव स्पष्टितानि। कानि कानि च तानि नामानि इति जिज्ञासायाः निसने तत्रैव आम्नातम्-

"पञ्चैव महायज्ञाः तान्येव महासत्राणि भूतयज्ञो मनुष्ययज्ञः पितृयज्ञो देवयज्ञो ब्रह्मयज्ञो इति"। धर्मशास्त्रकारेण मनुना अहुत्याद्यभिधानैः अभिहितानि पञ्चमहासत्राणि-

**"अहुतञ्च हुतञ्चैव तथा प्रहुतमेव च।**
**ब्राह्मं हुतं प्राशितञ्च पञ्चयज्ञान् प्रचक्षते।"**[1]

पञ्चमहायज्ञानां स्वरूपविषये च प्रोक्तं मनुना—

**"अध्यापनं ब्रह्मयज्ञः पितृयज्ञस्तु तर्पणम्।**
**होमो दैवो वलिर्भैतो नृयज्ञोऽतिथिपूजनम्॥"**[2]

अध्यापनशब्देनात्रध्ययनमपि गृह्यते। 'जपोऽहुत' इति वक्ष्यमाणत्वादतोऽध्या-पनामध्ययनञ्च ब्रह्मयज्ञः। 'अन्नाद्येनोदकेन वा' इति पितृतर्पणं वक्ष्यति स पितृयज्ञः। अग्नौ होमो वक्ष्यमाणो देवयज्ञः। भूतवलिर्भूतयज्ञः। अतिथिपूजनं मनुष्ययज्ञः।

ननु वैज्ञानिकरीत्या नित्यकर्मत्वेनोपदिष्टं मोक्षफलप्रदं महायज्ञपञ्चकं प्रतिपादयितुं चेष्टयामि। तत्र आदौ ब्रह्मयज्ञ इति। अध्यापनाध्ययनञ्च ब्रह्मयज्ञ इति पूर्वैरेव अस्माभिर्ज्ञातः।

**'स्वाध्यायोऽध्येतव्यः'**[3]

सन्ध्यावन्दनादिकं वेदशाखाध्यनपूर्वकं वैदिकमन्त्रोच्चारनन्तु स्वाध्याय इति पदेन बोध्यते। संक्षेपेण अध्ययनम्- इति पदेन तु विज्ञानधर्मदर्शनकला- इत्यादीनां सालोचनमुन्नयनमेव बोध्यते। (study and development of afts, science, philosophy, religion etc.) अध्ययनस्य मुख्यमुद्देश्यन्तु ज्ञानद्वारेणात्मोपलब्धिः (self-realization)। मनोवैज्ञानिकस्य मास्लोमहोदयस्य आकाङ्क्षायाः उर्द्धक्रमतत्वे (higher archival need) अत्मोपलब्धिः सर्वोच्चसोपानमारोहति, यस्याः भित्तिस्वरूपाः तु जैविकाकाङ्क्षा (biological need)

1. मनुस्मृतिः 1.108
2. मनुस्मृतिः 1.98. गौ.ध.सू. 1.1.1
3. शतपथब्रह्मणम्, 35 पृष्ठम्

आत्मोपलब्धिद्वोरण आत्मप्रतिष्ठाकाङ्क्षा

जैविकाकाङ्क्षा

अत आत्मनः देहमनसोर्मेलनस्वरूपं अहंकाारान्धकारम् अध्ययनमेव अपाकरोति, येन भवति आत्मोपलब्धिद्वोरण मोक्षलाभः ब्रह्मज्ञानः वा। सा विद्या एव विमुक्तिस्वरूपा।

| |
|---|
| परमात्मा (higher self) आत्मोपलब्धिः (attainment of self) |
| स्वाध्यायः, जीवात्मा (lower self) अहंकारः body-mind complex |
| वौद्धिकं परवर्तनम् (cognitive change) |

न केवलमेतद् अधुना तु चिकित्साशात्रे तनुमनसम्बन्धीनां गदानां निरामयार्थं (to cure psycho-somatic diseases) तथा जनमततत्वस्य (human psychology) उन्नतये yagyopathy इति विषयस्य चर्चाधिक्यां श्रुयते अस्माभिः। तत्रैव एतदालोचितं यत् वैदिकमन्त्राणां छन्दोवद्धच्चारणद्वारेण उद्भूताः पूतध्वनितरङ्गाः (harmonious sonic waves) यदा एण्डोक्राइन् इति ग्रन्थि (endocrine gland) प्रविश्य सुक्ष्मां शारीरिकशक्तिं जनयति ततः मानसिकं प्राक्षोभिकं विकाशञ्च (mantel & emotional development) साधयति अतः मोक्षप्राप्तौ स्वाध्यायजनिताः दैहिकी शुद्धिः मानसिकी शुद्धिञ्च भवन्ति द्वारस्वरूपाः।

द्वितीयन्तु तावत् देवयज्ञः- यज्ञादिकरणेन देवयज्ञः बौधायनेन विरचितम् तदीये धर्मसूत्रे-

**"अहरह स्वाहकुर्यादाकाष्ठात्तथैवत्तं देवयज्ञः समाप्नोति। इति।"**[1]

देवयज्ञने देवेभ्यः श्रद्धानिवेदनमेव (gratitude of god) प्रकटितम्। आस्तिकानाम् अस्माकं स्रष्टारः रक्षकाश्च। अतः नित्यम् अग्निहोत्रादिसत्रैः देवसन्तुष्टिः तथा आत्मनिवेदनद्वारात्मतुष्टि आवश्यिकी। स्त्रीपशुपुत्रादिन् अभिप्रेतान् भोगान् हि वि देवाः दास्यन्ति यज्ञैतोषिताः सन्तः। अतः अयन्तु स्वार्थरहितं विनिमयचक्रम् इति गीतं गीतायाम्-

**'देवान् भावयतानेन ते देवा भावयन्तः वः।**
**परस्परं भावयन्तः श्रेयः परमवाप्स्यथ॥'**[2]

याजकस्य स्वाभीष्टफलप्रदानां प्ररिपोषणञ्च

देवः (परस्परभावनम्) याजकः

यागैः स्वार्थरहितं स्वात्मनिवेदनम्

1. बौधायनधर्मसूत्रम् 1/1/7
2. श्रीमद् भगवद्गीतायाम्, 4.24

यजमानेनाग्नावहुतिं सम्यक् क्षित्वा रसहरणकारित्वादित्यस्य आदित्यं प्रापनोति स चाहुतिरस आदित्याद् वृष्टिरूपेण जायते। ततोऽस्मिन् तदुपभोगेन जायन्ते प्रजाः। इदन्तु वैज्ञानिक सत्यं यत् पार्थिवाः रस एव पुनः वर्षारूपेण धराधाम्नि पतिताः सन्तः शस्याद्युत्पत्तिद्वारेण पार्थिवतनोः परिपुष्टिं सधयति। अनेन जीविताः याजकाः पुनः आत्मनामानृण्यं देवेभ्यः यज्ञद्वारेण प्रदर्शयन्ति। देवोयज्ञोऽयं त्रिविधमुद्देश्यं साध यति–

1. प्रथमं तु तावत् (short term)– मानसिकं सत्त्वगुणरोपणम्। (cultivation of savtik mental qualities)

2. द्वितीयं तु तावत् (medium term)– चरित्रगठनम् (character building)

3. तृतीयं तु तावत् (long term)– देवोपलब्धिः। (god-realization)

यज्ञाग्निना एव भवति याजकस्य देहशुद्धिः (purification of body) चित्तशुद्धिश्च (purification of mind) यज्ञाग्नौ समर्पितानां हवनसम्पदां प्रज्वलनद्वारेण उद्भूतः धूमः यदा प्रश्वासरूपेण याजकस्य शरीरे प्रविशति तदा पञ्चभूतनिर्मितस्य शरीरस्य पुष्टिं वर्धयति, अपि च रुधिरशुद्धिद्वारेण तनोः प्रतिरोधकक्षमता योग्यत्वं च वर्धयति। अतः देहशुद्धिर्भवति।

✦✦✦

संस्कृत-विमर्शः 2020 ( अङ्कः 18 ) ISSN : 0975-1769

# व्याकरणोदाहरणकाव्येषु लट्लकारप्रयोगवैविध्यम्

-पण्ड्या योगेशः एन्.
शोधच्छात्रः, श्री सोमनाथसंस्कृतविश्वविद्यालयः,
वेरावलम्, गुजरातम्

**[ पाणिनीयसूत्राणि उदाहरणप्रदर्शनपूर्वकम् उपवर्णयितुं शास्त्रकाव्यानि प्रणिनिन्युः। अस्मिन् शोधलेखे व्याकरणोदाहरणकाव्येषु कृतानां लट्लकारप्रयोगाणां विवेचनं विहितम् अस्ति। ]**

**शोधसारः**

आचार्यक्षेमेन्द्राभिमतानुगुणं सारस्वतं वाङ्मयं चतुर्धा विभक्तमस्ति। तद्यथा– शास्त्रं, काव्यं, शास्त्रकाव्यं, काव्यशास्त्रञ्चेति। यस्मिन् काव्ये व्याकरणादिशास्त्राणां व्युत्पत्तिज्ञानमुपतिष्ठापयिषुभिः कविभिश्शास्त्रतत्त्वमभिनिवेश्यते तत्काव्यशास्त्रमिति व्यपदिश्यते। किन्तु कालान्तरे काव्यशास्त्रेति पदं साहित्यशास्त्रीयलाक्षणिकग्रन्थानां कृते बाहुल्येन व्यवहृतमभूत्। अतस्सन्देहदशामिमामपाकर्तुं कैश्चिद्विद्वद्भिरेतद्विधकाव्यानां कृते "उदाहरणकाव्यम्" इति पदव्यवहारः अकारि।

अस्यां परम्परायां बहुभिः व्याकृत्यलङ्कृतिशास्त्रप्रयोगपारदृश्वभिः कविभिः व्याकरणशास्त्रस्योदाहरणकाव्यान्युपनिबबन्धिरे। भट्टिकाव्यम्, रावणार्जुनीयम्, वासुदेवविजयम्, सुरूपराघवम्, सुगलार्थमाला इत्यादीनि सन्ति व्याकरणोदाहरणकाव्यानि। केरलीयविद्वांसः एतद्विधकाव्यप्रणयनें शीर्षण्यं स्थानं बिभ्रति। प्रस्तोतव्यविषयस्त्वयमस्ति शोधपत्रेऽस्मिन् यत् प्रायेण संस्कृतभाषायाः ऐदञ्युगीनो वाग्व्यवहारो लडादिदशलकाराणां सामान्यनिर्दिष्टसन्दर्भेष्वेव परिसीमितो वरीवर्ति। तेषु दशलकारेषु लट्लकारस्य "स्म, ह, शश्वत्, नु" इत्यादिपदानां साहचर्ये कालान्तरेऽपि प्रयोगाः प्रसिद्ध्यन्ति। परन्तु काव्योदाहरणानि विना तेषां प्रयोगाणां ज्ञानं दुर्घटम्। अष्टाध्याय्यां तृतीयाध्यायस्य द्वितीयतृतीयतुरीयपादेषु तत्र तत्र लकारार्थाः विभिन्नाः प्रोक्ताः। अतोऽनुसन्धाता शोधपत्रेऽस्मिन् व्याकरणोदाहरणकाव्यान्यालम्ब्य लटः प्रयोगवैविध्यं प्रतुष्टुषति।

व्याकरणादिशास्त्राज्ञानस्य बुबोधयिषाऽपि काव्यप्रणयने बीजम् इत्यत्र नास्ति विप्रतिपत्त्युपत्त्यवसरः। यत्काव्यं शास्त्रज्ञानं जञ्जनीति तत्काव्यशास्त्रमिति भोजराजो बभाण। औचित्यसम्प्रदायप्रवर्तकः क्षेमेन्द्राचार्यः स्वीये सुवृत्ततिलके सकलं सारस्वत–

वाङ्मयं चतुर्विधं वक्ति।

**शास्त्रं काव्यं शास्त्रकाव्यं काव्यशास्त्रं च भेदतः।**
**चतुष्प्रकारः प्रसरः सतां सारस्वतो मतः॥**[1]

एतेषु किं नाम काव्यशास्त्रमिति समाधीयते–**"भट्टिभौमककाव्यादि काव्यशास्त्रं प्रचक्षते"**।

यत्र व्याकरणादिशास्त्राणां व्युत्पत्तिज्ञानम् उपतिष्ठापयिषुभिः कविभिः शास्त्रतत्त्वम् अभिनिवेश्यते तत्काव्यशास्त्रमिति व्यपदिश्यते।

**"कष्टं व्याकरणम्", "प्रायेण वैयाकरणाः पिशाचाः प्रयोगमन्त्रेण निवारणीयाः"** इत्यादीन् जगति अपभाणकान् निराचिकीर्षुभिः विद्वद्भिः काव्यमुखेन कष्टमपीदं शब्दशास्त्रं हृदयङ्गमतया प्राबोधि। कवयः तत्तच्छास्त्राणां सारल्येन तत्त्वबुबोधयिषायै शास्त्रप्रधानानि काव्यानि प्राणैषुः। तत्र विशिष्य व्याकरणशास्त्रे अष्टाध्यायीमवलम्ब्य तत्तच्चरितमुपजीव्य बहुभिर्विद्वद्भिः काव्यशास्त्राणि प्राणीयन्त। परन्तु इदमत्र विचार्यं यत् गच्छतानेहसा काव्यशास्त्रमिति पदम् आलङ्कारिकशास्त्रीय-लक्षणग्रन्थबोधकं बभूव। अतः सन्देहशामिमाम् अपाकर्तुं कैश्चिद्विद्वद्भिः व्याकरणस्य उदाहरणप्रदर्शककाव्यानां कृते **"उदाहरणकाव्यम्"** इति पदप्रयोगो व्यधायि। प्रसिद्धकाव्यटीकाकृत् मल्लिनाथोऽपि **"रामकथामाश्रित्य पाणिनीयसूत्राणाम् उदाहरणकाव्यं चिकीर्षुः........."**इत्यादिरीत्याऽत्र वदन् भट्टिकाव्यस्य टीकारम्भे एतद्विधकाव्यप्रणयनाय उदाहरणकाव्यमिति पदं प्रायुङ्क्त। भगवान् पतञ्जलिर्महाभाष्ये **"महान् हि शब्दस्य प्रयोगविषयः"**[2] इत्यूचिवान्। एवञ्च प्रक्रियासंस्कृतं सकलं पदजातं विदन्तः लक्षणैकचक्षुष्काः महावैयाकरणाः अपि क्वैतत्प्रायुज्यत इति पृष्टाः खसूचित्वं भजन्ते स्म। काव्यनाटकादिषु अस्यां दशायां व्याकृतिसंस्कृतानाम् अशेषपदानां प्रयोगप्रदर्शनम् अतितराम् आवश्यकमभूत्।

तदर्थमेव व्याकृत्यलङ्कृतिशास्त्रप्रयोगपारदृश्वभिः कविभिः व्याकरणोदा-हरणकाव्यानि उपनिबबन्धिरे। भट्टिकाव्यम्, रावणार्जुनीयम्, वासुदेवविजयम्, सुगलार्थमाला, सुभद्राहरणम्, धातुकाव्यम्, सुरूपराघवम् इत्यादीनि विलसन्ति बहून्युदाहरणकाव्यानि। वस्तुतः परम्परेयं केरलेषु सविशेषं पुष्पिता, पल्लविता, फलिता च अबोभूयत। एतेषां काव्यानां रसाभिव्यञ्जनं न प्रमुखोद्देश्यम्, किन्तु व्याकरणव्युत्पत्त्यभिवृद्धिरेव। अत एव भट्टिकाव्यस्यान्ते इत्थन्तेनोदलेखि **"व्याख्या-गम्यमिदं काव्यम् उत्सवः सुधियामलम्। हता दुर्मेधसश्चास्मिन् विद्वत्प्रियतया**

---

1. क्षेमेन्द्रकृतं सुवृत्ततिलकम्।
2. व्याकरणमहाभाष्यम्। (भाष्यप्रदीपोद्योतभासितम्– प्रथमखण्डः, सं. भार्गवशास्त्री जोशी) पृ. 70

**मया।।"**[1] वस्तुतः इमानि काव्यानि व्याख्यागम्यानि भवन्ति। टीकामन्तरेण एतादृशकाव्यानां ज्ञानं व्युत्पत्त्याधायकं नैव भवति।

## लट्प्रयोगवैविध्यविषये ईषच्चिन्तनम्

आमर्यां गिरि साध्यक्रियाप्रधानानि क्रियापदानि लट्, लिट्, लृट् इत्येवं दशलकारेषु विभक्तानि। तत्र केचित्काललकाराः, तदितरलकाराश्चेति ते द्विविधाः सन्ति। लट्, लिट्, लुट्, लृट्, लङ्, लुङ् इत्येते काललकाराः षट्। इतरे च प्रवर्तनालकाराः। वरीवर्ति प्रसिद्धश्लोकः—

**वर्तमाने परोक्षे श्वोभाविन्यर्थे भविष्यति।**
**विध्यादौ प्रार्थनादौ च क्रमाज्ज्ञेया लडादयः।।**[2]

इति रीत्या लडादयो लकाराः वर्तमानादिष्वर्थेषु व्यधायिषत। इत्थमनया रीत्या लटः वर्तमानार्थे शक्तिरिति पर्यवस्यति। वर्तमानकालः लडर्थः—**"वर्तमाने लट्"** इति सूत्रबलात्। तत्र किं नाम वर्तमानत्वम्? इत्युक्ते भूषणसारे लक्षणद्वयम्— **प्रारब्धापरिसमाप्तिकत्वम्** इत्येकं लक्षणम्। **भूतभविष्यद्भिन्नत्वम्** इत्यपरं लक्षणम्। वर्तमानार्थकत्वं च लटः वाचकत्वमेवेति भूषणसारे कौण्डभट्टः। किन्तु लडादीनां वर्तमानादयः येऽर्थाः, ते सामान्यार्थाः। एषां लकाराणाम् उत्सर्गापवादरीत्या इतरार्थानां सुप्रतिपत्तये लकारार्थप्रक्रिया अभ्यसनीयैव। प्रायेण बहूनामिदं भ्रान्तिविलसितं भवति यत् लट्प्रयोगः केवलं वर्तमानार्थे भवति इति। किन्तु लटः स्मादिपदसन्निधाने कालान्तरेऽपि प्रयोगाः बोभुवति। सोऽयं विषयः लकारार्थप्रकरणे कौमुद्यादौ सोदाहरणं न्यरूपि। विशिष्य लटः वर्तमानमतिरिच्य भूते भविष्यति च विधानसूचकानि उदाहरणानि काव्येष्वपि विरलतया प्राप्यन्ते। तदर्थं व्याकरणोदाहरणकाव्यानि अवश्यं पठ्यानि। कदाचित्काव्यपठनकाले लटः वर्तमाने प्रसक्तेः सत्वात् किमर्थं लटः कालान्तरे प्रसक्तिः? इति बहुधा पर्यग्लासिषम्। किन्तु यथायथाऽहं लकारार्थप्रकरणं पर्यैक्षिषि तथा तथा तद्विषये प्रयोगभूयिष्ठानि स्थलानि उदाहरणकाव्येभ्यः लटः प्रयोगवैविध्ये व्यज्ञासिषम्। तदर्थं लकारार्थप्रक्रियासूत्राणि उदाहरणकाव्यमुखेन आमूलचूलं ज्ञेयानि इति समकल्पिषि।

---

1. भट्टिकाव्यम्—"चन्द्रकला— विद्योतिनी" संस्कृतहिन्दीव्याख्यासमन्वितम् (12-22 सर्गाः) व्या. पं. शेषराजशर्मा रेग्मी— चौखम्बा संस्कृत सीरीज ओफिस वाराणसी। (सर्वत्र शोधपत्रेऽस्मिन् भट्टिकाव्यस्य उद्धरणतया इदमेव संस्करणं प्रायुज्यत) पृ. 385
2. भट्टोजिदीक्षितप्रणीताः वैयाकरणसिद्धान्तकारिकाः, आनन्दाश्रमसंस्कृतग्रन्थावलिः, पुण्य-पत्तनम्। पृ.18

**लड्विधायकसूत्राणां काव्योदाहरणैः सह परिशीलनम्**

लकारार्थकप्रकरणे लडादिलकाराणां सूत्रसङ्ख्या सप्ततिरस्ति। तत्राऽद्यः लट्लकारः। स्म, नु, ननु, पुरा, यावत् इत्याद्यवयवसमभिव्याहारे लटः कालान्तरेपि प्रयोगः साधुरेव। एतदर्थं व्याकृत्यलङ्कृतिशास्त्राब्धिपारदृश्वभिः भट्टिप्रमुखैः कविभिः लकारार्थसूत्रोदाहरणपद्यानि सञ्जिग्रथिषुभिः व्याकरणोदाहरणकाव्यानि उपन्यबन्धिषत।

श्रीवासुदेवकविप्रणीतं वासुदेवविजयम्, भट्टिकविरचितं भट्टिकाव्यम्, ब्रह्मदत्त-नारायणकृतं सुभद्राहरणमहाकाव्यम् इत्येभ्यः उदाहरणकाव्येभ्यः लट्प्रयोगवैविध्य-सूचकानि पद्यानि मयाऽत्र शोधपत्रे प्रादर्शिषत।

### (1) लट् स्मे[1] (पा. सू. 3.2.118)

इति लकारार्थप्रकरणे आद्यं लड्विधायकसूत्रम्। स्मशब्दे[2] उपपदे भूतानद्यतनपरोक्षे लट्प्रत्ययो भवति। **"परोक्षे लिट्"** (पा. सू. 3.2.115) इति सूत्रेणात्र लिटः प्राप्तिर्भवति भूतानद्यतनपरोक्षे वक्तव्ये। परं पाणिनिः अ नेनसूत्रेण **"स्म"** इति भूतकालद्योतकाव्ययसमभिव्याहारे लटम् अन्वशिषत्। भट्टिप्रणीतभट्टिकाव्यस्य अष्टादशसर्गे सूत्रमिदम् उदाहृतम्।

> **अन्तः पुराणि पौलस्त्यं पौराश्च भृशदुःखिताः।**
> **संश्रुत्य स्माऽभिधावन्ति हतं रामेण संयुगे।।**[3] (18-37)

श्लोकस्ययायं भावो यम् समराङ्गणे पौलस्त्यं नाम रावणः रामेण व्यापादितम् इत्याकर्ण्य अन्तः पुरस्त्रियः नागरिकाश्च समेऽपि अतिशयव्यथिताः रावणम् अभ्यधावन्। पद्येऽस्मिन् "अभिधावन्तिस्म" इत्यत्र अभिपूर्वकात् "धावु गतिशुद्ध्योः" इति धातोः **"लट् स्मे"** इति भूते लट् विहितः।

### (2) अपरोक्षे च[4] (पा. सू. 3.2.119)

इदं सूत्रमपि अनद्यतनभूते वक्तव्ये **"स्म"** योगे लटं विदधाति। ब्रह्मदत्त-नारायणकृते सुभद्राहरणमहाकाव्ये सूत्रमिदमित्थमुदाहृतम्।

---

1. अष्टाध्यायीसूत्रपाठः (प्रकरणनिर्देशसमन्वितः) सम्पादिका–पुष्पादीक्षित–ज्ञानभारती पब्लिकेशन्स दिल्ली– भारत (सर्वत्र शोधपत्रेऽस्मिन् सूत्राणाम् उद्धरणतया इदमेव संस्करणं प्रायुज्यत)
2. काशिका–2 (तृतीयचतुर्थाध्यायौ) प्रधानसम्पादकः– आचार्यराधावल्लभत्रिपाठी– कुलपतिः– रा. सं. सं.
3. भट्टिकाव्यम्– पृ. 311
4. अष्टाध्यायीसूत्रपाठः– पृ. 29

**स्माऽङ्के नरीनृत्यत एष मातुः ननर्ति मूर्ध्नि स्म च कालियस्य।**
**स्म वल्लवीनां नरिनर्ति मध्ये चित्ते नरीनर्ति च योगभाजाम्।।**[1]

14–115

एषः खलु श्रीकृष्णः विचित्ररूपः। मातुः यशोदायाः अङ्के बालकृष्णः नरीनृत्यति स्म। कालियसर्पस्य मस्तके ननर्ति स्म। बालकृष्णः गोपीनां मध्ये भूत्वा ताभिस्सह पौनः पुन्येन नृत्यति स्म। तथैव योगीश्वराणां चित्ते श्रीकृष्णः नरीनर्ति।

**"स्म"** इत्यव्ययसन्निधाने **"नरीनृत्यति स्म"**, **"ननर्ति स्म"**, **"नरिनर्ति स्म"**, **"नरीनर्ति स्म"** इति स्थलचतुष्टये **"नृती गात्रविक्षेपे"** इति धातोः **"अपरोक्षे च"** इति सूत्रेण पाणिनिः अत्र लटम् अनुशशास।

### (3) विभाषा कथमि लिङ् च[2] (पा. सू. 3.2.143)

**"कथम्"** इति अव्यय उपपदे निन्दायां गम्यमानां कालत्रितयेऽपि विद्यमानाद्धातोः सूत्रस्थचपदेन लट्लकारः अनुशिष्यते। एतत्सूत्रं सुभद्राहरणे एकादशसर्गे उदाहारि–

**अपि श्लिष्यसि गोपींस्त्वं कुब्जां जातु स्पृशस्यपि।**
**स्त्रीष्वित्थमविशेषेण कथं नामासि चञ्चलः।।**[3] (14–39)

अर्जुनः द्वारिकाधिपतिना श्रीकृष्णेन साकं मिमिलिषमाणः द्वारकामुपेत्य निगदति यत् यदि श्रीकृष्णः प्राप्स्यते तर्हि अहं तं गाढम् आश्लेक्ष्यामि। यतो हि हे श्रीकृष्ण! अपि त्वं गोपीः स्पृशसि। तथा त्वं कदाचित् कुब्जामपि स्पृशसि। अहो! अन्याय्यमेतत्। स्त्रीषु इत्थं गम्यागम्यापरामर्शेन कथं नाम त्वं चञ्चलोऽसि। गर्ह्यमिदं तत्कृत्यम्। अत्र प्रकृतसूत्रेण कथंशब्दोपपदे निन्दायां सर्वलकारापवादः लट् अनुशिष्टः।

### (४) ननौ पृष्टप्रतिवचने[4] (पा.सू. 3.2.120)

अनद्यतने परोक्ष इति निवृत्तम्।[5] भूते लट् स्यात्। पृष्टस्य प्रश्नस्योत्तरे वक्तव्ये धातोः भूते लट्लकारः भवति, "ननु" इत्यवधारणसूचके अव्यय उपपदे सूत्रेणानेन लुङं प्रबाध्य भूतसामान्ये लट् अनुशिष्यते।

1. ब्रह्मदत्तनारायणविरचितं सुभद्राहरणमहाकाव्यम्– प्रो. एम्. श्रीधरमेनन् महोदयेन संशोध्य विमर्शनपूर्विकया भूमिकया सह सम्पादितम्। (सर्वत्र शोधपत्रेऽस्मिन् सुभद्राहरणस्य उद्धरणतया इदमेव संस्करणं प्रायुज्यत) पृ.272
2. अष्टाध्यायीसूत्रपाठः– पृ. 36
3. सुभद्राहरणम्– पृ. 259
4. अष्टाध्यायीसूत्रपाठः– पृ. 29
5. वै.सि.कौ.– श्रीधरमुखोल्लासिनी– हिन्दीव्याख्यासमन्विता– व्याख्याकारः– गोविन्दाचार्यः। पृ. 558 (शोधपत्रेऽस्मिन् सर्वत्र कौमुद्याः उद्धरणाङ्गत्वेन इदं संस्करणम् उपायुज्यत)

सूत्रमदः वासुदेवकविप्रणीते वासुदेवविजये चतुर्थसर्गे इत्थमुदाहृतम्–

**किमदा धनमर्थिने समस्मा इति पृष्टः स्वजनोऽमुनोन्मनीसन्।**
**सकलोऽपि ददामि नन्विति द्राङ्न ददामीति तु नो पुरा न्यगादीत्॥**[1]

(4-8)

जातस्य बालकृष्णस्य जातकर्म चिकीर्षन् पिता नन्दः स्वसेवकवर्गम् अप्राक्षीत्– किं त्वं सर्वस्मै अपि अर्थिने धनं दत्तवान्? इत्थम् अनेन नन्देन पृष्टः सकलोऽपि उत्कण्ठितचेताः स्वजनवर्गः पृष्टप्रतिवचनत्वेन **"ददामि ननु"** अर्थात् दत्तवानेव इति शीघ्रं प्रत्युत्तरितवान्। श्लोकेऽस्मिन् **"ननु"** इति शब्दोपपदे नन्देन पृष्टस्य प्रतिवचने वक्तव्ये प्रकृतसूत्रेण भूतसामान्ये लट्प्रयोगो दृश्यते।

### (5) पुरि लुङ् चास्मे[2] (पा. सू. 3.2.122)

पुराशब्दयोगे भूतानद्यतने विभाषा लुङ्, चाल्लट्, न तुस्मयोगे।[3]

सूत्रमिदम् अनद्यतनभूते विद्यमानधातोः विकल्पेन लुङ्लकारं चकारेण लट्लकारं च शास्ति, न तु स्मशब्दयोगे। लुङ्लटोरभावे अनद्यतनभूते परोक्षभूते च यथासंख्यं **"परोक्षे लिट्"** (पा. सू. 3.2.115) इति लिट् **"अनद्यतने लङ्"** (पा. सू. 3.2.111) इति लङ् च अनुशिष्यते। सूत्रमिदं सलिलमुदाजिहीर्षुः भट्टी रावणवधस्य अष्टादशे सर्गे कवयति–

**त्वं स्म वेत्थ महाराज यत्स्माह न विभीषणः।**
**पुरा त्यजसि यत्क्रुद्धो मां निराकृत्य संसदि।।**[4] (18-18)

रावणनिधनेन हृदये दृढं निखातेन अरुन्तुदेन शोकशल्येन भृशम् उद्विग्नमनाः विभीषणः रावणमुद्दिश्य विलपन् वदति हे महाराज! त्वदनुजः विभीषणोऽहं यद्वचनं प्रोक्तवान्, तत्त्वं न हितत्वेन विदितवान्। यस्मात् कारणात् कुपितः सन् **"सीतां प्रत्यर्पय"** इत्युपदेशवचने मयोक्ते सति सभायां हितोपदेष्टारं मां पादप्रहारेण तिरस्कृत्य पूर्वं त्यक्तवान् असि। मन्ये तस्यैव दुष्फलमिदं भवतानुबोभूयते। श्लोकेस्मिन् **"त्यजसि"** इत्यत्र **"त्यज-हानौ"** इति धातोः स्मशब्दवर्जिते पुराशब्दयोगे **"पुरि लुङ् चास्मे"** इति सूत्रेण अनद्यतनभूते लट्लकारः अन्वशासि।

---

1. वासुदेवकविविरचितं वासुदेवविजयम्– विजयपालशास्त्रिसम्पादितं रा. सं. सं. वेदव्यासपरिसरप्रकाशितम्– पृ. 73 (शोधपत्रेऽस्मिन् सर्वत्र वासुदेवविजयस्य उद्धरणाङ्गत्वेन इदं संस्करणम् उपायुज्यत)
2. अष्टाध्यायीसूत्रपाठः– पृ. 29
3. वै.सि.कौ.– पृ. 541
4. भट्टिकाव्यम्– पृ. 300

**( 6 ) यावत्पुरानिपातयोर्लट्[1] ( पा. सू. 3.3.4 )**

भविष्यति इत्येव।[2] यावत्पुराशब्दयोः निपातयोः उपपदयोः भविष्यति काले धातोः लट्प्रत्ययः भवति। इत्थं च यावत्पुरा इत्येतयोः निश्चयार्थद्योतकयोः अव्यययोर्योगे भविष्यति धातोः लट्लकारः विधीयते। लृटः लुटश्चापवादतया सूत्रेणाऽनेन लट्लकारः अनुशिष्यते। एतदुदाहरणं भट्टिकाव्ये इत्थं प्रादर्शि कविना–

**न गच्छामि पुरा लङ्काम् आयुर्यावद् दधाम्यहम्।**
**कदा भवति मे प्रीतिस्त्वां पश्यामि न चेदहम्।।**[3] (18–35)

रामेण निहतं पौलस्त्यमालोक्य विभीषणो विललाप हे महाराज! अहं भवदनुजः यावत्कालपर्यन्तं जीविष्यामि तावत्कालपर्यन्तं लङ्कां नैव यास्यामि। अहं विभीषणः पितृसमं ज्येष्ठभ्रातरं भवन्तं न पश्यामि यदि, तर्हि कदा मम प्रीतिः भविष्यति? अर्थात् नैव भविष्यति।

श्लोकेऽस्मिन् **"दधामि"** इत्यत्र **"डुधा धारणपोषणयोः"** इति धातोः यावत्पदयोगे **"यावत्पुरानिपातयोर्लट्"** इति सूत्रेण भविष्यति लडन्वशासि। **"पुरा न गच्छामि"** इत्यत्रापि गम्धातोः उक्तसूत्रेण लट्प्रयोगो विहितः।

**( ७ ) नन्वोर्विभाषा[4] ( पा. सू. 3.2.121 )**

नशब्दे नुशब्दे चोपपदे पृष्टप्रतिवचने विभाषा लट्प्रत्ययो भवति भूते।[5] एतदुदाहरणं भट्टिकाव्येऽष्टादशसर्गे इत्थं प्रादर्शि–

**अपृष्टो नु ब्रवीति त्वां मन्त्रे मातामहो हितम्।**
**न करोमीति पौलस्त्य! तदा मोहात्त्वमुक्तवान्।।**[6] (18–17)

एतस्यायं भावो यत् विचारकाले अननुयुक्तः अस्मन्मातामहो माल्यवान् भवन्तं पथ्यं नु ऊचिवान् यत्–हे रावण! त्वं सीतां रामाय प्रत्यर्पयेति। किन्तु हे पौलस्त्य! तदा त्वं मोहवशात् तथा चरामि इत्युक्तवान्। तस्यैव फलं साम्प्रतम् अनुभूतमिति भावः।

---

1. अष्टाध्यायीसूत्रपाठः– पृ. 32
2. काशिका–2
3. भट्टिकाव्यम्–310
4. अष्टाध्यायीसूत्रपाठः– पृ. 29
5. काशिका–2
6. भट्टिकाव्यम्– पृ. 300

श्लोकेऽस्मिन् **"नु ब्रवीति"** इत्यत्र नुशब्दोपपदे **"नन्वोर्विभाषा"** इत्यनेन पृष्टप्रतिवचने भूतार्थे लट्लकारः अनुशिष्टः। किञ्च **"न करोमि"** इत्यत्रापि उक्तसूत्रेण नशब्दोपपदे लड्विहितः।

**(८) विभाषाकदाकर्ह्योः[1] (पा. सू. 3.3.5)**

कदा, कर्हि इत्येतयोः उपपदयोः विभाषा भविष्यति काले धातोः लट्प्रत्ययो भवति।[2] एतदुदाहरणं सुभद्राहरणमहाकाव्ये व्यलेखि–

**कदाऽऽलोकामहे कृष्णं कर्हि वीक्षामहे बलम्।**
**इत्थं द्वाः स्थैर्नृपा रुद्धा वदन्त्यस्यां बहिःस्थिताः।।**[3] (11-31)

द्वारवतीं दिदृक्षुः अर्जुनः वदति यत् अहं यदा द्वारकाम् आयासिषं तदा केचन राजानः दौवारिकैः अवरुद्धाः सन्तः बहिः स्थिताः वदन्ति यत् कदा वयं श्रीकृष्णं दृक्ष्यामः? कर्हि च बलरामं दृक्ष्यामः? इति। अर्थात् तादृशी उत्कृष्टा पुरीयं विद्यते।

श्लोकेऽस्मिन् **"कदा"** इत्युपपदे **"आलोकामहे"** इत्यत्र, तथैव **"कर्हि"** इत्युपपदे **"वीक्षामहे"** इत्यत्र **"विभाषा कदाकर्ह्योः"** इत्यनेन भविष्यति लट्लकारः प्रयुक्तः।

**(९) किंवृत्ते लिप्सायाम्[4] (पा. सू. 3.3.6)**

भविष्यति लड् वा स्यात्।[5] लब्धुम् इच्छायां गम्यमानायां किंशब्दनिष्पन्नानां पदानां योगे भविष्यति लट् विकल्पेन अनुशिष्यते। एतदुदाहरणं सुभद्राहरणमहाकाव्ये–

**प्रयच्छत्यतिथिभ्योऽन्नम् अत्र को धनवानिति।**
**ददते योऽतिथिभ्योऽत्र स स्वर्गं गच्छतीति च।।**[6] (11-31)

श्रीकृष्णेन साकं मेलनायागतः अर्जुनः द्वारकामुपेत्य सर्वत्र द्रविणसम्पन्नतां पश्यति। अत्र कः धनवान् अतिथिभ्यः अन्नं दास्यति? यः अतिथिभ्यः अन्नं दास्यति सः स्वर्गं लप्स्यते इति वाक्यानि वदतः ब्राह्मणान् दयाद्रविणयुक्तमानसाः गृहस्थाः भोजयन्ति स्म। तादृशी द्रविणभूयिष्ठा द्वारका आसीदित्यभिप्रायः।

---

1. अष्टाध्यायीसूत्रपाठः– पृ. 32
2. काशिका–2
3. सुभद्राहरणम्– पृ. 255
4. अष्टाध्यायीसूत्रपाठः– पृ. 32
5. वै.सि.कौ.– पृ. 545
6. सुभद्राहरणम्– पृ. 255

श्लोकेऽस्मिन् **"को धनवान् प्रयच्छति"** इत्यत्र किंशब्दयोगे प्रपूर्वकात् **"डुदाञ् दाने"** इति धातोः **"किंवृत्ते लिप्सायाम्"** इत्यनेन भविष्यति लडनुशिष्टः।

**( 10 ) लिप्स्यमानसिद्धौ च[1] ( पा. सू. 3.3.7 )**

लिप्स्यमानेन्नादिना स्वर्गादेः सिद्धौ गम्यमानायां भविष्यति लड् वा स्यात्।[2] एतदुदाहरणं वासुदेवविजयस्य पञ्चमसर्गे–

**को दास्यते ददति ये शमयन्ति तेऽदः**
**कौलत्थमन्नमितरच्च वदत्सु वर्षैः।**
**भिक्षाद्वितीयमपि चेह तुरीयभिक्षां**
**द्राग्दारवो हि दमिनो न विशेरतेऽर्थे।।**[3] (5-6)

अत्र श्लोके **"ददति, अयन्ति"** इत्यत्र कौलत्थादिना सुखेप्सायाः गम्यमानत्वात् प्रकृतसूत्रेण भविष्यति लट् विहितः।

**( 11 ) लोडर्थलक्षणे च[4] ( पा. सू. 3.3.8 )**

लोडर्थः प्रैषादिर्लक्ष्यते येन तस्मिन्नर्थे वर्तमानाद्धातोः भविष्यति लड् वा स्यात्[5]। विधिनिमन्त्रणादयो लोडर्थाः यस्माद्धातोः परिलक्ष्यन्ते, तस्मिन्नर्थे विद्यमानधातोः भविष्यति काले विकल्पेन लट्लकारः प्रकृतसूत्रेण क्रियते। एतदुदाहरणं सुभद्राहरणे एकादशसर्गे निर्दिष्टम्।

**दृष्ट्वेह युष्मानभ्येत्य नमन्ति यदि नागराः।**
**तान् समृद्धयथाशीर्भिस्सवीर्या हि द्विजातयः।।**[6] (11-34)

श्रीकृष्णेन सह मेलितुम् आयातः अर्जुनः स्वेन साकम् आगतान् द्विजपुङ्गवान् सुहृदः इत्थं वदति– द्वारवत्यां यदि नागराः युष्मान् दृष्ट्वा नमन्ति तर्हि यूयं सत्त्वसम्पन्नाः विप्राः तान् आशीर्भिः समभिवर्धयिष्यथ। श्लोकेऽस्मिन् **"समृद्धयथ"** इत्यत्र विध्यर्थः परिलक्ष्यते इत्यतः **"लोडर्थलक्षणे च"** इत्यनेन भविष्यति लट्लकारः प्रयुक्तः।

---

1. अष्टाध्यायीसूत्रपाठः– पृ. 32
2. वै.सि.कौ.– पृ. 545
3. वासुदेवविजयम्– पृ. 17
4. अष्टाध्यायीसूत्रपाठः– पृ. 32
5. वै.सि.कौ.– पृ. 546
6. सुभद्राहरणम्– पृ. 256

**( 12 ) वर्तमानसामीप्ये वर्तमानवद्वा[1] ( पा.सू. 3.3.139 )**

वर्तमाने लट् इत्यारभ्य उणादयो बहुलम् इति यावत् येनोपाधिना प्रत्ययाः उक्ताः ते तथैव वर्तमानसमीपे भूते भविष्यति च वा स्युः।[2] एतत्सूत्रं भट्टिकाव्ये इत्थमुदाजहार कविः–

**विपाकोऽयं दशग्रीव! संदृष्टोऽनागतो मया।**
**त्वं तेनाऽभिहितः पथ्यं किं कोपं न नियच्छसि।।**[3] (१८-३)

हे दशास्य! ईदृशोऽयं त्वन्मरणरूपः विपरिणामः मया विभीषणेन भविष्यन्नेव परिलक्षितः। तेन सन्दर्शनरूपकारेण भवान् मया हितमुक्तः–**"सीतां मुञ्च"** इति। तथापि त्वं क्रोधं किं न अपानयत्? श्लोकेऽस्मिन् **"नियच्छसि"** इत्यत्र प्रकृतसूत्रेण समीपवर्तिभूतं वक्तुं लट्लकारः अन्वशासि।

**( 13 ) आशंसायां भूतवच्च[4] ( पा. सू. 3.3.132 )**

भविष्यति कालेभूतवत् वर्तमानवच्च प्रत्ययाः वा स्युः आशंसायाम्।[5] सूत्रेणानेन अप्राप्तविषयस्य प्राप्तौ सत्यां भविष्यति वा लट्प्रयोगः अनुशिष्टः। एतदुदाहरणं सुभद्राहरणे निरदिश्यत–

**वनमालाभृतं नीलं पीताम्बरमहं प्रियम्।**
**पश्यामि पुण्डरीकाक्षं यदि गाढं परिष्वजे।।**[6] (11-38)

अर्जुनोऽत्र वक्ति यत् यदि वनमालिनं नीलं पीताम्बरं कमलनेत्रं श्रीकृष्णं द्रक्ष्यामि तर्हि गाढं तमहम् आश्लेक्ष्यामि। श्लोकेऽस्मिन् **"पश्यामि, परिष्वजे"** इत्यत्र **"आशंसायां भूतवच्च"** इत्यनेन चकारात् वर्तमानवत्लट्प्रत्ययः विहितः। आशंसा चाऽत्र श्लोके भविष्यत्कालविषया अप्राप्तश्रीकृष्णालिङ्गनरूपा।

**( 14 ) गर्हायां लडपिजात्वोः[7] ( पा. सू. 3.3.142 )**

आभ्यां योगे लट् स्यात् कालत्रये गर्हायाम्।[8] निन्दायां गम्यमानायाम् **"अपि,**

---

1. अष्टाध्यायीसूत्रपाठः– पृ. 35
2. वै.सि.कौ.– पृ. 548
3. भट्टिकाव्यम्– पृ. 292
4. अष्टाध्यायीसूत्रपाठः– पृ. 35
5. वै.सि.कौ.– पृ. 549
6. सुभद्राहरणम्– पृ. 257
7. अष्टाध्यायीसूत्रपाठः– पृ. 36
8. वै.सि.कौ.– पृ. 557

**जातु"** इत्यनयोः अन्यतरस्य योगे कालत्रये लट्लकारः क्रियते। एतदुदाहरणं भट्टिकाव्ये इत्थम्–

**मन्त्रे जातु वदन्त्यज्ञाः त्वं तानप्यनुमन्यसे।**
**कथं नाम भवांस्तत्र नाऽवैति हितमात्मनः॥**[1] (18-16)

अस्यार्थस्तु–विभीषणः मृतरावणं ब्रूते– विचारकाले कदापि मूढाः उपदिशन्ति इति निन्दनीयम्। त्वं रावणः तान् अपि आप्तत्वेन अङ्गीचकार। एतदपि गर्हितम्। भवान् स्वहितं कथं न जानाति? विदुषस्ते गर्हितमेतत्।

श्लोकेऽस्मिन् **"जातु"** शब्दयोगे निन्दायां गम्यमानायां प्रकृतसूत्रेण भूते लट् प्रयुक्तः।

**उपसंहारः**

कठिनं शास्त्रं रुचिरया शैल्या अवगमयितुं शिष्यवत्सलैः शास्त्रज्ञकविभिः उदाहरणकाव्यानि प्राणीयन्त। अनेनेदं स्पष्टं ज्ञातुं सुलभं यत् व्याकरणसंस्कृतानां पदानां प्रायोगिकोदाहरणैः सह अवबोधे इमान्युदाहरणकाव्यानि नितराम् उपयुक्तानि। पूर्वं काचित् काव्यपाठनप्रणाली इयमेवासीत् यत् विद्वांसः काव्यमुखेन तत्तच्छास्त्रम् अध्यजीगपन्।

**सन्दर्भग्रन्थसूचिः**

1. काव्यालङ्कारसूत्राणि– वामनरचितानि, चौखम्बासुरभारतीप्रकाशनम्।
2. उत्सवः सुधियामलम् (व्याकरणोदाहरणकाव्येषु विचारः), सम्पादकः– डॉ. एन. के. सुन्देश्वरन्, कालिकट् विश्वविद्यालयः।
3. क्षेमेन्द्रकृतं सुवृत्ततिलकम्।
4. व्याकरणमहाभाष्यम्– भाष्यप्रदीपोद्योतभासितम्– प्रथमखण्डः, सं. भार्गवशास्त्री जोषी, चौखम्बा संस्कृत प्रतिष्ठानम्।
5. भट्टिकाव्यम्– चन्द्रकला विद्योतिनी संस्कृतहिन्दीव्याख्यासमन्वितम् (18-22 सर्गाः) व्याख्याता– पं. शेषराजशर्मा रेग्मी– चौखम्बा संस्कृत सीरीज आफिस, वाराणसी।

1. भट्टिकाव्यम्– पृ. 299

6. वैय्याकरणसिद्धान्तकारिका:– भट्टोजिदीक्षित:, आनन्दाश्रमसंस्कृतग्रन्थावलि:।

7. अष्टाध्यायीसूत्रपाठः (प्रकरणनिर्देशसमन्वितः) सम्पादिका– पुष्पा दीक्षित, ज्ञानभारती पब्लिकेशन्स, दिल्ली, भारत।

8. काशिका–2 (तृतीयचतुर्थाध्यायौ) प्र.सं. आचार्य राधावल्लभत्रिपाठी, कुलपतिः, रा.सं.सं.।

9. ब्रह्मदत्तनारायणविरचितं सुभद्राहरणमहाकाव्यम्– प्रो. एम्. श्रीधर मेनन् महोदयेन संशोध्य विमर्शनपूर्विकया भूमिकया सह सम्पादितम्।

10. वैयाकरणसिद्धान्तकौमुदी– श्रीधरमुखोल्लासिनी हिन्दी व्याख्या समन्विता (णिच् प्रकरणतः लकारार्थप्रकरणपर्यन्तम्) व्या. गोविन्दाचार्यः, चौखम्बासुरभारती प्रकाशन, वाराणसी।

11. वासुदेवकविविरचितम् वासुदेवविजयम् (स्वोपज्ञपदचन्द्रिकासहितम्) पाणिनीय-व्याकरणोदाहरणसमापनीयं काव्यम्– सं. विजयपालशास्त्री, प्रकाशनम्– रा. सं.सं., वेदव्यासपरिसरः।

✦✦✦

 ISSN : 0975-1769

# संचाररोधकाल में ऑनलाइन माध्यमों द्वारा संस्कृत शिक्षण पर विद्यार्थियों की प्रतिक्रिया का अध्ययन

**-डॉ. श्रुतिकान्त पाण्डेय**

सहायकाचार्य, एमिटी संस्कृत अध्ययन एवं शोध संस्थान,
एमिटी विश्वविद्यालय, सैक्टर 125, नोएडा, उत्तरप्रदेश

**[ कोरोना महारोगस्य प्रभावेण सर्वमपि अध्ययनाध्यापनकर्म अवरुद्धम् अस्ति। तथापि आनलाईन माध्यमेन पठनपाठनप्रक्रिया पुनरारब्धा। तत्र संस्कृतपठनपाठनप्रक्रियायां विद्यार्थिनां कीदृशी प्रक्रिया इति विवेचनम् अस्मिन् कृतम् अस्ति। ]**

**शोधसार**

वर्तमान समय में कॉरोना विषाणु के संक्रमण से फैलने वाली कोविड-19 नामक महामारी से सम्पूर्ण विश्व को यथास्थान ठहरा दिया है। इस ठहराव का प्रभाव देश और समाज की समस्त व्यवस्थाओं पर देखा जा सकता है। अन्य क्षेत्रों के साथ शिक्षा प्रणाली भी नए विकल्पों के प्रयोग से स्वयं को जीवन्त और कार्यान्वित कर रही है। परिणामस्वरूप अन्यान्य इलैक्ट्रॉनिक माध्यमों का प्रयोग करते हुए ऑनलाइन शिक्षण-अधिगम का क्रम सर्वत्र दृश्यमान हो रहा है। यह सब बिना यथोचित तैयारी, शोध, परीक्षण और प्रशिक्षण के हो रहा है, जिसका आमूल प्रभाव भविष्य में अनुभव होगा। प्रस्तुत शोध में ऑनलाइन माध्यमों से संस्कृत शिक्षण के अध्येताओं पर आपद्यमान प्रभावों का विधिवत् अध्ययन किया गया है।

शोध परिणाम हेतु एक स्वनिर्मित और मानकीकृत प्रश्नावली इलैक्ट्रॉनिक माध्यम द्वारा राष्ट्रीय राजधानी क्षेत्र के एकसौ संस्कृत विद्यार्थियों को भेजी गई। प्रयुक्त शोधोपकरण में ऑनलाइन शिक्षण हेतु अभीष्ट संसाधनों के अतिरिक्त गद्य, पद्य और व्याकरण शिक्षण-अधिगम से सम्बद्ध 20 द्विविकल्पीय प्रश्न रखे गए। प्रथमप्राप्त 50 प्रतिक्रियाओं के प्रतिशतमान द्वारा विश्लेषण से शोधपत्र का निष्कर्ष प्राप्त किया गया।

उपलब्ध आँकड़ों के विश्लेषण से स्पष्ट है कि राष्ट्रीय राजधानी क्षेत्र के 75 प्रतिशत संस्कृतअध्येता ऑनलाइन अध्ययन हेतु इंटरनेटयुक्त उपकरण से सन्नद्ध हैं। यद्यपि उनमें से 75 प्रतिभागी प्रतिशत इन उपकरणों के संचालन में दक्ष पाए गए। 70 प्रतिशत विद्यार्थीऑनलाइन पाठ्यसामग्री खोजन में सक्षम हैं जबकि 50 प्रतिशत शिक्षक-विद्यार्थी समन्वय के अभाव में समस्त संसाधनों के होने पर भी ऑनलाइन शिक्षण प्रणाली का लाभ नहीं उठा सके।

पठन, अर्थ व भावसम्प्रेषण, प्रश्नोत्तर और बोध-विचार की दृष्टि से गद्य शिक्षण में 83 प्रतिशत विद्यार्थियों ने सन्तोष व्यक्त किया। लेकिन पद्य और व्याकरण शिक्षण में उनकी सन्तुष्टिदर क्रमशः 51 और 48 प्रतिशत रही। इससे स्पष्ट है कि ज्ञान व सूचना प्रसारण के अतिरिक्त काव्य व व्याकरण शिक्षण तथा अभ्यास में ऑनलाइन संस्कृतशिक्षण प्रणाली अधिकांश विद्यार्थियों के लिए अबोधगम्य और नीरस रही।

बीजशब्दः ऑनलाइन शिक्षण, इंटरनेट, पठन, अर्थसम्प्रेषण, भावसम्प्रेषण, प्रश्नोत्तर, बोध-विचार।

## परिचय

भाषा वैज्ञानिकों के बहुमतानुसार संस्कृत विश्व की सर्वप्रथम, सर्वथा वैज्ञानिक और सर्वाधिक सशक्त भाषा है। भारतीय परम्परा में इसे एक अरब, छियानवे करोड़, आठ लाख, तिरेपन हज़ार, एक सौ बीस वर्ष पुरानी बताया जाता है। हिमाद्रि के अनुसार चैत्र शुक्ल प्रतिपदा रविवार को आकाश में सूर्योदय के साथ पल, लग्न, मुहूर्त, दिन, पक्ष, मास, अयन, ऋतु, वर्ष और युग सहित मानवसृष्टि उत्पन्न हुई। इन्हीं के साथ प्रथम साहित्य वेद और प्रथम भाषा संस्कृत की भी उत्पत्ति हुई। यही संस्कृत भाषा पारस्परिक संभाषण के साथ वेदज्ञान के अन्तरण का भी स्वाभाविक माध्यम बनी। कालान्तर में वेदाधारित ब्राह्मण, आरण्यक, उपनिषद, वेदांग, उपवेद, स्मृति और सूत्रग्रन्थों के उद्‌भवक्रम में वैदिक संस्कृत का लौकिकीकरण होता गया, जिसे वैयाकरणों की सुदीर्घ परम्परा के उपरान्त महर्षि पाणिनी ने अष्टाध्यायी द्वारा व्यवस्थित किया।

वैदिक परम्परा में वेद कभी निर्मित या नष्ट नहीं होते वे सदा सृष्टिकर्ता में समाहित रहते हैं। प्रत्येक सृष्टि की आदि में उनका आविर्भाव तथा प्रलय में तिरोभाव होता रहता है। वर्तमान सृष्टि में उनका प्रकाश अग्नि, वायु, आदित्य और अंगिरा नामक पुण्यात्माओं के हृदय में निसर्गतः हुआ। तत्पश्चात ब्रह्मा आदि ऋषियों ने इसे अग्रिम परम्परा तक श्रुतिपरम्परा से सम्प्रेषित किया। यह क्रम

लिपियों के विकास तक जारी रहा जब अध्येताओं ने इन्हें लिपिबद्ध करके शिष्य-प्रशिष्यों तक अन्तरण की व्यवस्था की; जिसकी भाषा स्वभावतः संस्कृत थी। कालान्तर में जिन वेदाधारित ग्रन्थों का प्रणयन हुआ, उनकी भाषा संस्कृत होने के कारण उनका शिक्षण भी इसी माध्यम से होता रहा। इस प्रकार संस्कृत भाषा और उसके साहित्य के शिक्षण की परम्परा मानव इतिहास की प्राचीनतम शृंखला है।

संस्कृत और इसके शिक्षण की परम्परा सतत परिवर्तमान रही है। संस्कृत शिक्षण विधियों को प्रमुखतः प्राचीन, पारम्परिक और आधुनिक श्रेणियों में विभक्त किया जाता है। प्राचीनकाल में विषयों की प्रकृति के अनुसार श्रवण, मनन, निदिध्यासन, आवृत्ति, कण्ठस्थीकरण, व्याख्या आदि विधियों का प्राधान्य रहा है। अनन्तर सूत्र, पारायण, प्रश्नोत्तर, व्यास, व्याकरण, अनुवाद, पाठ्यपुस्तक आदि विधियों का आविर्भाव हुआ। शिक्षण-अधिगम के क्षेत्र में अनुसन्धान, मनोविज्ञान, लोकतन्त्र, सूचना-प्रविधि आदि के अन्तर्वेश से संस्कृत शिक्षण में प्रत्यक्ष, हरबर्ट-पंचपदीय, डाल्टन, परियोजना, आगमन-निगमन, समूहशिक्षण, अभिक्रमित अनुदेशन, सम्प्रेषण, संभाषणाधारित आदि विधियों का प्रयोग किया जाने लगा है। इस विवरण से स्पष्ट है कि संस्कृत शिक्षण प्रविधि सतत संवर्धनशील है और इसमें नए प्रयोगों की अपेक्षा सदा ही बनी रही है।

विश्वभर में कोविड 19 से उत्पन्न कॉरोना के विस्तार को देखते हुए भारत में प्रधानमंत्री श्री नरेन्द्र मोदी ने जब रविवार, 22 मार्च 2002 को 'जनता कर्फ्यू' यानि सांकेतिक संचाररोध का आह्वान किया तो किसी को आभास नहीं था कि यह देश के इतिहास में अब तक के सबसे विलक्षण रोगनिवारक उपाय के रूप में परिवर्तित होगा। इसके बाद तो एक के बाद चार संचाररोधकाल घोषित किए जा चुके हैं जिनमें पहला 24 मार्च से 14 अप्रैल, दूसरा 15 अप्रैल से 03 मई, तीसरा 04 से 17 मई और चौथा 17 से 31 मई तक विस्तारित हुआ।

मानव इतिहास के अभूतपूर्व संचाररोध ने जीवन के प्रत्येक क्षेत्र को गहराई से प्रभावित किया। उद्योग, व्यापार, परिवहन, संचार, सेवाक्षेत्र के साथ ही इसने शिक्षण प्रविधि को भी एक ही झटके में बदल दिया। आरम्भिक किंकर्त्तव्यविमूढता के बाद इलैक्ट्रॉनिक माध्यमों द्वारा ऑनलाइन कक्षाओं का अटूट क्रम आरम्भ हुआ। प्राथमिक से विश्वविद्यालयीय स्तर तक सैद्धान्तिक से व्यावहारिक तक सभी विषय इस माध्यम से उपलब्ध कराए जाने लगे। प्रशासन, शिक्षकों और विद्यार्थियों ने सूचना प्रविधि के समस्त उपलब्ध उपबन्धों का मुक्तहृदय से प्रयोग आरम्भ किया। इस प्रक्रिया में संस्कृत शिक्षण भी मुख्यधारा में सम्मिलित है।

ऑनलाइन इलैक्ट्रॉनिक शिक्षण पटलों की संख्या बहुत बड़ी है किन्तु भारत में गूगल क्लासरूम, ज़ूम, सिस्को वैबैक्स, कहोट, पॉकेट, ड्रॉपबॉक्स, रिमाइण्ड, क्लासट्री, स्टैक, गूगल मीट, व्हाट्सैप, एम.एस.टीम्स आदि का प्रचलन अधिक है। संस्कृत शिक्षण के लिए इन सभी का प्रयोग किया जा सकता है। इनके माध्यम से शिक्षक और विद्यार्थी परस्पर सम्भाषण, सन्देश-विनिमय, पी.पी.टी. प्रदर्शन, चलचित्र अथवा वीडियो प्रदर्शन, लेखपट्ट प्रयोग जैसे सभी क्रियाकलाप कर सकते हैं जो वे सामान्य कक्षाकक्ष में करते हैं। इससे प्रत्यक्षतः आभास होता है कि परम्परागत अथवा प्रत्यक्ष शिक्षण और ऑनलाइन शिक्षण में कोई अन्तर नहीं है। लेकिन इस विषय में शिक्षकों और विद्यार्थियों की प्रतिक्रिया से भिन्न परिदृश्य उपस्थित होता है। इस विषय को औपचारिक अनुसन्धान विधि द्वारा दत्तों के संकलन, विश्लेषण औरनिष्कर्ष प्रक्रिया द्वारा उपस्थापित करना प्रस्तुत शोध का उद्देश्य है।

## सम्बद्ध साहित्य का अध्ययन

कॉरोना के विश्वव्यापी प्रसार ने अन्य क्षेत्रों के साथ ही शिक्षण-अधिगम को भी गहनता से प्रभावित किया है। इसके कारण पहले से उपस्थित ऑनलाइन इलैक्ट्रॉनिक शिक्षण माध्यम न केवल प्रचलित हो गया है अपितु जन-जन की आवश्यकता भी बन गया है। इस विषय पर देश-विदेश में अनेक अध्ययन किए जा रहे हैं जिनके निष्कर्ष विविध हैं। इनमें से अनेक इस माध्यम के पक्ष में तर्क देते हैं जबकि अनेक का सार इस व्यवस्था की उपयोगिता पर प्रश्नचिह्न उपस्थापित करते हैं। यहाँ इस सन्दर्भ में विहित कतिपय शोधपत्रों का उल्लेख किया जा रहा है जिससे प्रस्तुत शोध की आवश्यकता स्थापित करने में सहायता होगी।

आधुनिक समय में इलैक्ट्रॉनिक माध्यमों द्वारा शिक्षण के प्रभाव पर अमेरिका स्थित रोवन विश्वविद्यालय के अन्ना सन और जूफांग शेन ने व्यापक शोध किया है। शोधकर्त्ताओं के अनुसार ऑनलाइन शिक्षण अब अप्रत्यावर्तनीय अभियान है। उन्नीसवीं शताब्दी में उपजी इस प्रणाली का 21वीं सदी में अकल्पनीय विस्तार हुआ है। इसके लिए कम्प्यूटर, लैपटॉप, स्मार्टफोन, इंटरनेट सम्बद्धता और अन्यान्य पटलों की उपलब्धता की बड़ी भूमिका है।

लेखक के अनुसार आने वाले समय में ऑनलाइन शिक्षण का परिक्षेत्र और विस्तृत होगा लेकिन इसके प्रत्यक्ष शिक्षण का स्थानापन्न बनने की संभावना नगण्य है। यह केवल एक विकल्प के रूप में समानान्तर व्यवस्था बन सकती

है क्योंकि इसके माध्यम से स्थान की दूरी, व्ययसाध्यता और व्यस्तता होने पर भी शिक्षण-अधिगम सम्भव है।

भारत ही नहीं; संसार के अनेक विकसित देशों में भी ऑनलाइन पद्धति की शिक्षा को सहज और स्वाभाविक माध्यम स्वीकारने में संशय बना हुआ है। इसे देखते हुए अमरीकी शिक्षा विभाग द्वारा 1996 से 2008 के बीच सम्बद्ध विषयों के एक हज़ार से अधिक शोधपत्रों का विश्लेषण किया गया। इसके अन्तर्गत विशेषज्ञों ने ऑनलाइन और साक्षात शिक्षण में अध्येताओं के अधिगम परिणामों का तुलनात्मक अध्ययन किया। अध्ययन के अनुसार ऑनलाइन शिक्षण द्वारा विद्यार्थियों के अधिगम स्तर को सुधारने में पर्याप्त सहायता मिली। इसके कारण के रूप में ऑनलाइन शिक्षण में उपलब्ध अतिरिक्त समय, विविध सामग्री और स्वच्छन्द अधिगम को श्रेय दिया गया। दल ने सुझाव दिया कि ऑनलाइन शिक्षण को प्रभावी बनाने के लिए विविध अध्यापन सामग्री तैयार की जानी चाहिए। प्रस्तुत अध्ययन में केवल अधिगम परिणाम को दृष्टिगत रखकर दोनों शिक्षण प्रणालियों का विश्लेषण किया गया है, शिक्षा के उद्देश्यों में समाहित व्यक्तित्व विकास के अन्य पहलुओं के विषय में यह शोध पूर्णत: मौन है।

